Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेट ! || श्रीसत्यविजयजैनग्रन्थमाला नं. ६ || भेट !

॥ अर्हम् ॥

॥ जगत्पूज्य परमगुरुश्रीविजयनीतिसूरीश्वरपादपद्मेभ्यो नमः ॥

॥ परमार्हत् श्रीनेमिचन्द्रभाण्डागारिकविरचितं-महोपाध्याय श्रीगुणरत्नगणिसन्दृब्धवृत्तियुतम्॥

# ॥ षष्टिशतकप्रकरणम् ॥

संशोधकः- अनुयोगाचार्य पन्न्यास श्रीमद्धर्षविजयगणि--शिष्य--मुनि--श्रीमानविजयः

प्रकाशकः—श्रीसत्यविजयजैनग्रन्थमालायाः माननीयकार्यवाहकः

श्रेष्ठि बालाभाइ मुलचंद्र—अमदावाद.

वीर सं० २४५० ] आवृत्ति १ ली. प्रत २५० [ सने १९२४

भेट.

श्रीजैन एडवोकेट प्री. प्रेस.

For Private and Personal Use Only

आ पुस्तक प्रकाशित करवा माटे पूज्यपाद आचार्य श्रीविजयनीतिसूरीश्वरजी महाराज
तथा पन्यास दानविजयजी गणीना सदुपदेशथी खेरालुनिवासी स्वर्गस्थ शेठ
रवचंद मंगळजीना तरफथी मेता. कचराभाइ मोहोकमचंद
तथा पटवा पोपटलाल वाडीलाल तेमना ट्रस्टीओए विलमांथी
आर्थिक सहाय आपी छे ते बदल तेमने धन्यवाद घटे छे.

इदं पुस्तकं राजनगर ( अमदावाद )स्थ जैन एडवोकेट यन्त्रालये ( घीकांटा वाडी )
चीमनलाल गोकलदासेन मुद्रितम्

॥ श्रीसर्वज्ञाय नमः ॥

## ॥ किञ्चित्प्रस्तावना ॥

विद्वज्जनचेतश्चमत्कारि विधिमार्गप्रतिपादनपरं सद्देवगुरुधर्मविषयप्रतिबद्धं षष्ठ्यधिकगाथाशतमानं प्रकरणमिदं निस्तन्द्रया धिया भाण्डागारिकनेमिचन्द्रेण विरचितमस्ति ।यतः-"एवं भंडारिअनेमिचंदरइआओ कइविगाहाओ । विहिमग्गरया भव्वा पढंतु जाणंतु जंतु सिवं॥१॥"यद्यपि ग्रन्थकारेण स्वसत्तासमयो न प्रकटीकृतः तथापि जिनदत्तसूरिचरितानुसारेण विक्रमीयत्रयोदशशताब्त्रां समभूत् इत्यनुमीयते । असौ नेमिचन्द्रः अणहिलपुरपत्तननिवासिसज्जनभाण्डागारिकसुततया श्रीजिनेश्वरसूरिजनकतया प्रसिद्धोऽस्ति । अयं सद्देवगुरुधर्मतत्त्वजिज्ञासार्थे नगरग्रामाकरपत्तनस्थितनानागच्छातुच्छश्रमणानीक्षमाणः तत्कालोचितक्रियाकलापनिष्णातजिनपत्तिसूरिवर्यस्य पार्श्वे सम्यक्त्वपूर्वकदेशविरतिं जग्राह अस्योपरि महोपाध्यायश्रीगुणरत्नगणिना " परोपकाराय सतां विभूतयः " एतद्वाक्यानुसारेण १५०१ वर्षे वृत्तिर्विहिता, यदुक्तं प्रशस्त्याम्--

शशिगगनबाणभूमिप्रमिते वर्षे कृता विवृत्तिरिह । आचन्द्रार्कं नन्दतु विबुधवरैर्वाच्यमानेयम् ॥ १ ॥

अयं गुणरत्नगणिः कस्मिन् देशे कतमं भूमण्डलं मण्डयामास के के ग्रन्था विनिर्मिताः तदस्माभिर्न निर्णीयते,क्वापि तत्सम्बन्धिलेखादर्शनात् । अस्मिन् प्रकरणे कुदेव-कुगुरु-कुधर्मसेवनया जीवा अनन्तशो भवभ्रमणं कुर्वन्ति । सुदेव-सुगुरु-सुधर्माराधनेन बहवः प्राणिनोऽजरामरपदं प्राप्नुवन्ति इत्यादि युक्त्या सुप्रतिपाद्य सद्देव-गुरु-धर्ममेव तत्त्वमिति निरूपि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तम् तच्च ग्रन्थावलोकनेन ज्ञास्यते । कुत्रचित् विषमस्थले टिप्पणमपि न्यस्तम् ।

## एतद्ग्रन्थागतकथानां सूची

सद्देवगुरुधर्माराधनविषये सुभद्राचरितम्, सम्यगाराधिता सेन्द्रा देवगणा अपि मरणात् त्रातुं न शक्ताः तद्विषये लौकिकोदाहरणम् । अविरतान् दृष्ट्वा विरतानां मनस्तापो भवति तदुपरि वर्द्धमानस्वामिन उदन्तम्, सम्यक्त्ववतां विघ्नोऽप्युत्सवरूपो भवति तदुपरि अर्हन्नकाख्यानकम् । श्रुतचारित्ररूपस्य भगवद्धर्मस्य श्रद्धानमपि तीक्ष्णदुःखानि निष्ठापयति तद्विषये इलापुत्रनिदर्शनम् । एतत्पुस्तकगवेषणतत्परेण मया पुनः पुनः प्रयत्नोऽकारि, परं केवलं पुस्तकद्वयमेव समुपलब्धम्, एकं षट्पञ्चाशत् पत्रात्मकं " डेला " ख्योपाश्रयस्थितज्ञानभण्डारसत्कं, द्वितीयं च अष्टपञ्चोतरशतपत्रात्मकं आचार्यवर्यश्रीविजयनेमिसूरीशचित्कोषसत्कं केशवलाल प्रेमचन्द्रद्वारा सम्प्राप्तम् । एतन्मात्रसंशोधनसाधनावलम्बनेन सूक्ष्मदृष्ट्या शोधितेऽप्यस्मिन् ग्रन्थे मदीयदृष्टिदोषेणाक्षरसंयोजकदोषेण वा यत्र क्वचनाऽशुद्धिः कृता जाता वा भवेत् तत्र संशोधनीयं शुद्धशेमुषीदूरीकृतमत्सरैर्विद्वद्भिरिति ।

गच्छतः स्खलनं क्वापि, भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥ १ ॥

वीर सं. २४५० आश्विन कृष्णपक्षद्वादशी
राजनगर.

प्रार्थयते--अनुयोगाचार्य पन्यास श्रीमद्धर्षविजयगणिचरणाम्भोजचञ्चरीकायमाणो रचिताञ्जलिः
मानविजयो मुनिः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ निवेदन ॥

आ षष्ठिशतक मूल ग्रन्थ भाण्डागारिक श्रीनेमिचन्द्र श्रावके १६० गाथामां लखेलो छे,तेनी संस्कृत टीका महोपाध्यायश्री गुणरत्नगणिजीए १५०१ नी सालमां रची छे. आ टीकामां टीकाकारे देवगुरुधर्म, सम्यक्त्व, विगेरे विषयो युक्तिपूर्वक दाखला दलीलोथी सारीरीते प्रतिपादन करेला छे, अने पवी सरल संस्कृत भाषामां लखेला छे के साधारण बुद्धिवाळाओ पण सहेलाइथी वांची शके तेम छे.

आ ग्रन्थमां पाठान्तरो चोखंडा कांउसमां मुकेला छे, तेमज टीकानी अंतरगत केटलीक प्रास्ताविक गाथाओ अने श्लोकोनी टीकाओ चोखंडा कांउसमां मुकी छे,तेमज टीकानो अन्तर्गत गाथाओनी छाया पण पाछळ मुकी छे.

क्वचित् कांइ त्रुटि जणाय ते ठेकाणे सहेज उमेरो कर्यो छे ते गोळ कांउसमां आपेल छे. मूळ ग्रन्थनुं भाषारुपे अनुवाद जे पद्यमां छे ते पण पाछळ छापवामां आव्यो छे.

आ ग्रन्थ सुधारवा माटे प्रतो विगेरे मेळवी आपवा तथा सुधारो वधारो करवा माटे रा. रा. वकील केशवलाल प्रेमचन्दभाइए उपयोगी सारी मदद करी छे ते बाबत तेमने धन्यवाद घटे छे.

ग्रन्थ शुद्धिमां पुरतुं ध्यान आपवामां आव्युं छे छतां केटलेक स्थले प्रेसना दोषथी भूलो रही छे ते माटे शुद्धिपत्रक मुकेल छे. छतां भूलो दृष्टिगोचर थाय ते विद्वानो सुधारी वांचशे, तेवी अमारी प्रार्थना छे. भुलो जणाव्याथी बीजी आवृत्ति वखते योग्य सुधारो करीशुं.

ली. प्रकाशकः

सत्यविजय ग्रन्थमालाना कार्यवाहक

**शा. बालाभाइ मुळचंद्र. अमदावाद.**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ॥ षष्ठिशतकप्रकरणस्य अनुक्रमणिका. ॥


| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| १ | मङ्गलाभिधेयसम्बन्धप्रयोजनानि | २ |
| | सुभद्राचरित्र (गा. १-१७१) | ३-८ |
| २ | अर्हद्देवादितत्त्वस्वरूप सुकरकृत्योपदेशः | ९ |
| ३-४ | जिनधर्म एव भवदुःखानि हरति | १० |
| | लौकिकदृष्टान्तः (गा. १-७६) | ११-१३ |
| ५ | मिथ्यात्वमनर्थकारणमपि तत्सेवने सोपनयं दृष्टान्तम् | १४ |
| ६-७ | लोकप्रवाहरूपस्य कुलक्रमस्य धर्मत्वाभावः | १४-१५ |
| ८ | विरतिदुर्लभता | १५ |

| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| ९ | विरतिवतां गुणविशेषः | १६ |
| | कौशिकदृष्टान्तः (१-९१) | १७-२० |
| १० | मिथ्यात्वस्य सर्वदुःखहेतुत्वम् | २० |
| ११ | मिथ्यात्वलवेन बोधिर्न लभ्यते | २१ |
| १२ | आज्ञाविकलस्य धर्मस्यापि पापफलत्वम् | २२ |
| १३ | अयोग्यस्य उपदेशदाने दोषप्रसङ्गः | २३ |
| १४ | अयोग्याननुपदिशतामुपदेष्टृणां रोषोऽपि क्षमाकोषः एव | २४ |
| १५ | जिनधर्मस्य फलनिश्चयावगमेऽपि तद्दुर्विज्ञेयता | २५ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| १६ | जिनमतविधिरत्नविज्ञानदुर्लभता | २५ |
| १७ | विशुद्धसम्यक्त्वकथनस्यापि दुर्लभता | २६ |
| १८ | उत्सूत्रभाषी गुणविद्यानिलयोऽपि त्याज्यः | २७ |
| १९ | स्वजनमोहादिना लोका गृह्णन्ते न सुधर्मेण | २७ |
| २० | केषांचित् धर्मः केषांचित् कामिनी विश्रामस्थानम् | २८ |
| २१ | कृत्यतुल्यत्वेऽपि मूढामूढयोः फलविशेषम् | २९ |
| २२-२३ | धर्मश्रवणं अमूढत्वप्राप्त्युपायम् | ३० |
| २४ | धर्मश्रवणेऽपि सम्यक्त्वादिज्ञान एव तस्य साफल्यम् | ३२ |
| २५ | जिनागमप्राप्तावपि गुरुकर्मणां सम्यक्त्वादिदौर्लभ्यम् | ३३ |
| २६-२७ | जिनोपदिष्टपर्वणामपि धर्मसाधनत्वम् | ३४ |

| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| २७-२८ | कुपर्वसु मध्यस्थानामेव संसर्गात् गुणदोषौ भवतः | ३५ |
| २९ | सुपर्वकुपर्वभेदेन पर्वद्वैविध्यम् | ३६ |
| ३० | लक्ष्म्या द्वैविध्यम् | ३६ |
| ३१ | गृहीतृदात्रोः पापनिबन्धनत्वेन गुणक्षपकत्वं स्यात् | ३७ |
| ३२-३३ | परमार्थज्ञाः स्तोकाः तस्य कारणम् | ३८ |
| ३४ | शुद्धमार्गोपदेशकस्य स्वरूपम् | ३९ |
| ३५ | कुगुरुं गुरुबुद्ध्याऽङ्गीकृतानां स्वरूपम् | ३९ |
| ३६ | कुगुरुं त्यजन्तं मूढा निन्दन्ति | ४० |
| ३७ | कुगुरुसेवानिवारणम् | ४० |
| ३८ | कुगुरुं गुरुबुद्ध्या नमन्ति तच्छलिताः | ४१ |
| ३९ | कुगुरुत्यागदाक्षिण्यमूढतां दर्शयति | ४४ |
| ४० | कुगुरुमूढतादर्शनम् | ४४ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| ४१ | अमूढेषु भक्तिर्भवति मूढानां चरित्रदर्शनात् | ४५ |
| ४२ | सम्यग्दृशां निबिडा भक्तिर्भवति | ४५ |
| ४३ | धर्मस्योदयः किं न स्यात् तस्य कारणम् | ४७ |
| ४४ | येषां पापात् जिनमतस्य नाभ्युदयः तेषां पापपूर्णत्वम् | ४८ |
| ४५ | अनिषिद्धाचरणं आज्ञया आदिष्टं फलदं स्यात् | ४९ |
| ४६ | आज्ञाविराधकानां मूढतादर्शनम् | ५० |
| ४७ | शुद्धाशुद्धयोः सङ्गस्येष्टानिष्टफलत्वम् | ५० |
| ४८ | अशुद्धसङ्गत्यागविकलस्य सकाशे वासमपि न कर्त्तव्यः | ५१ |
| ४९ | अवासस्य कारणम् | ५३ |
| ५० | अशुद्धानां धर्मकरणेऽपि दोषः | ५३ |

| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| ५१ | शुद्धधर्मार्थिनां यथा पीडा न स्यात् तद्दर्शनम् | ५४ |
| ५२ | यो धर्मार्थिनामाधारभूतः तस्य स्तुतिः | ५६ |
| ५३ | उक्तस्य समर्थनम् | ५७ |
| ५४ | सद्गुणकीर्त्तनं निर्जराहेतुतया धर्मकारणम् | ५७ |
| ५५ | आज्ञया क्रोधादिरहितेन धर्मो विधेयः | ५८ |
| ५६ | इतरजनश्लाघाहृष्टस्यालीकधर्मरतेः अनर्थदर्शनम् | ५९ |
| ५७-५८ | उत्सूत्रत्यागोपदेशम् | ५९-६० |
| ५९ | भवाभिनन्दिनां जिनाज्ञाभञ्जनं क्रीडा | ६० |
| ६० | अश्रुतानां क्रीडा भवति न सश्रुतानामिति शङ्कानिवारणम् | ६१ |
| ६१ | जिनाज्ञापालकान् हसन्ति तस्योपदेशः | ६१ |
| ६२ | उपदेशःनिष्फलोऽयोग्यत्वेन;इति शङ्कासमाधानम् | ६२ |
| ६३ | शुद्धाशयानां स्वभावप्रकटनम् | ६२ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| ६४ | श्रद्धानाभावात् बहुमुनिलोकेऽपि सम्यकत्वं नास्ति | ६३ |
| ६५ | उत्सूत्र भाषकस्य मिथ्यादृष्टित्वम् | ६३ |
| ६६-६७ | परिणतजिनवचनानां लोकप्रवाहधर्मो नष्टचरितमिव प्रतिभाति | ६४ |
| ६८ | लोकप्रवाहात् सम्यक्त्वरहिताश्चलन्ति | ६५ |
| ६९ | लोकप्रवाहप्रेरिता जिनमतनिन्दामपि कुर्वन्ति | ६५ |
| ७० | यो जिनभक्तः सन् सद्विधिं न वेत्ति तं प्रति बोधवचनम् | ६६ |
| ७१-७२-७३-७४ | मिथ्यात्विनां मूढता | ६६-६७ |
| ७५ | न्यायमजानानमूढलक्षणम् | ६८ |
| ७६ | मिथ्यात्विनां धर्मलक्षणम् | ६८ |
| ७७ | यः कुटुम्बस्वामी मिथ्यात्वं प्ररूपयति तस्य दोषः | ६९ |
| ७८ | मिथ्यात्वप्ररूपकस्य दृष्टान्तमः | ७० |
| ७९ | मिथ्यात्वात् कुटुम्बं विरला उद्धरन्ति | ७१ |
| ८० | मिथ्यात्वोदयाद् जिनदेवं न पश्यन्ति | ७१ |
| ८१ | मिथ्यात्वरतादीनां अजातत्वमेव वरम् | ७२ |
| ८२ | व्यन्तराणां वेश्यादिसाम्यत्वम् | ७२ |
| ८३ | सन्मार्गगमनोपदेशः | ७३ |
| ८४-८५ | उन्मार्गगमने दोषाः | ७३-७४ |
| ८६ | सम्यक्त्विनां विघ्नोऽपि उत्सवः | ७४ |
| ८७ | मरणान्तेऽपि सम्यक्त्वात्यागस्य कारणम् | ७९ |
| ८८ | सम्यक्त्वस्य फलम् | ८० |
| ८९ | सम्यक्त्वत्यागे धनं नेच्छन्ति | ८० |
| ९० | जिनपूजाविधिः | ८० |
| ९१ | जिनाज्ञया धर्मः कर्त्तव्यः | ८१ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथाङ्क. | विषय. | पत्राङ्क |
|---|---|---|
| ९२ | तत्त्वज्ञापकस्य लक्षणम् | ८१ |
| ९३ | तत्त्वज्ञानसामग्र्यां सत्यामपि तत्त्वं न जानाति तद्दोषाः | ८२ |
| ९४-९५ | श्रवणस्य गुणः | ८२-८३ |
| ९६-९७ | उपदेशस्य निन्दायां दोषाः | ८४ |
| ९८ | दुःखस्य कारणम् | ८५ |
| ९९ | जिनादेशाकरणे दोषः | ८५ |
| १०० | जिनवचनविराधनाप्रकारम् | ८६ |
| १०१ | शुद्धधर्मदातुः प्रशंसा | ८७ |
| १०२ | गुणदोषे माध्यस्थ्यम् | ८८ |
| १०३ | जिनेन्द्रवचनग्रहणम्, अन्यस्य त्यागः | ८८ |
| १०४ | जिनेन्द्रवचनग्रहणे न रागद्वेषः | ८९ |
| १०५ | जिनवचनरताः गुरवः | ८९ |

| गाथाङ्क. | विषय, | पत्राङ्क. |
|---|---|---|
| १०६ | सुगुरौ आग्रहस्य कारणम् | ९० |
| १०७ | श्रीजिनवल्लभप्रभुगुरुस्तुतिः | ९० |
| १०८ | सुगुरुवचनाद् न सम्यक्त्वं तस्य दृष्टान्तम् | ९१ |
| १०९ | पापादविरतानां धिक्कारः | ९१ |
| ११० | पापानां स्नेहस्यलक्षणम् | ९२ |
| १११ | शोके दोषाः | ९२ |
| ११२ | सुगुर्वादीनां दुर्लभत्वम् | ९२ |
| ११३ | सुगुर्वादीनां दुर्लभत्वे कारणम् | ९३ |
| ११४ | जिनसमयविदां महादुःखदर्शनम् | ९३ |
| ११५ | सम्यक्त्वपालकानां स्तोकत्वम् | ९४ |
| ११६ | सम्यक्त्वं विना अन्यसर्वमकिञ्चित्करम् | ९५ |
| ११७ | धर्मज्ञानां नोन्मार्गगामिषु कोपः | ९५ |
| ११८ | बालानां बालत्वदर्शनम् | ९६ |




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir


| गाथाङ्क. | विषय, | पत्राङ्क. |
|---|---|---|
| ११९ | अबालस्वरूपम् | ९६ |
| १२० | निःसत्त्वस्वरूपम् | ९६ |
| १२१ | अधमाधमस्वरूपम् | ९७ |
| १२२-२३-२४ | उत्सूत्रभाषिणां दोषदर्शनम् | ९७-९८ |
| १२५-२६ | उत्सूत्रभाषकस्य उपदेशदानं अनर्थ कारणम् | ९८-९९ |
| १२७ | जिनधर्माराधनफलम् | ९९ |
| १२८ | शुश्रुषास्वरूपम् | १०२ |
| १२९ | सुगुरुपार्श्वेश्रवणम् | १०२ |
| १३० | कुगुरुं सुगुरुमिव मन्यमाने दोषाः | १०२ |
| १३१ | धर्मं विदधतोऽपि धर्मविमुखत्वस्य कारणम् | १०३ |
| १३२ | लोकस्थितिवर्णनम् | १०३ |
| १३३ | भगवद्वचने निश्चलस्य स्तुतिः | १०४ |

| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| १३४-३५-३६ | गुरुदर्शनप्रश्नः | १०४ |
| १३७-३८ | सुगुरुलब्धेऽपि संशयस्य निराकरणम् | १०५-६ |
| १३९ | ज्ञाते गुरौ शङ्कासमाधानम् | १०६ |
| १४० | श्रद्धासहितस्य कर्त्तव्यम् | १०७ |
| १४१ | लोकप्रवाहस्य कर्त्तव्यम् | १०७ |
| १४२ | पतितालम्बनग्राहिणो दोषदर्शनम् | १०७ |
| १४३ | सुमार्गनिरतसङ्गस्य दौर्लभ्यम् | १०८ |
| १४४ | सुमार्गनिरतसङ्गमेऽपि अभिमानीस्वरूपम् | १०९ |
| १४५ | अभिमानीदूषणदर्शनम् | १०९ |
| १४६ | लोकस्वभावस्वरूपम् | ११० |
| १४७ | लोकाचारमनने दोषदर्शनम् | ११० |
| १४८ | लोकाचारमनननिषेधोपदेशः | ११२ |
| १४९ | जिनमननेऽपि लोकाचारमनने दोषाः | ११२ |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथाङ्क. | विषय. | पत्राङ्क. |
|---|---|---|
| १५०-५१ | मिथ्यात्वग्रस्तस्य कार्यम् | ११३ |
| १५२ | यस्य वर्त्तने वचने च भेदः स न गुरुः | ११४ |
| १५३ | श्रुतोक्तविधौ अप्रवर्त्तमानस्य दोषाः | ११५ |
| १५४ | प्रभुवचनाशातनायां दुष्टत्वकथनम् | ११६ |
| १५५ | आत्मनः गर्हाकथनम् | ११६ |
| १५६ | अनुष्ठानविधौ प्रयत्ने शङ्कानिरासत्वम् | ११६ |
| १५७ | जिनवचनकरणमनोरथस्य आशंसाकरणम् | ११७ |
| १५८ | जिनवचनग्रहणेलोभः | ११७ |
| १५९ | लोभस्य कारणम् | ११७ |
| १६० | स्वगुरुविज्ञप्तिः | ११८ |
| १६१ | उपसंहारः | ११९ |


५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अथ शुद्धिपत्रम् ॥

| अशुद्धम्. | शुद्धम्. | पृष्ठ. | पंक्ति. | पानु. |
|---|---|---|---|---|
| परमार्हत | परमार्हत् | १ | ४ | १ |
| तमस | तमसं | २ | १ | १ |
| वर्द्धतां | वर्द्धतां | २ | २ | १ |
| संशयःतृणावलीम- | संशयतृणावलीम् | २ | ३ | १ |
| गु | गुरुं | २ | १२ | १ |
| गन्थ | ग्रन्थ | २ | १ | २ |
| चागौर | च गौर | २ | १३ | २ |
| प्रतिहार्ये | प्रातिहार्यं | २ | ६ | २ |
| पङ्क | पङ्कं | २ | ३ | ३ |
| जनिः | ऽजनि | २ | ४ | ३ |
| साऽन्यदा | सोऽन्यदा | २ | ४ | ४ |
| मनाज्ञेऽप्येकान्त | मनोज्ञोऽप्यकान्त | २ | १५ | ५ |
| पुरोद्घाटेनदर्श | पुरोद्घाटनदर्श | २ | १२ | ७ |
| त्यक्त्वान्य | त्यक्तान्य | १ | ४ | ८ |
| ऽप्रीता | प्रीता | २ | ५ | ८ |
| नायकत्व | नाशकत्व | २ | ११ | १० |
| अचिन्तयामासि | चिन्तयामासि | २ | ६ | ११ |
| तीषितान् | तोषितान् | १ | ४ | १२ |
| मध्यै | मध्ये | १ | ९ | १२ |
| ऽजीवोऽपि | जीवोऽपि | २ | ७ | १४ |
| हउ | हओ | १ | ३ | १६ |
| समयए | समपए | २ | १३ | १८ |
| कयवय | कइवय | २ | १३ | १८ |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| अशुद्धम् | शुद्धम् | पृष्ठ. | पंक्ति. | पानु |
|---|---|---|---|---|
| तयवत्छं | तयवत्थं | १ | ८ | १९ |
| वहवे | बहवे | १ | १ | १९ |
| भवण | भुवण | १ | १३ | १९ |
| एयायि | एया | २ | ३ | १९ |
| पयडि | पडि | २ | ५ | १९ |
| ननु | नतु | २ | १ | २० |
| ऽयि | ऽपि | १ | १ | २४ |
| विज्ञाता | विज्ञता | २ | १३ | २५ |
| भावि | भाय | २ | ६ | २५ |
| विप्पंति | धिप्पंति | २ | ७ | २७ |
| आणभंगा | आणभंगो | २ | ६ | ३१ |
| लब्धाणां | लब्धानां | २ | ६ | ३६ |
| मूढीत्वं | मूढत्वं | १ | ११ | ३९ |
| नात्यन्तताऽहित | नात्यन्ताऽहित | २ | ९ | ४१ |

| अशुद्धम्. | शुद्ध | पृष्ठ. | पंक्ति. | पानु |
|---|---|---|---|---|
| द्विधेया परि | द्विधेयापरि | २ | ४ | ४२ |
| याचतेति | याचते | १ | ८ | ४४ |
| ये निर्दिष्ट | ये अनिर्दिष्ट | १ | १ | ४५ |
| प्रत्यक्षकालस्या- | कालस्याप्रत्यक्षत्वे | १ | ३ | ४६ |
| रासा | राशा | २ | ४ | ४६ |
| इन्हाणदी | न्हाणादी | २ | ६ | ४९ |
| पूण्णा | पूण्णो | १ | १३ | ५३ |
| स्फटैव | स्फुटैव | १ | ६ | ५८ |
| मुच्यमानं | उच्यमानं | २ | ८ | ६३ |
| सयधण | सयणधण | १ | ४ | ६४ |
| आज्ञानिनां | अज्ञानिनां | १ | ७ | ६६ |
| मुद्रव्य | मुद्राव्य | १ | ७ | ६६ |
| दिशषु | देशेषु | २ | १० | ६८ |
| पूवं | पवं | २ | १२ | ६८ |

6.

For Private and Personal Use Only

| अशुद्धम् | शुद्धम् | पृष्ठ. | पंक्ति. | पानु |
|---|---|---|---|---|
| यक्ष्या | यक्षा | १ | ७ | ७३ |
| धारिणिश्च | धारिणश्च | १ | ३ | ७५ |
| वद्ध | वद्धे | १ | १९ | ७६ |
| घंटिता | घंटिका | २ | १३ | ७६ |
| साक्षकम् | साक्षिकम् | २ | १ | ७७ |
| मुणिवरो | मुणिपवरो | २ | १ | ८३ |
| दद्ढपुव्वो | दड्ढपुव्वो | १ | २ | ८४ |
| ग्रस्तै | ग्रस्तैनं | २ | २ | ८४ |
| नत्वशुद्ध | नन्वशुद्ध | १ | ७ | ८८ |
| अभिनिविष्टानामा- | अभिनिविष्टवन्तरा | १ | १ | ९२ |
| विकृतिजी | विकृतिर्जी | १ | २ | ९२ |
| निष्यमाण | नष्यमाण | १ | १० | ९२ |
| बने | वने | १ | ३ | ९३ |
| भाया | भीया | २ | ४ | ९४ |

| अशुद्धम् | शुद्धम् | पृष्ठ. | पंक्ति. | पानु |
|---|---|---|---|---|
| वंधेहिं | बन्धेहिं | २ | ११ | ९४ |
| तेऽवेति | तेऽति | २ | ४ | ९६ |
| न्निर्देशस्ये | न्निर्देशस्येति | २ | ५ | ९८ |
| आमेवघडे | आमे घडे | २ | १२ | ९८ |
| मेवामनु | मेवमनु | २ | १३ | ९८ |
| नाणकए | ताणकए | १ | ४ | ९९ |
| मथो | मथ | २ | ३ | १०० |
| दुज्ञेय | दुन्नेयं | २ | ३ | १०५ |
| मात् | यस्मात् | १ | १० | १०६ |
| व्यवतार | व्यवहार | १ | १२ | १०६ |
| ज | जं | २ | १ | ११० |
| सम्यक्त्वा रहित्यं | सम्यक्त्वराहित्यं | २ | १२ | ११३ |
| नुक्त्या | नुक्त्वा | १ | १ | ११५ |
| यदस्माच्छ्रा | यदस्मच्छ्रा | १ | ४ | ११५ |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ अथ षष्ठिशतकमूलगाथानां संस्कृतानुवादः ॥

अर्हन्देवः, सुगुरुः शुद्धं धर्मं, च पञ्चनमस्कारः । धन्यानां कृतार्थानां निरन्तरं वसन्ति हृदये ॥१॥ यदि न कुरुषे तपश्चरणं, न पठसि, न गुणयसि, ददासि नो दानं । तदा एतावन्न शक्नोषि यद्देव एकः अर्हन्नेव ॥ २ ॥ रे जीव ! भवदुःखानि एक एव हरति जिनमतः धर्मः । इतरान् प्रणमन् शुभ(सुख)कार्ये मूढ ! मुषितोऽसि ॥३॥ देवः दानवैश्च श्रुतः मरणात् रक्षितः कोऽपि । दृढीकृतजिनसम्यक्त्वाः बहवोऽपि अजरामरं प्राप्ताः ॥ ४ ॥ यथा कोऽपि वेश्यारक्तः मुष्यमाणोऽपि मन्यते हर्षम् । तथा मिथ्यात्ववेश्यामुषिताः गतमपि न मुणन्ति धर्मनिधिम्॥५॥ लोकप्रवाहे सकुलक्रमे यदि भवति मूढ ! धर्म इति । तदा म्लेच्छानामपि धर्मः स्थिता च अधर्मपरिपाटी ॥ ६ ॥ लोके राजनीतिः ज्ञातं न कुलक्रमे कदापि । किं पुनः त्रिलोकप्रभोः जिनेन्द्रधर्माधिराज्ये(कारे) ॥ ७ ॥ जिनवचन वेदिनामपि जीवानां यत् न भवति भवविरतिः । तत् कथं अविज्ञानां मिथ्यात्वहतानां पार्श्वे ॥ ८ ॥ विरतानां अविरतान् जीवान् दृष्ट्वा भवति मनस्तापः । हा हा कथं भवकूपे ब्रडन्तः पश्य नृत्यन्ति ॥ ९ ॥ आरम्भजे पापे जीवाः प्राप्नुवन्ति तीक्ष्णदुःखानि । यत् पुनः मिथ्यात्वलवं तेन न लभन्ते जिनबोधिम् ॥ १० ॥ जिनवराज्ञाभङ्गं उन्मार्गोत्सूत्रलेशदेशनजम् । आज्ञाभङ्गे पापं तस्मात् जिनमतः दुष्करः धर्मः ॥ ११ ॥ जिनवराज्ञारहितं वर्धयन्तोऽपि केऽपि जिनद्रव्यम् । ब्रुडन्ति भवसमुद्रे मूढाः मोहेन अज्ञानिनः ॥ १२ ॥ कुग्रहग्रहग्रहीतानां मुग्धः यः ददाति धर्मोपदेशम् । स चर्माशीकुक्कुरवदने क्षिपति कर्पूरम् ॥ १३ ॥ रोषोऽपि क्षमाकोषः सूत्रं भाषमाणस्य धन्यस्य उत्सूत्रेण क्षमापि च दोषः महामोह(स्य)आवासः ॥ १४ ॥ एकोऽपि न संदेहः यत् जिनधर्मेऽस्ति मोक्षसुखम् ।



For Private and Personal Use Only

तं पुनः दुर्विज्ञेयं अत्युत्कटपुण्यरहितानाम् ॥ १५ ॥ सर्वमपि विज्ञायते, लभ्यते तथा चतुरिमा जनमध्ये । एकमपि भ्रातः ! दुर्लभं जिनमतविधिरत्नसुविज्ञानम् ॥ १६ ॥ मिथ्यात्वबहुलतायां विशुद्धसम्यक्त्वकथनमपि दुर्लभम् । यथा वरनरवरचरितं पापनरेन्द्रस्य उदये ॥ १७ ॥ बहुगुणविद्यानिलयः उत्सूत्रभाषी तथापि मोक्तव्यः । यथा वरमणियुक्तोऽपि हु:(एव) विघ्नकरः विषधरः लोके ॥ १८ ॥ स्वजनानां व्यामोहेन लोका गृह्णन्ते अर्थलोभेन । नो गृह्णन्ते सुधर्मेण रम्येण हा (?) मोहमाहात्म्यम् ॥ १९ ॥ गृहव्यापारपरिश्रमखिन्नानां नराणां विश्रामस्थानम् । एकेषां भवति रमणी अन्येषां जिनेन्द्रवरधर्मः ॥२०॥ तुल्येऽपि उदरभरणे मूढामूढयोः प्रेक्षस्व विपाकम् । एकेषां नरकदुःखं अन्येषां शाश्वतं सुखम् ॥ २१॥ जिनमतकथाप्रबन्धः संवेगकरः जीवानां सर्वोऽपि । संवेगः सम्यक्त्वे, सम्यक्त्वं शुद्धदेशनया । तस्मात् जिनाज्ञापरेण धर्मः श्रोतव्यः सुगुरुपार्श्वे । अथ औचित्यातिक्रमेण श्राद्धात् तस्योपदेशकथकात् ॥ २२-२३ ॥ सा कथा स उपदेशः तज्ज्ञानं येन जानाति जीवः । सम्यक्त्वमिथ्यात्वभावं, गुर्वगुरुभावं, धर्मलोकस्थितिभावम् ॥ २४ ॥ जिनगुणरत्नमहानिधिं लब्ध्वापि किं न याति मिथ्यात्वम् । अथवा प्राप्तेऽपि निधाने कृपणानां पुनरपि दारिद्र्यम् । स जयति येन विहितानि सांवत्सरिकचातुर्मासिकसुपर्वाणि । निर्द्धंधसानां जायते येषां प्रभावतः धर्ममतिः ॥ २६ ॥ नामापि तस्य अशुभं येन निर्दिष्टानि मिथ्यात्वपर्वाणि । येषां अनुषङ्गात् धर्मिणामपि भवति पापमतिः ॥ २७ ॥ मध्यस्थितिः पुनरेषा अनुषङ्गेण भवन्ति गुणदोषाः । उत्कृष्टपुण्यपापाः अनुषङ्गेण न गृह्णन्ते ॥ २८ ॥ अतिशयप्रापितपापाः धार्मिकपर्वेषु तस्मात् अपि पापरताः । न चलन्ति शुद्धधर्मात् धन्याः केऽपि पापपर्वेषु ॥ २९ ॥ लक्ष्मीरपि भवति द्विविधा एका पुरुषाणां क्षपयति गुणर्द्धिम् । एका च उल्लसन्ती अपुण्यपुण्यानुभावात् ॥ ३० ॥ गुरवो भट्टाः जाताः श्राद्धान् स्तुत्वा लान्ति दानानि । द्वौ-अपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अमुणितसारौ दुष्षमसमायां ब्रुडतः ॥ ३१ ॥ मिथ्याप्रवाहे रक्तः लोकः, परमार्थज्ञायकः स्तोकः । गुरवः गौरवर-
सिकाः शुद्धं मार्गं निगूहन्ति ॥ ३२ ॥ सर्वोऽपि अर्हन् देवः सुगुरुः गुरुः भणति नाममात्रेण । तेषां स्वरूपं शुभदं
(सुखदं) पुण्यविहीनाः न जानन्ति ॥ ३३ ॥ शुद्धाः जिनाज्ञारताः केषाञ्चित्पापानां भवन्ति शिरःशूलम् । येषां
(पापानां)शुद्धाः ते शिरःशूलं केषाञ्चिन्मूढानां (पापाः) ते गुरवः ॥ ३४ ॥ हा हा गुरु अकार्यं स्वामी नैवास्ति
कस्य पूत्कुर्महे । कुत्र जिनवचनं कुत्र सुगुरुश्रावकाः कुत्र च अकार्यम् ॥३५॥ सर्पे दृष्टे नश्यति लोकः नैव कोऽपि
किञ्चिदपि आख्याति । यः त्यजति कुगुरुसर्पं हा मूढाः ? भणन्ति तं दुष्टम् ॥ ३६ ॥ सर्प एकं मरणं कुगुरु-
रनन्तानि ददाति मरणानि । तस्माद्वरं सर्पं गृहीतुं मां कुरुसेवनं भद्र ! ॥ ३७ ॥ जिनाज्ञां अपि त्यजन्तः गुरवः
भणित्वा यान् नम्यन्ते । तत्किं क्रियते लोकः छलितः गड्डरीप्रवाहेन ॥ ३८ ॥ निर्दाक्षिण्यः लोकः यदि कोऽपि
मार्गयते पूपलिकाखण्डम् । कुगुरूणां सङ्गत्यजने दाक्षिण्यं हि महामोहः ॥ ३९ ॥ किं भणामः किं कुर्मः तेषां हता-
शानां धृष्टदुष्टानाम् । ये दर्शयित्वा लिङ्गं क्षिपन्ति नरके मुग्धजनम् ॥ ४० ॥ कुगुरूनपि शंसामि अहं येषां
मोहादिचण्डिमानं दृष्ट्वा । सुगुरूणामुपरि भक्तिः अतिनिबिडा भवति भव्यानाम् ॥ ४१ ॥ यथा यथा त्रुट्यति-
धर्मः यथा यथा दुष्टानां भवति इह उदयः । सम्यग्दृष्टिजीवानां तथा तथोल्लसति सम्यक्त्वम् ॥ ४२ ॥ जगज्ज-
न्तुजननीतुल्यस्य अत्युदयः यन्न जिनमतस्य भवति । तत् क्लिष्टकालसम्भवजीवानामतिपापमाहात्म्यम् ॥ ४३ ॥
धर्मे यस्य मायामिथ्यात्वग्रहः उत्सूत्रस्य नो शङ्का । कुगुरूनपि करोति सुगुरून् विद्वानपि स पापपूर्ण इति ॥४४॥
कृत्यमपि धर्मकृत्यं पूजाप्रमुखं जिनेन्द्राज्ञया । भूतानुग्रहरहितं आज्ञाभङ्गात् दुःखदायि ॥ ४५ ॥ कष्टं कुर्वन्ति
आत्मानं दमयन्ति द्रव्यं जहति धर्मार्थिनः । एकं न त्यजन्ति उत्सूत्रविषलवं येन ब्रुडन्ति ॥ ४६ ॥ शुद्धविधिरा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गधर्मः वर्धते शुद्धानां सङ्गमे सुजनाः ? । सोऽपि च अशुद्धसङ्गे निपुणानामपि मलति अनुदिनम् ॥ ४७ ॥ तस्मात्तेषां सकाशे बलरहितः मा वसेः। यः सेवते शुद्धगुरून् अशुद्धलोकानां स महाशत्रुः ॥४८॥ समयविदः असमर्थाः, सुसमर्थाः यत्र जिनमतस्य अविदः । तत्र न वर्धते धर्मः, पराभवं लभते गुणरागी ॥ ४९ ॥ यत् न करोति अतिभावं उन्मार्गसेवी समर्थको धर्मे तल्लष्टं अथ कुर्यात् तर्हि पीडयति शुद्धधर्मार्थिनः ॥ ५० ॥ यदि सर्वश्रावकाणां एकत्वं यत्तु मिथ्यावादे । धर्मार्थिनां सुन्दर ! तर्हि कथं तु पराभवं कुर्यात् ॥ ५१ ॥ तत् जयति पुरुषरत्नं सुगुणाढ्यं हेमगिरिवरमहार्थम् । यस्याश्रये सेवते सुविधिरतः शुद्धजिनधर्मम् ॥ ५२ ॥ सुरतरुचिन्तामणयो अर्थं न लभन्ति तस्य पुरुषस्य । यः सुविधिरतजनानां धर्माधारं सदा ददाति ॥ ५३ ॥ लज्जन्ते जानाम्यहं सत्पुरुषाः निजकनामग्रहणेन । पुनस्तेषां कीर्तनात् अस्माकं गलन्ति पापानि ॥ ५४ ॥ आज्ञारहितं क्रोधादिसंयुतं आत्मशंसनार्थं च । धर्मं सेवमानानां न च कीर्तिः नैव धर्मश्च ॥ ५५ ॥ इतरजनशंसनया हृष्टा उत्सूत्रभाषणे न भयम् । हो ही तेषां नराणां दुःखानि यदि मुणति जिननाथः ॥ ५६ ॥ उत्सूत्रभाषकानां बोधिनाशः अनन्तसंसारः । प्राणात्ययेऽपि धीराः उत्सूत्रं तस्माद् न भाषन्ति ॥ ५७ ॥ मुग्धानां रञ्जनार्थं अविधिप्रशंसां कदापि न कुर्यात् । किं कुलवध्वः कुत्रापि स्तुवन्ति वेश्यानां चरित्रानि ॥ ५८ ॥ जिनाज्ञाभङ्गभयं भवशतभीतानां भवति जीवानां । भवशताऽभीरूणां जिनाज्ञाभञ्जनं क्रीडा ॥ ५९ ॥ कोऽश्रुतानां दोषो यत् श्रुतसहितानां चेतना नष्टा । धिग्धिक्कुकर्माणि यतः जिनोऽपि लब्धः अलब्धः इति ॥ ६० ॥ इतरेषामपि उपहासं तद्युक्तं भ्रात कुलप्रसूतानां । एष पुनः कोऽपि अग्निः यद् हास्यं शुद्धधर्मे ॥ ६१ ॥ द्वेषो जिनेन्द्रवचने सन्तोषो येषां मिथ्यात्वपापे । तेषामपि शुद्धहृदया परमहितं दातुमिच्छन्ति ॥ ६२ ॥ अथवा सरलस्वभावाः सुजनाः सर्वत्र भवन्ति अविक-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लपाः । छहैद्विषभराणामिव कुर्वन्ति करुणां द्विजिह्वानाम् ॥ ६३ ॥ गृहव्यापारविमुक्तः बहुमुनिलोकेऽपि नास्ति सम्यक्त्वं । आलम्बननिरतानां श्राद्धानां भ्रातः! किं भणामः ॥ ६४ ॥ न स्वयं न परं को वा यदि जीव उत्सूत्र-भाषणं विहितम् । तर्हि ब्रुडसि निभ्रान्तं निरर्थकं तपस्फटाटोपम् ॥ ६५ ॥ यथा यथा जिनेन्द्रवचनं सम्यक् परि-णमति शुद्धहृदयानाम् । तदा तदा लोकप्रवाहे धर्मे प्रतिभाति नटचरितम् ॥ ६६ ॥ येषां जिनेन्द्रो निवसति सम्यक् हृदये शुद्धज्ञानेन । तेषां तृणं च विराजति स मिथ्यात्वधर्मो जनः सकलः ॥ ६७ ॥ लोकप्रवाहसमीरणः उद्दण्डप्रचण्डचण्डलहर्या । दृढसम्यक्त्वमहाबलरहिता गुरुका विचलन्ति ॥ ६८ ॥ जिनमतलवहीलया यद्दुःखं प्राप्नुवन्ति अज्ञानी । ज्ञानिनां तत् स्मृत्वा भयेन हृदयं थरथरायते ॥ ६९ ॥ रे जीव ! अज्ञानिनां मिथ्या-दृष्टीनां पश्यसि किं दोषान् । आत्मानमपि किं न जानासि ज्ञायते कष्टेन सम्यक्त्वम् ॥ ७० ॥ मिथ्यात्वमाचरन्तोऽपि ये इह वाञ्छति शुद्धजिनधर्मम् ते ग्रस्ता अपि ज्वरेण भुक्तं इच्छन्ति क्षीरादिम् ॥ ७१ ॥ यथा काश्चित् सुकुलवध्वः शीलं मलिनयन्ति लान्ति कुलनाम । मिथ्यात्वमाचरन्तो-ऽपि वहन्ति तथा सुगुरुसत्कत्वम् ॥ ७२ ॥ उत्सूत्रमाचरन्तोऽपि स्थापयन्ति आत्मानं सुश्रावकत्वे । ते रौद्ररोरग्र-स्ता अपि तोलयन्ति सदृशं धनाढ्यैः ॥ ७३ ॥ केऽपि कुलक्रमे रक्ताः केऽपि रक्ताः शुद्धजिनवरमते । इति अन्तरे पश्यत मूढा न्यायं न जानन्ति ॥ ७४ ॥ सङ्गोऽपि येषां अहितः तेषां धर्मान् ये प्रकुर्वन्ति । मुक्त्वा चौर-सङ्गं कुर्वन्ति ते चोरिकां पापाः ॥ ७५ ॥ यत्र पशुमहिषलक्षाः पर्वणि हन्यन्ते पापनवम्यां । पूजयन्ति तमपि श्राद्धा हा हीला वीतरागस्य ॥ ७६ ॥ यो गृहकुटुम्बस्वामी सन् मिथ्यात्वरोपणं करोति । तेन सकलोऽपि वंशः प्रक्षिप्तो भवसमुद्रे ॥ ७७ ॥ कुण्डचतुर्थीनवमी द्वादश्यां पिण्डदानप्रमुखानि । मिथ्यात्वभावकानि कुर्वन्ति तेषां

१०

For Private and Personal Use Only

न सम्यक्त्वम् ॥ ७८ ॥ यथा अतिकुले क्षुब्धं शकटं कर्षन्ति केचित् धोरेयधवलाः । तथा मिथ्यात्वात् कुटुम्बम्, इह विरलाः केचित् कर्षन्ति ॥ ७९ ॥ यथा वार्द्दलेन सूर्यं महीतलप्रकटमपि नैव प्रेक्षन्ते । मिथ्यात्वस्य च उदये तथैव न पश्यन्ति जिनदेवम् ॥ ८० ॥ किं सोऽपि जननीजातो जातो जनन्याः किं गतो वृद्धिम्। यदि मिथ्यात्वरतो जातो गुणेषु तथा मात्सर्यं वहति ॥ ८१ ॥ वेश्यानां बन्दिकानां च ब्राह्मणडुम्बाणां यक्षशेषाणाम् । भक्ता भक्ष्यस्थानं विरतानां यान्ति दूरेण ॥ ८२ ॥ शुद्धे मार्गे जाताः सुखे न गच्छन्ति शुद्धमार्गे । यत्पुनरुन्मार्गजाता मार्गे गच्छन्ति तच्चोद्यम् ॥ ८३ ॥ मिथ्यात्वसेवकानां विघ्नशतान्यपि ब्रुवते नो पापाः । विघ्नलवे पतिते दृढधर्माणां प्रनृत्यन्ति ॥ ८४ ॥ सम्यक्त्वसंयुतानां विघ्नमपि तु भवति उत्सवसदृशः । परमुत्सवमपि मिथ्यात्वसंयुतं अतिमहाविघ्नम् ॥ ८५ ॥ इन्द्रोऽपि तान्प्रणमति हीलन्तो निजकऋद्धिविस्तारम् । मरणान्तेऽपि तु प्राप्ते सम्यक्त्वं ये न त्यजन्ति ॥ ८६ ॥ त्यजन्ति निजकजीवं तृणमिव मोक्षार्थिनो न पुनः सम्यक्त्वम् । लभ्यते पुनरपि जीवितं सम्यक्त्वं हारितं कुतः ॥ ८७ ॥ गतविभवा अपि सविभवाः सहिताः सम्यक्त्वरत्नरागेण । सम्यक्त्वरत्नरहिताः सन्तोऽपि धने दरिद्रत्वमिति ॥ ८८ ॥ जिनपूजनप्रस्तावे यदि कोऽपि श्राद्धानां दत्ते धनकोटिम् । मुक्त्वा तमसारं सारं विरचन्ति जिनपूजाम् ॥ ८९ ॥ तीर्थकराणां पूजा सम्यक्त्वगुणनां कारणं भणिता। साऽपि च मिथ्यात्वकरी जिनसमये देशिता अपूजा ॥ ९० ॥ जिनाज्ञया धर्मः आज्ञारहितानां स्फुटमधर्म इति । इति मुणित्वा च तत्त्वं जिनाज्ञया कुरुत धर्मम् ॥ ९१ ॥ यद्यद् जिनाज्ञायां तच्चैव मन्यते न मन्यते शेषम् । जानाति लोकप्रवाहे न तु तत्त्वं स च तत्त्ववित् ॥ ९२ ॥ स्वाधीने गुरुजोगे ये न तु निशृणवन्ति शुद्धधर्मार्थम् । ते धृष्टदुष्टचित्ता अथ सुभटा भवभयविहीनाः॥९३॥ शुद्धकुलधर्मजातापि गुणीनः न रमन्ते लान्ति जिनदीक्षाम् । ततोऽपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परमतत्त्वं ततोऽपि उपचारतो मोक्षम् ॥ ९४ ॥ वर्णयामि नारकान् येषां दुःखानि स्मरन्ताम् । भव्यानां जनयति हरिहर ऋद्धिसमृद्धिरपि उद्घोषम् ॥ ९५ ॥ श्रीधर्मदासगणिना रचितं उपदेशमालासिद्धान्तम् । सर्वेऽपि श्रमणश्राद्धा मन्यन्ते पठन्ति पाठयन्ति ॥ ९६ ॥ तं चैव केचिदधमाः छलिता अभिमानमोहभूतैः । क्रियया हीलयन्तो हा हा ! दुःखानि न गणयन्ति ॥ ९७ ॥ इतरेषां ठक्कुराणामपि आज्ञाभङ्गेन भवति मरणदुःखम् । किं पुनः त्रिलोकप्रभोः जिनेन्द्रदेवाधिदेवस्य ॥ जगद्गुरुजिनस्य वचनं सकलानां जीवानां भवति हितकरणम् । तस्मात् तस्य विराधनया कथं धर्मः कथं तु जीवदया ॥ ९९ ॥ क्रियायाः स्फटाटोपं अधिकं साधयन्ति आगमविहीनम् । मुग्धानां रञ्जनार्थं शुद्धानां हीलनार्थम् ॥ १०० ॥ यः ददाति शुद्धधर्मं स परमात्मा जगति न तु अन्यः । किं कल्पद्रुमसदृश इतरतरुर्भवति कदापि ॥ १०१ ॥ ये अमुणितगुणदोषौ ते कथं विबुधानां भवन्ति मध्यस्थाः । यदि तेऽपि तु मध्यस्थास्तर्हि विषामृतयोस्तुल्यत्वम् ॥ १०२ ॥ मूलं जिनेन्द्रदेवः तद्वचनं गुरुजनो महासुजनः । शेषं पापस्थानं परमात्मीयं च वर्जयामि ॥ १०३ ॥ अस्माकं रागरोषं कस्योपरि अत्र नास्ति गुरुविषये । जिनाज्ञारता गुरवो धर्मार्थं शेषान् व्युत्सृजामः ॥ १०४ ॥ नो आत्मीयाः परकीया वा गुरवः कदापि भवन्ति शुद्धानां । जिनवचनरत्नमण्डनमण्डिताः सर्वेऽपि ते सुगुरवः ॥ १०५ ॥ बलिं क्रियामहे सज्जनजनस्य सुविशुद्ध पुण्ययुक्तस्य । यस्य लघुसङ्गमेनापि विशुद्धबुद्धिः समुल्लसति ॥ १०६ ॥ अद्यापि गुरवो गुणिनः शुद्धा दृश्यन्ते तडतडाः केऽपि । प्रभुजिनवल्लभसदृशः पुनरपि जिनवल्लभश्चैव ॥ १०७ ॥ वचनेऽपि सुगुरुजिनवल्लभस्य केषां नोल्लसति सम्यक्त्वम् । अथ कथं दिनमणितेज उलूकानामपि हरति अन्धत्वम् ॥ १०८ ॥ त्रिभुवनजनं म्रियमाणं दृष्ट्वा पश्यन्ति ये नात्मानम् । विरमन्ति न पापात् धिक्धिक् धृष्टत्वं तेषाम् ॥ १०९ ॥ शोकेन क्रन्दित्वा कुट्टयित्वा शिरश्च उर-





For Private and Personal Use Only

उदरम् । आत्मानं क्षिपन्ति नरके धिक् धिक् तदपि कुस्नेहत्वम् ॥ ११० ॥ एकमपि च मरणदुःखं अन्यत् आत्माऽपि क्षिप्यते नरके । एकं च मालपतनं अन्यो लकुटेन शिरोघातः ॥ १११ ॥ सम्प्रति दुःषमकाले धर्मार्थिनः सुगुरवः श्रावका दुर्लभाः । नामगुरवः नामश्राद्धाः सरागद्वेषा बहवः सन्ति ॥ ११२ ॥ कथितोऽपि शुद्धधर्मः केषांश्चिदपि धन्यानां जनयत्यानन्दम् । मिथ्यात्वमोहितानां भवति रतिर्मिथ्याधर्मेषु ॥ ११३ ॥ एकमपि महादुःखं जिनसमयविदां शुद्धहृदयानाम् । यत् मूढाः पापानि धर्म भणित्वा सेवन्ते ॥ ११४ ॥ स्तोका महानुभावा ये जिनवचने रमन्ति संविग्नाः । ततो भवभयभीताः सम्यक्त्वं शक्त्या पालयन्ति ॥ ११५ ॥ सर्वाङ्गमपि तु शकटं यथा न चलति एकवडिहिलारहितम् । तथा धर्मस्फटाटोपः न चलति सम्यक्त्वपरिहीणः ॥ ११६ ॥ न मुणन्ति धर्मतत्त्वं शास्त्रे परमार्थगुणहितमहितम् । बालानां तेषामुपरि को रोषो मुणितधर्माणाम् ॥ ११७ ॥ आत्माऽपि येषां वैरी तेषां कथं भवति परजीवे करुणा । चौराणां बन्दिकानां च दृष्टान्तेन मुणितव्यम् ॥ ११८ ॥ ये राज्यधनादीनां कारणभूता भवन्ति व्यापाराः । तेऽपि तु अतिपापयुताः धन्याः छर्दयन्ति भवभीताः ॥ ११९ ॥ द्वितीयाश्च सत्वरहिताः धनस्वजनादिभिर्मोहिता लुब्धाः । सेवन्ते पापकर्म व्यापारे उदरभरणार्थं ॥ १२० ॥ तृतीया अधमानामधमाः कारणरहिता अज्ञानगर्वेण । ये जल्पन्ति उत्सूत्रं धिग्धिक् पाण्डित्यं तेषाम् ॥ १२१ ॥ यद्वीरजिनस्य जीवो मरीचिभवोत्सूत्रलेशदेशनतः । सागरकोटाकोटिं हिण्डति अति भीमभवगहने ॥ १२२ ॥ ततो ये इदमपि वचनं वारं वारं श्रुत्वा समये । द्वेषेणावगणय्य उत्सूत्रपदानि सेवन्ते ॥ १२३ ॥ तेषां कथं जिनधर्मः कथं ज्ञानं कथं दुःखानां वैराग्यम् । कूटाभिमानपाण्डित्यनटिता नरके ब्रुडन्ति ॥ १२४ ॥ मा मा जल्पत बहुकं ये बद्धाः चिक्कणैः कर्मभिः । सर्वेषां तेषां जायते हितोपदेशो महाद्वेषः ॥ १२५ ॥ हृदये

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनसि ये कुशुद्धाः ते किं बुद्ध्यन्ते शुद्धवचनैः । तस्मात् ज्ञानकृते गुणिनो निरर्थकं दमयन्ति आत्मानम् ॥१२६॥ दूरेकरणं दूरे प्रसाधनम् तथा प्रभावना दूरे । जिनधर्मश्रद्धानमपि तीक्ष्णदुःखानि निष्ठापयति ॥ १२७ ॥ कदा भविष्यति दिवसो यदाऽहं सुगुरुपादमूले । उत्सूत्रलेशविषलवरहितो निश्रृणोमि जिनधर्मम् ॥ १२८ ॥ दृशा अपि केऽपि गुरवो हृदये न रमन्ते मुणिततत्त्वानाम् । केऽपि पुनरदृष्टाश्चैव रमन्ते जिनवल्लभो यथा ॥ १२९ ॥ अयता अतिपापिष्ठाः शुद्धगुरुजिनवरेन्द्रतुल्या इति । य एवं इह मन्यते स विमुखः सर्वधर्मस्य ॥ १३० ॥ यं त्वं वन्दसे पूजयसि वचनं हीलयसि तस्य रागेण । तर्हि कथं वन्दसे पूजयसि जनवादस्थितिमपि न जानासि ॥१३१॥ लोकेऽपि इदं श्रुतं यं आराधयेत् तं न कोपयेत् । मानयेत् तस्य वचनं यदीच्छसि ईप्सितं कर्तुम् ॥१३२॥ दुःषमदण्डे लोके सुदुःखसिद्धे दुःखोदये । धन्यानां येषां न चलति सम्यक्त्वं तान् प्रणमामि ॥ १३३ ॥ निजमत्यनुसारेण व्यवहारनयेन समयनीत्या । कालक्षेत्रानुमानेन परीक्षितः ज्ञातः सुगुरुः ॥ १३४ ॥ तथापि तु निजजडतायाः कर्मगुरुत्वस्य नैव विश्वसिमि । धन्यानां कृतार्थानां शुद्धगुरुर्मिलति पुण्यैः ॥ १३५ ॥ अहं पुनरधन्यः ततो यदि प्राप्तश्चाथ न प्राप्तश्च । तत्रापि मम भवतु शरणं सम्प्रति यो युगप्रधानगुरुः ॥ १३६ ॥ जिनधर्मो दुर्ज्ञेयोऽतिशयज्ञानिभिर्ज्ञायते सम्यक्त्वम् । तथापि तु समयस्थित्या व्यवहारनयेन ज्ञातव्यम् ॥ १३७ ॥ यस्माज्जिनैर्भणितं श्रुतव्यवहारमपि शोधितं तस्य । जायते विशुद्धबोधिः जिनाज्ञाराधकत्वात् ॥ १३८ ॥ ये ये दृश्यन्ते गुरवः समयपरीक्षया ते न पूर्यन्ते । पुनरेकं श्रद्धानं दुःप्रसहो यावद्यं चरणम् ॥ १३९ ॥ तस्मादेको युगप्रवरो मध्यस्थमनोभिः समयदृष्ट्या । सम्यक्परीक्षणीयो मुक्त्वा प्रवाहहलबोलम् ॥ १४० ॥ सम्प्रति दशमाश्चर्यनामाचार्यैः जनितजनमोहाः । शुद्धधर्माद्निपुणा अपि चलन्ति बहुजनप्रवाहात् ॥ १४१ ॥ जानीत मिथ्यादृष्टीन् ये पतिता-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लम्बनानि गृह्णन्ति । ये पुनः सम्यग्दृष्टयः तेषां मनश्चटनपद्दिकायाम् ॥ १४२ ॥ सर्वमपि जगति सुलभं सुवर्णरत्नादिवस्तुविस्तारम् । नित्यं चैव मेलापं सुमार्गनिरतानामतिदुर्लभम् ॥ १४३ ॥ अभिमानविषोपशमनार्थकं च स्तूयन्ते देवगुरवश्च । तैरपि यतः मा नो हा हा तत्पूर्वदुश्चरितम् ॥ १४४ ॥ यो जिनाचरणया लोको न मिलति तस्याचारे । हा हा मूढ ! कुर्वन्नात्मानं कथं भणसि जिनप्रणतम् ॥ १४५ ॥ यदेव लोको मन्यते तदेव मन्यते सकललोका अपि । यन्मन्यते जिननाथः तदेव मन्यते केऽपि विरलाः ॥ १४६ ॥ साधर्मिकेभ्योऽधिको बन्धुसुतादिषु येषामनुरागः । तेषां न तु सम्यक्त्वं विज्ञेयं समयनीत्या॥ १४७ ॥ यदि जानासि जिननाथः लोकाचाराणां पक्षतो भूतः । तर्हि त्वं तं मन्यमानः कथं मन्यसे लोकाचारान् ॥ १४८ ॥ ये मानयित्वापि जिनेन्द्रं पुनरपि प्रणमन्ति इतरदेवान् । मिथ्यात्वसन्निपातग्रस्तानां तेषां को वैद्यः ॥ १४९ ॥ एको सुगुरुः एकेऽपि श्रावकाः चैत्यानि विविधानि । तत्र च यज्जिनद्रव्यं परस्परं तं न व्ययन्ते ॥ १५० ॥ ते न गुरवः न श्राद्धाः न पूजितो भवति तैर्जिननाथः । मूढानां मोहस्थितिः सा ज्ञायते समयनिपुणैः ॥ १५१ ॥ स न गुरुः युगप्रवरः यस्य च वचने वर्तते भेदः । चैत्यभवनश्राद्धकानां साधारणद्रव्यादीनाम् ॥ १५२ ॥ सम्प्रति प्रभुवचनेनापि यावन्नोल्लसति विधिविवेकत्वम् । तत् निबिडमोहमिथ्यात्वग्रन्थिता दुष्टमाहात्म्यम् ॥ १५३ ॥ बन्धनमरणभयानि दुःखानि तीक्ष्णानि नैव दुःखानि । दुःखानां दुःखनिधानं प्रभुवचनाशातनाकरणम् ॥१५४॥ प्रभुवचनविधिरहस्यं ज्ञात्वा यावद् दृश्यते आत्मा । तदा कुत्र सुश्रावकत्वं यच्चीर्णं धीरपुरुषैः ॥ १५५ ॥ यद्यपि तु उत्तमश्रावकपद्दिकायां चटनकरणासमर्थः । तथापि प्रभुवचनकरणे मनोरथो मम हृदये ॥ १५६ ॥ तस्मात् प्रभोः प्रणम्य चरणौ एकं प्रार्थयामि परमभावेन । त्वद्वचनरत्नग्रहणे मनोरथो मम भवेत् सदा ॥ १५७ ॥ इह मिथ्यावासनिकृष्टभावतो गलितगुरुविवेकानाम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अस्माकं कथं सुखानि सम्भाव्यन्ते स्वप्नेऽपि ॥ १५८ ॥ यावज्जीवितमात्रमपि तु धारयामि नाम च श्रावकाणामपि । तदपि प्रभो ! महाचोद्यं अतिविषमे दुःषमे काले ॥ १५९ ॥ परिभाव्य एवं तथा सुगुरो ! कुरु अस्माकं स्वामित्वम् । प्रभुसामग्रीसुयोगे यथा सफलं भवति मनुष्यत्वम् ॥ १६० ॥ एवं भाण्डागारिकनेमिचन्द्ररचिताः कियत्यपि गाथाः । विधिमार्गरताः भव्याः पठन्तु जानन्तु यान्तु शिवम् ॥ १६१ ॥

॥ इति संस्कृतानुवादः समाप्तः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री सत्यविजयजैनग्रन्थमाला नं. ६ ॥

॥ अर्हम् ॥

॥ जगत्पूज्य परमगुरुश्रीविजयनीतिसूरीश्वरपादपद्मेभ्यो नमः ॥

॥ परमार्हत श्रीनेमिचन्द्रभाण्डागारिकविरचितं महोपाध्यायश्रीगुणरत्नगणिसन्दृब्धवृत्तियुतम् ॥

# ॥ षष्ठिशतक प्रकरणम् ॥

॥ मङ्गलाचरणम् ॥

जयति श्रीऋषभजिनो, यन्नखचिन्तामणिप्रभाभिरिह ।
जगदुद्योते विहिते, सम्यग्मार्गः स्फुटो भवति ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीशान्तिः शीतकान्ति-र्वो मोहान्धतमस हरन्। चेतः कुवलयोल्लासं करोतु कमलाश्रयः ॥२॥
वर्द्धतां वर्द्धमानस्य, शासनं श्रीप्रकाशनम्। यदाश्रित्याङ्गिनोऽनेके शिवश्रीभोगमासदन् ॥३॥
जयन्ति गुरवो येषां गौः संशयः तृणावलीम्। ग्रसमाना मलं धर्म--क्षीरं दत्ते श्रीताङ्गिनाम् ॥४॥

इह हि पञ्चेन्द्रियत्वमनुजत्वार्यदेशसुकुलजन्मादिकां सद्धर्मसाधनसामग्रीमवाप्य विलसद्विवेकैर्ज्ञानदर्शनचारित्ररूपे मोक्षमार्गे प्रवर्त्तितव्यम्, तत्रापि ज्ञानचारित्रयोराधारभूते श्रीसम्यक्त्वे प्राक् प्रयतितव्यम्, तत्पूर्वकत्वात्सकलधर्माराधनफलस्य। यदाह--श्रीभद्रबाहुस्वामी श्रीआचाराङ्गनिर्युक्तौ--" तम्हा कम्माणीयं, जेतुमणोदंसणम्मि पयएज्जा। दंसणवतो हि सफलाणि, हुंति तवचरणनाणाणि ॥ १ ॥ " तच्च सुदेव--सुगुरु--सुधर्मेषु देवगुरुधर्मबुद्धिरूपं यदाह--" या देवे देवताबुद्धि--र्गुरौ च गुरुतामतिः। धर्मे च धर्मधीः शुद्धा, सम्यक्त्वमिदमुच्यते ॥ २ ॥ तत्त्वार्थश्रद्धानरूपं वा, ' तत्तत्थसद्दहाणं सम्मत्तमसग्गहो न एयम्मी'ति वचनात्, तदिदमाकलय्य सद्यशोधवलितब्रह्माण्डभाण्डो भाण्डागारिकनेमिचन्द्रो निस्तन्द्रया धिया देवगुरुधर्मतत्त्वजिज्ञासार्थं प्राक् तदुपदेष्टृगीतार्थसंविग्नगुरुपरीक्षां चिकीर्षुर्नगरग्रामाकरपुरादिष्ववतुच्छनानागच्छवासिश्रमणानीक्षमाणश्चिरं परिभ्रम्य तत्कालवर्त्तिसंविग्नगीतार्थमुनिजनाग्रण्यं मिथ्यात्वभीतजनशरण्यं अगण्यपुण्यपण्यं चिन्तार्थदानसुरतरुं श्रीजिनपतिसूरिसुगुरुं समासादितवान्। तदाप्तौ च स्वयं निश्चितदेवगुरुधर्मतत्त्वो दृढीभूतसम्यक्त्वो ज्ञातसन्मार्गो सन्मार्गभेदः कृतमिथ्याभिनिवेशविच्छेदः परांश्च देवादितत्त्वेषु द्रढयन् कदाग्रहविषसुधायमानं षष्ठ्यधिकगाथाशतमानं प्रकरणमिदं चकार। तत्र च मङ्गलाभिधे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यसम्बन्धप्रयोजनसूचिकामाद्यगाथामाह—

मूलम्—अरहं देवो सुगुरू सुद्धं धम्मं च पंचनवकारो ।
धन्नाण कयत्थाणं निरंतरं वसइ हिययम्मि ॥ १ ॥

व्याख्या—इह चाविघ्नेन शास्त्रपरिसमाप्तये मङ्गलमाचरणीयम् । तत्रापि द्रव्यमङ्गलस्यानैकान्तिकत्वादनात्यन्तिकत्वाच्च शास्त्रादावनुपादेयत्वं भावमङ्गलस्यैकान्तिकत्वादात्यन्तिकत्वाच्चोपादेयत्वं तच्चाहिंसादि, तदुक्तम्--'धम्मो मंगलमुक्किट्ठं अहिंसा संजमो तवो ' इति, एवं चास्यानेकविधत्वेऽप्यान्तरतपोभेदस्वाध्यायरूपस्यार्हदाद्यभिधानभणनस्यात्र विशेषेणोपादेयत्वम्, अर्हदादीनां मङ्गलत्वलोकोत्तमत्वशरण्यत्वाभिधानाच्च । यदाह--' चत्तारि मंगलमित्यादि' अर्हन्नामग्रहणस्याप्यापदुद्धरणक्षमत्वाच्च । तदुक्तं–" आस्तामचिन्त्यमहिमा जिन ? संस्तवस्ते, नामाऽपि पाति भवतो भवतो जगन्ति । तीव्रातपोपहतपान्थजनान् निदाघे, प्रीणाति पद्मसरसः सरसोऽनिलोऽपि ॥ ४ ॥ " इति अर्हत्पदेन तदनन्तरं तदुक्तमार्गप्ररूपकसुगुरुपदेशेन च मङ्गलोपन्यासः, शुद्धधर्मपदेनाभिधेयोपन्यासः, यतोऽत्र ग्रन्थेऽभिनिवेशत्यागेनैव शुद्धे धर्मे प्रयतितव्यमित्यैवार्थतोऽभिधास्यतीति शुद्धधर्मस्यैवाभिधेयता । सम्बन्धस्तु ज्ञाप्यज्ञापकलक्षणः, यथा शुद्धो धर्मो ज्ञाप्यः शास्त्रमिदं ज्ञापकं सम्बन्धान्तरं वा सुधिया स्वधियाऽभ्यूह्यम् । प्रयोजनं च द्विविधमनन्तरं परम्परञ्च,तदपि प्रत्येकं द्विविधम्, कर्त्तुः श्रोतुश्च । तत्र कर्त्तुरनन्तरं शुद्धधर्मज्ञापनेन परोपकारः,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रोतुस्तत्परिज्ञानं, परम्परं द्वयोरप्यपवर्गप्राप्तिरिति । प्रस्तुतग्रन्थप्रतिपाद्यदेवगुरुधर्मरूपसम्यक्त्वस्वरूपाभिधानेऽपि तदन्तर्भूतपञ्चनमस्कारपदोपादानं चात्र पृथक् सुगुरुसमीपोपात्तसम्यक्त्वेनानुदिनं पञ्चपरमेष्ठिस्मरणा कर्त्तव्येतिनियमसूचकम् । तदुक्तं--" संपुन्नं च्चिय (चेइ) वंदण दो वारा उ करेमि छम्मासं । अट्ठसयं परमिट्ठीण सायरं तह गुणिस्सामि ॥ ५ ॥ " ' जा जीवं चउवीस'मित्यादि अथवा चत्वार्यपि पदानि मङ्गलरूपाणि अभिधेयप्रतिपादकान्यपि चेति मङ्गलाद्यभिधायाथान्वयघटना । अर्हद्देवादयो धन्यानां कृतार्थानां हृदये निरन्तरं वसन्तीति सम्बन्धः । तत्र वंदारुवृन्दारकवृन्दविरचिताशोकाद्यष्टमहाप्रतिहार्यरूपां पूजामर्हतीत्यर्हन्, यदाह--" अरहंति वंदणनमं-सणाणि अरहंति पूयसक्कारं । सिद्धिगमणं च अरहा अरहंता तेण वुच्चंति ॥ ६ ॥ " अथवा अविद्यमानं रह एकान्तो यस्य करकुट्याद्यप्रतिघाति केवलज्ञानावलोकिता शेषजगद्भावत्वात् स अरहाः, अथवा अविद्यमानो रथः सकलपरिग्रहोपलक्षणभूतो यस्य सोऽरथः । अरहन् वा क्वापि स्वजनादौ सङ्गमगच्छन् । अथवा रहत्यागेऽस्य धातोः प्रयोगो नञ्पूर्वकः । रागादिहेतुभूतमनोज्ञेतरविषयसम्पर्केऽपि वीतरागत्वादिकं स्वं स्वभावमत्यजन् अरहन्, तथा दीव्यति विलसति परमानन्दपद इति देवः देव इत्युक्ते सामान्येन हरिहरादयोऽपि लोकोक्त्या देवाः स्युः, तद्व्यवच्छेदायार्हन्नित्यसाधारणं विशेषणम्, तस्यैव सर्वदोषरहितत्वेन सर्वदेवविशिष्टत्वात् । तथा गृह्णाति धर्मशास्त्रार्थमिति गुरुः, सुष्ठु शोभनो गुरुर्ज्ञानादिगुणगणोपेततया सच्छास्त्रोपदेशकतया चागौरवार्हो गुरुः सुगुरुः । स च संविग्नो गीतार्थश्च धर्माचार्यः यतस्तादृशस्यैव योगो निर्वाणसुखहेतुसम्यक्त्वसाधकः । तदुक्तम्--" जायइ सुहगुरुजोगो, सहसा सिवलच्छि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिच्छयाण धुवं । पावंति जं अधन्ना न कयाइ, मणिच्छियं अमयं ॥ ७ ॥ " ' तथा सुद्धं धम्मंति ' धारयति दुर्गतिप्रसृतान् जन्तूनिति धर्मः, यथोक्तम्–" दुर्गतिप्रसृतान् जन्तून् यस्माद्धारयते तथा । धत्ते चैतान् शुभे स्थाने तस्माद्धर्म्म इति स्मृतः ॥ ८ ॥" स च लोकरूढ्या द्रव्यधर्मोऽपि भवति तद्व्यवच्छेदाय आह--शुद्धमिति हिंसादिमलकलङ्कविगमाच्छुद्धो निर्मलस्त्रिकोटीदोषवर्जितत्वाद्वा शुद्धः । इह च ' सुद्धं धम्म'मिति प्रथमार्थे द्वितीया, यथा ' चउवीसं पि जिणवर'इत्यत्र चकारः समुच्चये, तथा 'पंच नमुक्कारो'त्ति पंचानां परमेष्ठिनां नमस्कारः पञ्चनमस्कारः शाकपार्थिवादिदर्शनान्मध्यमपदलोपी समासः । स च धन्यानां पुण्यवतां कृतार्थानां कृतो ग्रन्थिभेदलक्षणोऽर्थो यैस्ते कृतार्थास्तेषां नत्वकृतग्रन्थिभेदानां हृदयेऽर्हदादयो वसन्ति, निरन्तरं निर्व्यवधानं मिथ्यात्वपटलव्यवधाननिरसनेन वसति निवासं करोति हृदये चेतसि, अयं भावः । धन्यानां कृतार्थानां हृदये निरन्तरमर्हन् देवो वसति, सुगुर्वादिपदैरपि प्रत्येकं क्रिया सम्बन्धनीया । अमुमेवार्थं संवादयितुं श्रीसुभद्रादृष्टान्तः प्रतन्यते तथाहि–" श्रेयो बीजानि जायन्ते, विनैव जडसङ्गमम् । यत्रानन्तफलान्यस्ति तत्क्षेत्रं भरताभिधम् ॥ १ ॥ तत्रोत्तुङ्गजिनागार--प्राकारपरिवारितम् । सुधाकरकरश्वेत--हर्म्यनिर्मितकौतुकम् ॥ २ ॥ घनाश्रयं निराकुर्वद् घनाश्रयमपि स्वयम् । कलाभृतां च सूराणा- मनेकेषामवस्थितः ॥ ३ ॥ सौराज्यसम्पदाभिः स्वः–पुरं स्वाभिर्विलङ्घयत् । वसन्तपुरमित्यस्ति, पत्तनं पत्तनोत्तमम् ॥ ४ ॥ यत्र रूपगुणै रामाः, कामिनां चित्तकुञ्जरान् । तथा बध्नन्ति नान्यत्र, यथाऽमी गन्तुमीश्वराः ॥ ५ ॥

१ हिंसा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जितशत्रुरिति ख्यात—स्तत्राभूदवनीश्वरः । य ईश्वर इवाहीन-विभूतिभरभासुरः ॥ ६ ॥ यः प्राप्तार्थप्रापकत्वा-दवि-
संवादिबोधतः । प्रमाणभूतः सर्वेषां, शुभानुभवसाधनः ॥ ७ ॥ यत्करस्य समुद्रत्वं, युक्तमेव श्रियां निधेः । यतोऽ-
तिभीषणोद्दण्ड-तरवारि भृदेव सः ॥ ८ ॥ शोषयामास यो वैरि-वर्गपङ्कनिजैः करैः । प्रतापी व्याप्नुवन्नाशा-स्तेजसा
भानुमानिव ॥ ९ ॥ औदार्यधैर्यगाम्भीर्य-गुणानामेकशेवधिः । तन्मान्यो जिनदत्ताख्यः, श्रेष्ठी श्रेष्ठतमो जनैः ॥१०॥
जीवाजीवादितत्त्वानां यथावदवबोधतः । सेन्द्रैरपि सुरैर्द्धर्म्माच्छक्यश्चालयितुं न यः । ११ । यच्चित्तचम्पकारामे, च-
ञ्चरीकायते चिरम् । सुसाधुजनसङ्गस्य, सेवाहेवाक एव हि ॥ १२ ॥ शुश्रूषते गुरुगिरं, विकथां न कदापि यः । ज्ञा-
तास्वादोऽमृतं मुक्त्वा, तैलं किं कोऽपि वाञ्छति ॥ १३ ॥ जिनार्चनेन यः स्वीयं, शयमाशयमप्यथ । विशुद्धं कुरुते
चन्द्रो भासेव रजनीमुखम् ॥ १४ ॥ भाग्यसौभाग्यलावण्य-पुण्यनैपुण्यशालिनी । सतामानन्दिनी तस्या-ऽऽसीत्सुभद्रेति
नन्दिनी ॥ १५ ॥ कुलक्रमागतश्रीम--दर्हद्धर्मानुरागतः । मिथ्यात्वमोहनीयस्य क्षयोपशमतोऽपि च ॥ १६ ॥ साध्वी-
नामुपदेशाच्च, या बाल्यादपि निश्चलम् । सम्यक्त्वं पालयामास, व्रतेष्वत्यन्तसादरा ॥ १७ ॥ युग्मम् । शृणोति पठति
ध्याय-त्यागमार्थाननेकशः । साधुसाध्वीजनात्तेन जज्ञे धर्ममयी च या ॥ १८ ॥ क्रमात्सा प्राप तारुण्यं, नैपुण्यं सुकृ-
तेष्विव । यत्सङ्गमेण तद्गात्रं, पात्रमासीन्मनोभुवः ॥ १९ ॥ तथाहि—कबरीभारोमारोद्यमविधाप्यभूत् । श्यामात्मनां
च वक्राणां, स्वभावो यदि वा ह्ययम् ॥ २० ॥ प्रापितस्तन्मुखेनेन्दुः, शारदीनोऽपि दीनताम् । द्विजाधीशो द्विज-

१. निधि २. बद्धकेशसमूह ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वामी सेवेत नाकलङ्किना ॥ २१ ॥ अपाङ्गक्षेपचतुरे तन्नेत्रे शफरोपमाम् । दधतुः पुण्यलावण्य–वारिधौ चटुलत्वतः ॥ २२ ॥ प्रवालदलसच्छायो रेजे तदधरोऽधिकम् । जज्ञे स्फुटो बहिः कामा–नुरागोऽन्तरमानवा ॥ २३ ॥ त्रिरेखोऽपि जगत्येकां, रेखां सम्प्राप तद्गलः । जगन्मल्लस्य कामस्य, यात्रायां कम्बुतां व्रजन् ॥ २४ ॥ तद्वक्षस्तुङ्गवक्षोजं, बभौ श्लक्ष्णोत्तरोच्छदम् । शयनीयं स्मरस्येव स्फुरद्गण्डोपधानकम् ॥ २५ ॥ तस्याभुजयुगं दीर्घं, सुकुमारतरं दधौ । स्मरद्विपस्य हस्तत्वं, विवेकद्रुमभञ्जिनः ॥ २६ ॥ रोमावली तदुदरे नीलकान्तिर्व्यरोचत । सन्न्यस्तीमदनेनेव कृपाणलतिका निजा ॥ २७ ॥ नितम्बफलकं तस्या–गुरुकं समदृश्यत । लावण्यनिर्झरस्येव विपुलं पुलिनं ह्रदः ॥ २८॥ मुष्टिग्राह्येण मध्येन, तन्वी सा तर्जयत्पविम् । दर्शनादपि यन्मोहं, सृजेदेषा न चेतरा ॥ २९ ॥ श्रीनन्दननरेन्द्रस्य पुण्यतारुण्यवेश्मनः । तदूर्वोर्युगलं चारु स्तम्भयुग्ममिवाभवत् ॥ ३० ॥ सरले च सुवृत्ते च,तज्जङ्घे विदुषामपि । अभूतां वृत्तभेदिन्यौ को वा स्वसमतासहः ॥ ३१ ॥ रक्तोत्पलश्रियं हृत्वा चरणौ यावकारुणौ । तस्या आस्तां ततस्तानि, मग्नानीवाशु लज्जया ॥ ३२ ॥ सर्वाङ्गसुभगा साऽथ, तडिल्लेखेव भासुरा । प्रार्थनीयाऽभवद्यूनां, मुनीनामिव निर्वृतिः ॥ ३३॥ वरणाय वरास्तस्या अनेकेऽपि समागमन् । महर्द्धिकाः सुरूपाश्च, दमयन्त्या नृपा इव ॥ ३४ ॥ असाधर्मिकसम्बन्धो, मिथ्यात्वानर्थकारणम् । अश्रावकाय नो दास्ये, ततोऽहं निजनन्दिनीम् ॥ ३५ ॥ इत्थं निश्चित्य तेभ्यः सो, श्रावकेभ्यो ददौ न ताम् । विवेकिनो हि मुह्यन्ति, न क्वाप्युचितकर्मणि ॥ ३६ ॥ इतश्चाङ्गाख्यया देशो, दुःप्रवेशोऽस्ति वैरिणाम् । रतिप्रियः कलाकेलि–यत्रानङ्गसमो जनः ॥ ३७ ॥ तत्रास्ति नगरी चम्पा, निःकम्पावरवेश्मभिः । यद्वप्रो वि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्लुतां धत्ते पादे गङ्गां नदीं दधत् ॥ ३८ ॥ वासुपूज्यजिनेन्द्रस्य या कल्याणकपञ्चकैः । अतिशेतेऽन्यनगरी, सम्पदा-भिर्गरीयसी ॥ ३९ ॥ यन्नागराश्च नागाश्च, समाना एव रेजिरे । लसद्दानेन हस्तेन सदालिप्रीतिदायिनः ॥ ४० ॥ या प्रपारामकासार-विहाराट्टालभूषिता । कस्य नानन्दयेच्चेतः साळङ्कारेव कामिनी ॥ ४१ ॥ तस्यां यथार्थनामाऽभू द्बुद्धदासाभिधो वणिक् । युवा सुरूपः कुशलः, कलाकेलिरिवापरः ॥ ४२ ॥ साऽन्यदार्थार्जिनायागा-द्वसन्तपुरपत्तने । वाणिज्यमेव वणिजां, श्रियः, प्रथमकारणम् ॥ ४३ ॥ स तत्र तिष्ठन् भाण्डानां, क्रयविक्रयहेतवे । ददर्शान्येद्युरायातीं, सुभद्रां भद्रगामिनीम् ॥ ४४ ॥ दध्यौ च किं सुरस्त्र्येषा, किंवा विद्याधराङ्गना । रतिरेवाथवा काम-वियुक्तेयमुपस्थिता ॥ ४५ ॥ ततः पार्श्वचरं लोकं, सोऽपृच्छदिति विस्मितः । कैषा कस्य सुता तन्वी, कुमारी वेषभूषिता ॥ ४६ ॥ श्राद्धस्य जिनदत्तस्य, जिनेन्द्रगुणरागिणः । सुभद्रेति सुतैषेति तमूचुः पार्श्ववर्त्तिनः ॥ ४७ ॥ स श्रावकं विनाऽन्यस्मै, नैनां दित्सति जातुचित् । सम्प्राप्तयौवनाऽप्येषा, तेनाद्यापि कुमारिका ॥ ४८ ॥ तदाकर्ण्य स सञ्जात-तत्पाणिग्रहणाग्रहः । कपटश्रावको जज्ञे बुद्धदासोऽतिबुद्धिमान् ॥ ४९ ॥ शृण्वतः सुगुरूपान्ते, माययाऽपि जिनागमम् । तस्य भाग्यात्सुदुर्भेद्यः कर्मग्रन्थिर्व्यलीयत ॥ ५० ॥ जाततत्त्वमतिः सोऽथ, भावतः श्रावकोऽजनि । सुसाधुजनसंसर्गात्तत्किं भद्रं भवेन्न यत् ॥ ५१ ॥ विज्ञाय जिनदत्तोऽपि, भावश्रावकतां गतम् । बुद्धदासं ददौ तस्मै, कन्यां कन्याभिलाषिणे ॥५२॥ स्वकुलस्यानुरूपेण महसा महसां निधिः । उपयेमे ततश्चैतां सुभद्रां स शुभेऽहनि ॥ ५३ ॥ भुञ्जानयोस्तयोर्भोगा-श्चिरं तत्रैव तस्थुषोः । अनेहा व्यतिचक्रामा-ऽतिघनः क्षणमात्रवत् ॥ ५४ ॥ सुभद्रासहितोऽन्येद्यु-र्भाण्डान्यादाय भूरिशः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वपुरीं बुद्धदासोऽगा-दापृच्छय जिनदत्तकम्॥५५॥स वधूसहितस्तत्र, स्वजनैरभिनन्दितः। तस्थौ स्वस्थमनाः सौव-परिवारविराजितः ॥ ५६ ॥ सुभद्रा तत्र तिष्ठन्ती, सम्यक्त्वे कृतनिश्चयाः । वीतरागात् परं देवं, मनसाऽपि ननाम न ॥ ५७ ॥ गुरुत्वेन मुनीनेव, सार्हतान् प्रत्यपद्यत । न धर्मं श्रद्दधे चान्यं, विना केवलिभाषितम् ॥ ५८ ॥ तत्कुटुम्बं च बौद्धानां, (बुद्धेषु) भक्तं मुक्तिपराङ्मुखम् । स्वधर्मे प्रेरयन्तान्तं, ज्ञाततत्त्वा न चाकरोत् ॥ ५९ ॥ द्वेष्याऽथ साऽभवत्तेषां, सुशीलापि कुटुम्बिनाम् । चन्द्रोद्योतो हि चौराणां, कदापि न सुखायते ॥ ६० ॥ पृथग्गृहे स्थापयत्तां तद्भर्त्ता श्राविकोत्तमाम् । बिभ्यत्कलहतः प्रायः, शुद्धाः सङ्क्लेशभीरवः ॥ ६१ ॥ तस्यास्तत्रापि तिष्ठन्त्याः, श्वश्रूश्छिद्राण्यमार्गयत् । न मनः शान्ततां गच्छेत्, कदाचिद् दृष्टिरागिणाम् ॥ ६२ ॥ तथाऽपि नाचलत्सा तु, स्वकीयाद्धर्म्मकर्मणः । चण्डाभिरपि वात्याभिः किं चलेन्मेरुचूलिका ॥ ६३ ॥ भक्तिसम्भ्रमसम्पन्ना, साधून् साध्वीश्च सा सदा । प्रासुकैरेषणीयैश्च, प्रायोग्यैः प्रत्यलाभयत् ॥ ६४ ॥ निर्गच्छतः प्रविशतस्तत्रा-लोक्य मुनीन् क्रुधा । बुद्धदासं तदम्बोचे रक्तासितपटेष्वसौ ॥ ६५ ॥ न स प्रत्येति तद्वाक्यं, विदंस्तच्छीलसौष्ठवम् । ज्ञानिनो नैव मुह्यन्ति, मोहो ह्यज्ञानचेष्टितम् ॥ ६६ ॥ विशालनयनः स्मेर-कुशेशयसमाननः । सुकुमारतनुस्ताम्र-करो दीर्घोच्चनासिकः ॥ ६७ ॥ सुरूपः सुभगाकारो, विकारपरिवर्जितः । ( निर्दोषपरमाणूनां समूह इव चाक्षुषः ॥ ) उत्कीर्ण इव चन्द्रस्य, मण्ड-

---

१. कमल.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लान्नेत्रनन्दनः ॥ ६८ ॥ क्षमाभृदपि[1] निष्कूटः ससत्योऽपि न मारसूः[2] । ब्रह्मचार्यपि नो तार–कारिः कान्तोऽप्यका-[3]
न्तकः ॥६९॥ महात्मा जिनकल्पैको–नीरागो निःस्पृहोऽन्यदा । गृहाद्गृहं परिभ्राम्यन् भिक्षायै तद्गृहेऽविशत् ॥७०
॥ कुलकम् । मूर्तं धर्ममिवैनं सा कल्पद्रुममिव जङ्गमम् । निजाङ्गणागतं साधुं, दृष्ट्वा हृष्टा स्वचेतसि ॥ ७१ ॥ सा समुत्थाय
सप्ताष्टौ पदान्यभिमुखं गता । ववन्दे तं च सद्भक्ति–भारेणेव नमच्छिराः ॥ ७२ ॥ प्रासुकैरसनाद्यैश्च, तं मुनिं प्रत्य-
लाभयत् । पात्रदाने हि कस्य स्या–न्न त्वरा सुकृतार्थिनः ॥ ७३ ॥ प्रतिलाभयमाना सा, मुनिनेत्रं जलप्लुतम् । दृष्ट्वा
सम्यग्निरैक्षिष्ट–तत्त्वार्थमिव शुद्धधीः ॥ ७४ ॥ वातोद्भूतं तृणं तत्र पतितं वीक्ष्य चेतसि । दध्यौ सा हि निरीहोऽ-
यं महात्मा स्वतनावपि ॥ ७५ ॥ स्वयं निःप्रतिकर्मत्वा–न्नैतद्देषोऽपनेष्यति । सति चास्मिन् दृशो दोषो महान् स-
म्भाव्यते खलु ॥ ७६ ॥ निष्काशयामि चेत्साधो--र्दृश एतदहं तदा । निःसारयामि संसार चारकास्त्वं विनिश्चितम्
॥ ७७ ॥ प्रतिलाभयमानैव ध्यात्वेति मुनिमस्तकम् ॥ गृहीत्वा करयुग्मेन लब्धलक्षतया क्षणात् ॥ ७८ ॥ दुर्निष्कास्यं
विदित्वा तद् वस्त्रप्रान्तादिभिस्तृणम् । जिह्वाग्रेणातिमृदुना–ऽपानयत्सा महासती ॥ ७९ ॥ सञ्चक्राम च तन्मूर्ध्नि–

१ क्षमाभृदपि पर्वतोऽपि निष्कूटः शिखररहितः यः क्षमाभृत् स निष्कूटो न भवति यः निष्कूटः स क्षमा-
भृत् न भवति इति अत्र विरोधः । अथ समाधिः क्षमाभृदपि राजाऽपि निष्कूटः कपटेन रहितो वर्त्तते इ-
त्यर्थः ॥ २. सत्यभामासहितोऽपि न मारसूः कृष्णः पूर्ववत् ,किन्तु सत्येन सह वर्त्तमानोऽपि न मारसूः काम-
जनकः ब्रह्मचार्यपि नो तारकारेः स्वामिकार्त्तिकः पूर्ववत् किंतु ब्रह्मचार्यपि तारकस्य गुरोः अहीरिपुर्नो वर्त्तते ॥
३. कान्तोऽपि मनाज्ञेऽप्येकान्तकः स्त्रीरहितः पूर्ववत्, किन्तु कान्तोऽप्यकान्तकः दुःखनाशकः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्तिलकः साधुमूर्द्धनि । प्रस्वेदक्लिन्नगात्रत्वा–दादर्श इव निर्मले ॥ ८० ॥ तया न ददृशे सोऽथ कार्यान्तर ( विक्षिप्तया ) विहस्तया । मुनिरप्यक्षताचार–स्तद्गृहान्निरगात्तदा ॥ ८१ ॥ निर्गच्छतो मुनेस्तस्य भाले तिलकसङ्क्रमम् । दृष्ट्वा हृष्टा सुभद्रायाः श्वश्रूर्दुष्टा स्वचेतसि ॥८२ ॥ छिद्रेषु छलयन्त्येव खला दुर्मन्त्रसङ्गताः । सद्रूपानपि निर्मतून् शाकिन्य इव दुर्धियः ॥ ८३ ॥श्यामात्मनां द्विजिह्वानां शश्वत्कुटिलगामिनाम् । व्यालानां च खलानां च छिद्रान्वेषण एव धीः ॥ ८४ ॥ पश्याऽर्हत्याः स्वभार्यायाश्चरित्रमिति वादिनी । तद्भर्त्रे दर्शयामास सङ्क्रान्ततिलकं मुनिम् ॥ ८५ ॥ मदुक्तं त्वममन्वानो मन्यमानः सतीमिमाम् । कुलटां कुलमालिन्य-हेतुर्जातोऽसि वत्सक ?॥ ८६ ॥ दुराचारा सदैवेय-मेवमेव करोति हि। त्वं तथाऽप्यनुरक्तोऽस्यां धिक् ते पण्डितमानिनाम् ॥ ८७॥ इति निर्भर्त्सितो गाढं मात्रा परिजनेन च। अर्हद्धर्मे दधच्छ्रद्धां सोऽपि तावदचिन्तयत् ॥ ८८ ॥ सम्भवेदपि तादृश्याः किं कर्मेदृगसुन्दरम् । नहि सम्भाव्यते क्वापि चन्द्रादङ्गारवर्षणम् ॥ ८९ ॥ बलवानिन्द्रियग्राम-श्चपलः पवनादपि । दुष्टाश्च इव दुर्दान्तः कं कं वा नोत्पथं नयेत् ॥ ९०॥ विवेकदीपस्योद्योत-स्तावद् हृदि स्फुरेन्नृणाम् । यावदिन्द्रियवात्याभिश्चञ्चलाभिर्न हन्यते ॥ ९१ ॥ चिन्तयित्वेति तस्यां स मन्दस्नेहोऽभवत्क्रमात् । खलवाग्भस्मसंयोगि-निःस्नेहं कुरुते न कम् ॥ ९२ ॥ तं वृत्तान्तं सुभद्राऽथ ज्ञात्वा विज्ञा कथञ्चन । निनिन्द खलसंसर्गं प्राग् दुष्कर्म पुरस्कृतम् ॥९३ ॥ अचिन्तयच्च धिगप-भ्राजना शासनेऽजनि । सुधाकरकरस्वच्छे मत्तोऽस्मिन् श्रीमदर्हताम् ॥ ९४ ॥ तदिमां न निराकुर्वे यद्यहं निजशीलतः । तदेतत्प्रत्ययो दोषः सर्वोऽप्येष ममैव हि ॥ ९५ ॥ निराचिकीर्षुः श्रीजैन-धर्मापभ्राजनां ततः । कृतस्नाना शुचिः साऽभू-द्द्रव्यतो भावतो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽपि च ॥ ९६ ॥ उद्दिश्य शासनसुरीं प्रतिमायाः पुरोऽर्हतः । स्मरन्ती हृदये पञ्च-परमेष्ठिनमस्क्रियां ॥ ९७ ॥ निशा-
यामेकताना सा शासनोन्नतिहेतवे । कायोत्सर्गं चकारोपसर्गवर्गेऽपि निश्चला ॥ ९८ ॥युग्मम् ॥ चक्रे यावत्तया कायो-
त्सर्गस्तावदुपेयुषी । सा शासनसुरी किं वा दुर्लभं पुण्यशालिनाम् ॥ ९९ ॥ साधर्मिके शुद्धशीले किमर्थोऽयमुपक्रमः
। यदीप्सितं तदाख्याहि देवतोवाचतामिति ॥ १०० ॥ साऽप्यभ्यधात्ततो देवि ! शृणु शासनदेवते ? नाहं भोगार्थि-
नी नापि धनपुत्रसुखार्थिनी ॥ १०१ ॥ किन्त्वपभ्राजना चक्रे शासने श्रीमदर्हताम् । मम श्वश्रूप्रभृति-
भि–र्मिथ्यादोषप्रकाशनात् ॥ १०२ ॥ सा तु सम्यक्त्वरत्नस्य मालिन्याय जिनैर्मता । तां निवर्तयितुं देवि ?
तन्ममैष उपक्रमः ॥ १०३ ॥ तदुपायं तथाऽऽख्याहि यथापभ्राजनाऽसौ । निवर्त्ततेऽर्हद्धर्मस्यो–न्नतिः स्यान्महती जने
॥ १०४ ॥ इत्थं तदुक्तमाकर्ण्य प्रोचे शासनदेवता । वत्से ? त्वं माऽधृतिं कार्षीः सिद्धमेव तवेप्सितम् ॥ १०५ ॥ ए
वमाश्वास्य तां प्राह--पुनः सोपायमद्भुतम् । प्रगे पुरप्रतोलीना--महं कर्त्ताऽस्मि बन्धनम् ॥ १०६ नभःस्था कथयि-
ष्यामि व्याकुले च पुरीजने । चालिन्या कूपतः कृष्टे-नोदकेन यदा सती ॥ १०७ ॥ काचिदाछोटयेद् द्वारं सम्पू-
र्णैश्चलुकैस्त्रिभिः । भविष्यति तदोद्घाटं नान्यथेति सुनिश्चितम् ॥ १०८ ॥ ततोऽनेन विधानेन त्वं द्वाराणि महास-
ति ? । उद्घाटयेर्यथा वर्णः स्यात्तेऽर्हच्छासनस्य च ॥ १०९ ॥ इत्याख्याय तिरोभूता सा सुरी कान्तिभासुरा । प्रातः
पुर्याः प्रतोल्यश्च नोद्घटन्ते कथञ्चन ॥ ११० ॥ केऽपि निर्गन्तुमिच्छन्तः प्रवेष्टुं केऽपि चापरे । न शेकुः स्वेप्सितं क-
र्तुं, द्वाःस्थेनेव निवारिताः ॥ १११ ॥ धेन्वाद्याः पशवः सर्वे, प्रतोलीः प्राप्य तादृशीः । चक्रंदुरतिदीनास्याः प्रक्षिप्ता

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इव वाटके ॥ ११२ ॥ उदकानि तथैधांसि नाहर्तुं कोऽप्यभूत्प्रभुः । परचक्रनिरुद्धेव नगरी साऽभवत्त तदा ॥ ११३ ॥ मिलितोऽतिघनो लोकः, कौतुकेन भयेन वा । पुरीद्वारेषु कार्यार्थी चतुर्ष्वपि समाकुलः ॥ ११४ ॥ कश्चित्त कुठारैरा-हन्ति, कोऽपि हन्ति घनैर्घनैः । कपाटानि पुरस्तस्या नोद्घाटानि तु जज्ञिरे ॥ ११५ ॥ ततो विज्ञापयांचक्रु–र्नागरा नगराधिपम् । नाथाद्य नगरीद्वारा–ण्युद्घटंते, न सर्वथा ॥ ११६ ॥ तद्देव कुपितः कोऽपि देवो वा दानवोऽथवा । अरौत्सीन्नगरीद्वारा–ण्येककालकृतान्तवत् ॥ ११७ ॥ तं प्रसादयितुं स्वामि--न्नर्हसि त्वं प्रसीद तत् । कुरूपाय-मुपायज्ञा यद्भवन्ति महीभुजः ॥ ११८ ॥ ततः स नागरो राजा स्नात्वार्द्रपटशाटकः । धूपाद्युद्ग्राहयमास स द्वारेषु चतुर्ष्वपि ॥ ११९ ॥ तदान्तरिक्षमास्थायो -वाच सा देवता नृप ? । यथोद्घाटानि जायन्ते कपाटानि तथा शृणु ॥ १२० ॥ कूपादाकृष्य चालिन्या पानीयं चुलुकैस्त्रिभिः । चेदाहन्ति सती कापि द्वारांमुत्कलता तदा ॥ १२१ ॥ आक-र्ण्येति सुरीवाक्यं,पटहं पृथिवीपति । अवीवदत् तदा पुर्यां परिज्ञातुं महासतीं॥१२२॥या काऽप्यस्ति सती शुद्धा मनो-वाक्तनुभिः किल । सा स्वशीलप्रभावेण पुरी मोचयतादतः॥१२३॥सङ्कटाद्विकटादित्थं पटहेन समन्वितम् ।उद्घोषणां सु-भद्रा तां प्रतिश्रुत्य न्यवारयत्॥ १२४॥युग्मम् ॥वादकः पटहस्याथ गत्वा राज्ञः पुरोऽवदत् । भार्यया बुद्धदासस्य पटहोऽयं निवारितः॥१२५॥ तां राजाऽऽनाययामास सादरं निजसेवकैः । प्रोवाच चैनां भगिनि! पुरी मोचय कष्टतः ॥ १२६॥ ततः पञ्चनमस्कारं ध्यात्वा नत्वाऽर्हतः पदौ । गुरून् धर्मं च सार्वज्ञं दधती हृदि हारवत् ॥ १२७ ॥ नेपथ्येनातिशु-द्धेन व्यञ्जयन्ती विशुद्धताम् । छादयतीव सर्वाङ्गं श्वश्रूदोषमिवोच्छ्रितम् ॥ १२८ ॥ नेत्राभ्यां निर्विकाराभ्यां पश्यन्ती

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलां भुवम् । अभ्यस्यन्तीव तत्पार्श्वात् सर्वं सद्गुणं खलु ॥ १२९ ॥ राज्ञा सपरिवारेण नागरैश्च सविस्मयैः । अनु-
याता सुरस्रोत-स्विनीव धवलच्छदैः ॥ १३० ॥ सम्यक्त्व इव निःशङ्का स्वचरित्रे सुनिर्मले । कूपोपान्तं समीयाय वै-
वर्ण्यं क्वाप्यबिभ्रती ॥ १३१ ॥ पंचभिः कुलकम् ॥ मनोवाक्तनुभिः शुद्धं शीलं चेन्मम वर्त्तते। तदा निर्गच्छतादम्भ-
श्चालिन्या, द्वाररोधभित् ॥ १३२ ॥ इत्युक्त्वा चालिनीं बध्वा केवलैरेव तन्तुभिः । आचकर्ष जलं कूपा-दन्तः प्रक्षिप्त-
या तया ॥ १३३ ॥ सच्छिद्राया अपि ह्यस्याः पूर्णाया अपि वारिणा । नागलद्विन्दुरेकोऽपि वारां वज्रघटादिव ॥
१३४ ॥ सन्तः सन्त्यपि छिद्राणि मुद्रितानीव कुर्वते । परेषामिति सा चक्रे निश्छिद्रामिव चालिनीम् ॥ १३५ ॥
यच्छिद्रशतयुक्तायां चालिन्यां निश्चलं जलम् । शीललीलायितं तन्न कस्य कौतुकहेतवे ॥ १३६ ॥ या न रक्षति सारं
सा चालिन्यवगुणाश्रया । यया चक्रे रसाधारा अहो ! उत्तम चेष्टितम् ॥१३७॥ चालिन्या दधती शुद्धं, नीरं नीरन्ध्र-
येव सा । स्वशीलमिव मूर्त्तं प्राक् प्रतोलीं समुपस्थिता ॥ १३८ ॥ तां त्रिराच्छोटयामास चालिनीस्थितवारिणा ।
सोद्घाटाऽजनि तत्काल-माहतेव घनैर्घनैः ॥ १३९ ॥ अहो सत्त्वमहोसत्त्व-महोशीलमनिन्दितम् । अहो धैर्यैक-
तानत्व-महो चरित मुज्ज्वलम् ॥ १४० ॥ अमुष्याः श्रीसुभद्रायाः यत्पानीयप्रहारतः । उज्जघटे कपाटं द्राक्, दुरुद्घाटं
परस्वधैः ॥ १४१ ॥ इति स्तुवन्तः सर्वेऽपि, नागरा भूभुजा सह । विस्मयं दधिरे चित्ते पुरोद्घाटेन दर्शनात् ॥१४२॥
प्रतोलीद्वितयं भूय--स्ततोऽन्यदुद्घाटयन् । सा तद्वदेव चक्षुश्च कुटुम्बस्यान्तरं सती ॥ १४३ ॥ मत्तुल्यान्यपि
या काचित् शीलेन चरितेन वा । वर्त्तते भाविनी वाऽथ सैनामुद्घाटयेत्सती ॥ १४४ ॥ इत्युदित्वा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतोलीं वानुद्घाटचैव चतुर्थिकाम् । एकान्तशुद्धसम्यक्त्वा–गृहानभिन्यवर्त्तत ॥ १४९ ॥ युग्मम् ॥ ततः करिवरस्कन्ध–मारोप्य पृथिवीभुजा । गर्जति स्फुर्जदाश्चर्यं तूर्याद्यातोद्यसञ्चये ॥ १४६ ॥ कुर्वत्सु बंदिवृन्देषु विष्वग्ज-यजयारवम् । उच्छ्रितासु पताकासु प्रत्यट्टं प्रति मन्दिरम् ॥ १४७ ॥ रणन्नूपुरपण्यस्त्री–नृत्येषु प्रसरत्सु च । दिशो दिशि प्रसर्पत्सु नागरेषु च कौतुकात् ॥ १४८ ॥ त्यक्त्वाऽन्यबहुकार्याभि--र्नारीभिश्च निरीक्षिता । साञ्जं खं विदधा-नाभि--र्मुखैर्वातायनोत्थितैः ॥१४९॥ अनयोद्योतितं जैनशासनं शुद्धशीलया । साधर्मिकैरिति श्लाघ्य--माना सम्यक्त्व-शालिभिः ॥ १५० सैषा महासती याति यया कृच्छ्रादमोच्यत । पुरीयमित्यङ्गुलीभि--र्दर्श्यमाना मिथोऽर्भकैः ॥ १५१ ॥ ददाना दीनदुःस्थेभ्यो--ऽनाथेभ्यश्च यथेप्सितम् । स्तूयमानाध्यक्षदृष्ट--महिम्ना दुर्जनैरपि ॥ १५२ ॥ मनोऽभिनवधर्माणा--मर्हद्धर्म्मे महीस्पृशाम् । कुर्वती निश्चलं सौव--चारित्रेणातिचारुणा ॥ १५३ ॥ अनीयत निजं धाम दृष्टा श्वश्र्वा विलक्षया । लज्जमानेन भर्त्रा च स्तूयमाना पुरैर्जनैः ॥ १५४ ॥ नवभिः कुलकम् । अहो धन्यमिदं जैनं शासनं यत्र योषिताम् । अपि निश्चलता धर्मे तत्त्वातत्त्वविवेचनात् ॥१५५॥ आपदम्भोधिनिस्तारे तरी कल्पाऽजनिष्ट यत् । असौ तज्जिनधर्म्मस्य माहात्म्यं महदद्भुतम् ॥ १५६ ॥ इति ब्रुवाणः सर्वोऽपि तस्यां पुरि तदा जनः । चक्रे श्रीजिनधर्मस्य वर्णं हेतुं शिवश्रियः ॥ १५७ ॥ श्वाशुरं तत्कुलं तस्या-स्तादृशीं शीलसम्पदम् । दृष्ट्वा विस्मितमापेदे प्रशान्तं मोहशान्तताम् ॥ १५८ ॥ प्रपेदे दर्शनं शुद्धं तेन सर्वेण तद्गिरा । किं किं कस्तूरिकायोगोऽथ-वा सुरभयेन्नहि ॥ १५९ ॥ श्वश्रूश्च क्षमयामास निजं दुश्चेष्टितं तदा । वचोभिर्मधुरैर्गोत्र--देवतामिव तां वधूम् ॥१६०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अज्ञानतो यदस्माभिः कल्याणि ? तव भाषितम् । धर्मद्वेषेण तत्सर्वं सहस्व त्वं क्षमानिधे ? ॥१६१॥ धन्यं ते जीवितं धन्यं जन्मधन्यं च कर्म ते । या त्वमस्मद्वचोभिर्ना--त्याक्षीद्धर्म्मं जिनोदितम् ॥ १६२ ॥ नास्मद्गृहे भविष्यस्त्वं चेच्चिन्तामणिसन्निभा । तदा मिथ्यात्वदारिद्र्य--मगमिष्यत्कथं क्षयम् ॥ १६३ ॥ त्वया निस्तारितं सर्वं कुटुम्बं यद्भवोदधेः । नान्यस्त्वदपरस्तस्मा--दुपकार्यस्ति कोऽपि नः ॥ १६४ ॥ त्वया विभूषितं भद्रे ? कुलं तावदिदं हि नः । इत्थं श्वश्रूस्तदाऽप्रीता स्तवीत्तां च मुहुर्मुहुः ॥ १६५ ॥ भर्त्राऽपि क्षमिता साऽथ, शुभे त्वमवधीरिता । मिथ्यापवादभीतेन मया तत्त्वं सहस्व मे ॥ १६६ ॥ राजाऽपि सपरीवारस्--तन्माहात्म्यचमत्कृतः । प्रपेदे शुद्धसम्यक्त्वं को वा सत्ये, न रज्यते ॥ १६७ ॥ नागराश्च तदा केऽपि सम्यक्त्वं प्रतिपेदिरे । मार्गाभिमुखता मन्ये तन्निश्चयविलोकनात् ॥ १६८ ॥ सा गृहस्वामिनी चक्रे, कुटुम्बेन ततोऽनु च । सुखेनागमयत्कालं कुर्वती धर्ममार्हतम् ॥ १६९ ॥ सङ्कटेऽपि सुभद्रासी--दर्हदादिषु भक्तिभाक् । तथा यथाऽस्याः सान्निध्यं, देवताऽप्यकरोन्मुदा ॥ १७० ॥ इत्थं सुभद्राचरितं विचित्रं श्रुत्वाऽर्हतः संयमिनो गुरूंश्च । धर्मं जिनोक्तं परमेष्ठिनां च नमस्कृतिं धत्त सदा स्वचित्ते ॥ १७१ ॥ इति सुभद्राचरितम् ॥

ततश्चार्हत्पूजा गुरुशुश्रूषा धर्मप्रतिपत्तिः पञ्चपरमेष्ठिस्मृतिः साकल्येन कर्त्तव्येत्यर्थः ॥ ननु निरन्तरमर्हद्ध्यानादिकं कर्त्तव्यतयोक्तं--तच्च विषयव्यासक्तैस्तत्तादृक् सामग्र्यभावात् तथाविधक्षयोपशमाद्यभावाच्च सामस्त्येन कर्त्तुं न शक्यते इत्याशङ्क्य दुष्करकृत्यनिरासेन सुकरकृत्योपदेशेन चोत्साहयन्नाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्——जइ न कुणसि तव चरणं, न पढसि न गुणेसि देसि नो दाणं।
ता इत्तियं न सक्कसि, जं देवो इक्क अरहंतो ॥ २ ॥

व्याख्या–यदीत्यभ्युपगमे, स च सर्वत्र सम्बध्यते, 'न कुणसि'त्ति न कुरुषेऽकृञः कुण इति सूत्रेण वा कुणादेशः किं तदित्याह–'तव चरणंति' तपः प्रधानं चरणं तपश्चरणं तत्र तपो द्वादशभेदभिन्नं प्रतीतमेव, चरणं चारित्रं तत्पुनर्द्विभेदं सर्वदेशभेदेन सर्वचारित्रं पुनः पञ्चधा, तद्यथा–" सामाइयत्थ पढमं छेओवट्ठावणं भवे बीयं। परिहारविसुद्धीयं सुहमं तह संपरायं च ॥ १ ॥ तत्तो य अहक्खायं खायं सव्वंमि जीवलोयम्मि। जं चरिऊण सुविहिया वच्चंति अयरामरं ठाणं ॥ ५ ॥ ति, देशचारित्रं त्वनेकविधं, प्रतिपत्तॄणामनेकविधत्वात्, तदुक्तं–" दुविहा अट्ठविहा खलु, बत्तीसविहा च सत्त पणतीसा। सोलसयसहस्साभवे, अट्ठसयट्ठुत्तरावइणो ॥ ९ ॥ " इति श्रुतोपधानादिरूपं वा तपस्तस्य चरणं करणं तपश्चरणं तस्य दुरनुष्ठेयत्वात्करणाशक्यत्वम्, तथा न पठसि श्रीसर्वज्ञोपदिष्टं त्रिशिष्टसंवेगादिजनकं श्रुतप्रकरणादि नाधीषे, यतः–पठनमप्यालस्यादिदोषदूषितानां न सम्भवति, तदुक्तं–" नानुयोग-

---

१ व्रतं नियमविशेषः तद्विद्यते येषां ते व्रतिनः श्रावका इत्यर्थः, ते द्विधा. वक्ष्यमाणयुक्त्या द्विप्रकाराः, अथवा अष्टविधा अथवा द्वात्रिंशद्भेदाः, अथवा सप्तशतानि पञ्चत्रिंसदधिकानि अथवा षोडशसहस्रा अष्टौ शतान्यष्टोत्तराणि व्रतिनो भवन्ति ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वता न च प्रवसता, मानं न चोत्कर्षता, नालस्योपहतेन नान्यमनसा नाचार्यविद्वेषिणा । न भ्रूभङ्गकटाक्षसुन्दरमुखीं सीमन्तिनीं ध्यायता, लोके ख्यातिकरः सतां बहुमतो विद्यागुणः प्राप्यते ॥ १० ॥ " विनयादिगुणगणोपेतस्य च पठनं सम्पद्यते-" [1]विणओणएहिं पंजलि-उडेहिं छंदमणुयत्तमाणेहिं । आराहिओ गुरुजणो सुयं बहुविहं लहुं देइ ॥ ११ ॥ " ततः कृच्छ्रसाध्यं पठनमिति यदि न पठसि तथा यदि न गुणयसि, निद्राविकथादुर्ध्यानकुतूहलादिना पूर्वाधीतं श्रुतप्रकरणादि न परावर्तयसि, यतस्तद्गुणनमपि मनोवाक्कायनिरोधकत्वाद्दुःकरं, तथा ददासि वितरसि यदि नो निषेधे दानं देयवस्तु दानदेययोरभेदोपचारात् नहि दानं येन तेन वा दातुं शक्यते, यतः-" अभिमुखागतमार्गणधोरिणि, ध्वनितपल्लविताम्बरगह्वरे । वितरणे चरणे च समुद्यते, भवति कोऽपि परं विरलः पुमान् ॥१२॥ ' ता तदा इत्तियं 'ति एतावन्न शक्नोषि कर्तुमिति गम्यते क्वचित्तकि इत्तियंति पाठः तत्र तद्देशीभाषया तत्किमिति व्याख्येयम, शेषं च तथैव किं तदित्याह-जं देव इति, यद्देवं एकोऽद्वितीयो देवान्तरव्यवच्छेदेन ' अरहंतोत्ति ' सर्वस्य वाक्यस्य सावधारणार्थत्वात् अर्हन्नेव ममाराध्य इति गम्यम, अर्हत्पदोपादानं चेहोपलक्षणपरं ज्ञेयम, तेन गुर्वन्तरव्यवच्छेदेन सुगुरुरेवैको ममाराध्यः । धर्मान्तरपरित्या-

---

१ विनयोऽभिवन्दनादिलक्षणस्तेन अवनता विनयावनताः तैरित्थम्भूतैः सद्भिः तथा पृच्छादिषु कृताः प्राञ्जलयो यैस्ते कृतप्राञ्जलयः तैः तथा छन्दोगुर्वभिप्रायः तं सूत्रोक्तश्रद्धानसमर्थनकरणकारणादिना अनुवर्तयद्भिः आराधितो गुरुजनः श्रुतं सूत्रार्थोभयरूपं बहुविधमनेकप्रकारं लघु शीघ्रं ददाति प्रयच्छति गाथार्थः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गेन जैनधर्म एवैकश्वेति सुगुरुसुधर्माराधनाविनाभावित्वादर्हदाराधनस्येति, अर्हन्नित्यभिदधता च पूजातिशयादिचतुरतिशयसम्पन्नस्यैव देवस्य मोक्षहेतुताऽऽवेदिता । ततश्चायमभिप्रायः, यदि तपश्चरणादिकं तथाविधेन्द्रियार्थैकबद्धमतित्वेन न शक्नोषि कर्त्तुं तथापि श्रीश्रेणिकादेरिवार्हन्नेव देवः, सुगुरुरेव गुरुः, जिनप्रणीत एव च धर्मस्तत्त्वमिति श्रद्धानमात्रमिन्द्रियार्थाविरोधि किं न शक्नोषीत्यर्थः ॥२॥ ननु यदि तपश्चरणाद्यक्षमता तदाऽर्हद्देवादितत्त्वं प्रतिपत्तव्यमित्युपदिष्टं प्राक् तदसङ्गतम्, यतः–सर्वेऽपि कमपि देवं गुरुं धर्मं च प्रतिपन्नाः सन्ति तदाराधन एव तेषामभिलषितार्थसिद्धिर्भविष्यतीत्याशङ्क्य स्वप्रतिबोधव्याजेन परं प्रत्याह—

मूलम्—रे जीव ? भवदुहाइं, इक्कं चिय हरइ जिणमयं धम्मं ।
इयराणं पणमंतो सुहकज्जे मूढ ? मुसिओ सि ॥ ३ ॥

व्याख्या—रे इति सम्भाषणेऽव्ययं, जीव आत्मन् भवदुःखानि संसाराशर्माणि जन्मजरामरणादीनि, इक्कंचिय'त्ति एक एव केवल एव हरति स्फेटयति जिनमतो वीतरागप्रणीतो धर्मः, उपलक्षणत्वात्तत्प्रणेता देवस्तदुपदेष्टा च गुरुः, इहापि द्वितीया प्रथमार्थे द्रष्टव्या, जिनोदितस्यैव धर्मस्य सर्वदुःखनिवारकत्वात् यदुक्तं-"जयति घनकर्मबन्धन-विमोचनक्षमनिरूपितोपायम् । जिनवचनं निर्जितशेष-वचनगुणलब्धिसिद्धिसुखम् ॥ १३ ॥ तथा-" मुक्त्यर्थमत्यर्थमुपैति सेवां, देवान्तराणां किमुत ब्रवीमि । संसारकारान्धगृहाज्जनोऽयं, विमोक्ष्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते त्वद्वचसैव देव ? ॥ १४ ॥ ततश्च ' इयराणंति ' क्वचिद्द्वितीयादेरित्यनेन द्वितीयास्थाने षष्ठीनिर्देशात् इतरान् देवविशेषान् वीतरागव्यतिरिक्तान् प्रणमन् तान् प्रति प्रह्वीभवन् उपलक्षणत्वादितरगुरून् प्रणमन् कुधर्मान्तराणि च कुर्वन् शुभकार्ये पुण्यार्थं सुखकार्ये वा सुखार्थं मूढ मुग्धबुद्धे मुषितोऽसि । यतस्तत्प्रणाममान्मिथ्यात्वनिदानात् प्रत्युत पुण्यस्य तत्कार्यस्य वा सुखस्यापचय एव पापस्य तत्कार्यस्य वा दुःखस्योपचयो भवति, तदुक्तं-" प्रागेव दुष्कर्मकिंयन्नमूढैरुपार्जितं नाथ ! पुनर्यदेषाम् । देवान्तरोपासनया प्ररूढं बभूव तन्नाम नृणामृणार्णम् ॥ १५ ॥ तेषां चेतरदेवानां सन्मार्गस्खलितत्वेन स्वयं दुःस्थत्वात् तदुक्तं तद्भक्तैरेव-" ब्रह्मा लूनशिरा हरिर्दृशि सरुक्, व्यालुप्तशिस्नो हरः । सूर्योऽप्युल्लिखितोऽनलोऽप्यखिलभुक्, सोमः कलङ्काङ्कितः । स्वर्नाथोऽपि विसंस्थुलः खलु वपुः संस्थैरुपस्थैः कृतः, सन्मार्गस्खलनाद्भवन्ति विपदः प्रायः प्रभूणामपि ॥ १६ ॥ " इति स्वयं दुःस्था कथमन्यान् स्वस्थीकर्तुं प्रभवन्ति, ततश्च यथा कश्चिद्रत्नाद्यर्थी केनचिद्दाम्भिकेन सङ्गतिं कुर्वन् मुष्यते । तद्वदयमपि जीवो देवान्तरसङ्गत्या विद्यमानस्यापि शुभस्य नाशनेन मुष्यत इति भावः ॥ ३ ॥ प्राग्जिनधर्मस्य भवदुःखनायकत्वमितरदेवसेवायाश्चाशुभस्यासुखस्य वा हेतुत्वमुक्तमिदानीं तदेव स्पष्टयन्नाह—

मूलम्—देवेहिं दाणवेहिय सुओमरणाओ रक्खिओ कोइ ।

दढकयजिणसमत्ता, बहु यवि अजरामरं पत्ता ॥ ४ ॥



For Private and Personal Use Only

व्याख्या-देवेत्ति अथवा ननु सत्यं जिनमतधर्माद् भवदुःखविमोक्षः, इतरप्रणामे च मुषितत्वं प्रतिपादितं, परं देवान्तराणामपि विश्वरक्षाक्षमत्वं श्रूयते-“ प्रकृतीनां यथा राजा, रक्षार्थमिह चोद्यतः । तथा विश्वस्य विश्वात्मा, स जागर्त्ति महेश्वरः ॥ १६ ॥ ” इत्यादिवचनेन ततश्चैते आराधिता मरणादिभयेभ्यो रक्षन्तीत्यतस्तेऽपि प्रणम्यंते एवेत्यत आह-‘ देवेही’त्यादि देवैः सुरैर्दानवैश्चासुरैः श्रुत आकर्णितः, उपलक्षणत्वादस्य दृष्टो वा मरणात् प्राणत्यागलक्षणात् रक्षितो निवारितः कोऽपि कश्चिदपि, अपि तु न कश्चिद्रक्षित इति भावः, यदवादि वाचकैः-“ कौतुकैर्मङ्गलैर्योगै-र्विद्यामन्त्रैस्तथौषधैः । न शक्ता मरणात्त्रातुं सेन्द्रा देवगणा अपि ॥ १७ ॥ ” एतदर्थानुपात्यैवात्र लौकिको दृष्टान्त उपन्यस्यते, तथाहि—“ क्षितिप्रतिष्ठितं नाम पुरासीत् पुरमुत्तमम् । क्षितेः प्रतिष्ठा येना--भूज्जित्वरेणालका श्रियः ॥ १ ॥ तत्राऽऽसीदरिविध्वंसी सुनासीरपराक्रमः । अरिमर्दनभूपालः सम्यक्पालयिता भुवः ॥ २ ॥ श्रेष्ठी कोऽप्यभवत्तत्र श्रेष्ठो यो नगरेऽपि हि । राजमान्यश्च सर्वेषा-मग्रणीर्वणिजामपि ॥ ३ ॥ यद्गृहे स्वर्णकोटीना-मियत्तां कोऽपि नाकरोत् । किं तारा गणयेत्कश्चित् दृश्यमाना अपि स्फुटम् ॥ ४ ॥ न तद्रत्नं नयत्तस्य भाण्डागारेऽम्बुधाविव । [ यदि वेह जने किन्तु ] विद्यते यदि वा किन्तु दुष्प्रापं व्यवसायिनाम् ॥ ५ ॥ रूप्याणां नहि कोऽप्याप पारं तद्यशसामिव । उपार्ज्जितानां तेनैव स्वयंकृतसुकर्मणा ॥ ६ ॥ धनदोऽपि धनं तस्य पश्यन्निव हिया बहु । अशिश्राय किलैकान्तं कैलासशिखरं वरम् ॥ ७ ॥ मरुस्थलीषु चेत्क्वापि, वालुकां मिनुयात् पुमान् । तदा तत्सञ्चितायाः स्यात्पर्यंतो धान्यसन्ततेः ॥ ८ ॥ न स देशो न स ग्रामो नहि तत्पत्तनं पुनः । न यत्र तद्वणिक्पुत्राः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्ति सूर्यकरा इव ॥ ९ ॥ गवामनडुहामश्व- तराणां च तथार्वताम । नाज्ञायि सङ्ख्या तद्गेहे सद्देहे सुधियामिव ॥ १० ॥ अनुकूलगिरो भृत्या दास्यश्चाज्ञापरायणाः । तस्याभूवन्न नूनर्द्धे-भूरयो भक्तिभासुराः ॥ ११ ॥ विनीता सरलाश्चारु रूपा भूपात्मजा इव । जज्ञिरे तनयास्तस्य बहवो नयशालिनः ॥ १२ ॥ सुरूपा स्मरकान्तेव कान्ता तस्य कुलोद्भवा । विनयेनानुकूल्येन दक्षत्वेन च हृत्प्रिया ॥ १३ ॥ स्नुषा स्तुषार[रुग्]गोरोचिः कल्पाचारा अनल्पकाः । स्वर्भा[मूर्त्ता]समृद्धय इव तस्य प्राक् पुण्यसम्भवाः ॥ १४ ॥ पौत्रप्रपौत्रजामातृ -दुहित्रादिपरिवृतः । सोऽभुङ्क्त सुचिरं भोगा-न्नीरोगः साधुयोगवान् ॥ १५ ॥ सोऽन्यदा सुखशय्यायां प्रबुद्धः प्रीतमानसः । पश्चिमे यामिनीयामेऽचिन्तयामासिवानिति ॥ १६ ॥ धनैर्धान्यैः कुटुम्बेन द्विपदैश्च चतुष्पदैः । सुवर्णमणिभिश्चाहं सम्पन्नत्वात्सदा सुखी ॥ १७ गवाक्षवलभीमत्त-वारणाट्टालभासुरम् । सदोच्छ्रतपताकं मे गृहं स्वःसद्मसन्निभम् ॥ १८ ॥ महीवल्लभमुख्येऽस्मिन् महत्त्वं मे महाजने । मेरोरिव गिरिश्रेणौ यथा स्त्यन्यस्य नो तथा ॥ १९ ॥ तन्मया भोगसामग्री सम्पूर्णा प्रापि पुण्यतः । अथो चेन्न म्रियै तर्हि भवेत्फलवती ह्यसौ ॥ २० ॥ ततस्तल्पात्समुत्थाया--ऽध्यवसायं स तादृशम् । वहन् हृदि प्रभातस्य कृत्यं सर्वमपि व्यधात् ॥ २१ ॥ मान्त्रिकांस्तान्त्रिकान् यन्त्र--विदो विद्याविशारदान् । दैवज्ञान् ज्ञानिनोऽन्यांश्च शकुनादिविचारकान् ॥ २२ ॥ चरकादींश्च पाखण्डि--मण्डलान् भूतवादिनः । स पप्रच्छामरत्वायो--पायानत्रैव जन्मनि ॥ २३ ॥ युग्मम् ॥ नाभ्यधात् तं परं कोऽपि तस्याभावाज्जगत्यपि । नहि वन्ध्यां गजं कोऽपि वक्तुमीष्टेऽभिधानतः ॥ २४ ॥ तथाऽपि जीविताथ्र्येष पप्रच्छ प्रति मानवम् । वदत्येव हि लोको यदर्थी दोषान्न पश्यति ॥ २५ ॥ भृशं च

For Private and Personal Use Only

पृच्छतस्तस्य कोऽप्याख्यात्कौतुकप्रियः । जीवितार्थी यदि त्वं भोः श्रेष्ठिन्नन्मद्वचः शृणु ॥ २६ ॥ यमो दक्षिणदिक्पालः स च लोकान्तकारकः । अमरत्वं तमाराध्य पूजाद्यैस्त्वं लभस्व भोः ॥ २७ ॥ ततः स तद्गिरा प्रीतः प्रतीतिं हृदये वहन् । अनुमेने समस्तं तत् कोवेष्टुं नानुमन्यते ॥ २८ ॥ ततः स श्राद्धदेवस्य प्रासादं प्रीतमानसः । विधापयितुमारेभे तदाराधनतत्परः ॥ २९ ॥ सुवं भूमिपतेः प्राप्य रत्नप्राभृततोषितान् । इष्टकाकाष्ठपाषाणाद्यं दलं बहुमेलयत् ॥ ३० ॥ कलाविद्भिः सूत्रधारै--र्वस्त्रताम्बूलसंस्कृतैः । क्रमेणाचीकरच्चारु प्रासादं स्वल्पवासरैः ॥ ३१ ॥ स्वतुङ्गत्वेन यो जैषी--च्छृङ्गं कैलासशृङ्गिणः । धवलिम्नेन्दुकिरणा--न्नेत्रानन्दकरानपि ॥ ३२ ॥ यः सर्वतोऽपि विस्तीर्ण--स्तन्मनोरथराजिवत् । तद्भाग्योदयवच्चित्तं--चमत्कारकरो नृणाम् ॥ ३३ ॥ चलद्भुजाञ्चलैस्तस्य कीर्त्तिकर्पूरसौरभं । उत्क्षिपन्निव सर्वाशा पर्यन्तप्राप्तये यकः [वयः] ॥ ३४ ॥ स्वेच्छां पूरयितुं तेन श्रेष्ठिना स्थापितं खलु । स्वकुम्भमिव धत्ते यः स्वर्णकुम्भं च मूर्द्धनि ॥ ३५ ॥ तत्र प्रासादमध्ये स महोत्सवपुरस्सरम् । सदण्डां यमराजस्य प्रतिमां प्रत्यतिष्ठपत् ॥ ३६ ॥ त्रिसन्ध्यं स सदानर्च सचन्द्रैश्चन्दनद्रवैः । पुष्पनैवेद्यधूपैश्च स्तवनैश्च नवैर्नवैः ॥ ३७ ॥ तदग्रेऽचीकरन्नृत्यं नर्त्तकैर्दानतोषितैः । मृदङ्गशङ्खपटह--वादित्राण्यप्यवीवदन् ॥ ३८ ॥ कुर्वतो नित्यमेवैवं श्रेष्ठिनस्तस्य भक्तितः । व्यतीयाय बहुकालः सुखेनैवेकघस्रवत् ॥ ३९ ॥ भ्रमन्तोऽन्यदिने तत्र केप्यागुर्यमकिङ्कराः । गीतातोद्यादिनादेना--कृष्टा रज्ज्वेव वाजिनः ॥ ४० ॥ पश्यन्तः कापि विस्मेर--लोचनाः शालभञ्जिकाः ॥ यमं नन्तुमिवायाताः साक्षादनिमिषस्त्रियः ॥ ४१ ॥ स्थानस्थानदह्यमान--कर्पूरागरुसम्भवं । आघ्रायाघ्राय सौरभ्यं वहन्तश्च मुदं क्वचित् ॥ ४२ ॥ क्वचि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च्चाविधवस्त्रीभिर्गीयमानगुणोत्करम् । स्वस्वामिनो निशृण्वाना दधाना हृदि कौतुकम् ।४३॥वारंवारं क्षिपन्तीभिः कटाक्षान् युवसु क्वचित् । वाराङ्गनाभिः प्रारब्धं प्रेक्षणं प्रेक्षमाणकाः ॥ ४४ ॥ क्वचिच्च मौक्तिकश्रेणि-स्वस्तिकैर्मण्डितां भुवम् । निभालयन्तस्तत्प्रेतपतेस्ते प्राविशन् गृहम् ॥ ४५ ॥ पञ्चभिः कुलकम् ॥ तत्र ते शमनं दृष्ट्वा पूजितं कुसुमादिभिः । स्वचित्तेऽचिन्तयच्चैवं क एवं भक्तिमान् प्रभौ ॥ ४६ ॥ ततः कमपि ते पृच्छन्नरं तत्र स्थितं तदा । ननु भोः कारितः केन प्रासादोऽयं महात्मना ॥ ४७ ॥ कश्च पूजां करोत्येवं त्रिसन्ध्यं शुद्धमानसः । वादित्रगीतनृत्याद्यै--रुत्सवं च करोति कः ॥ ४८ ॥ इति पृष्टः स तान् प्राह श्रेष्ठ्यत्रास्ति महाधनः । स जीवितार्थी प्रासादं यमस्येममचीकरत् ॥ ४९ ॥ यममूर्त्तिंप्रतिष्ठाप्यो–त्सवं च कुरुतेऽन्वहम् । पूजयेच्च त्रिसन्ध्यं स कुसुमाभरणादिभिः ॥ ५० ॥ तदाकर्ण्य प्रहृष्टास्ते स्वस्वामिनमुपस्थिताः । तं वृत्तान्तं जगुः सर्वं यथादृष्टं यमाग्रतः ॥ ५१ ॥ तन्निशम्य यमस्तुष्टस्तद्द्रष्टुं स्वयमुत्सुकः । तत्राजगाम तत्क्लृप्तां तां पूजां च तथैक्षत ॥ ५२ ॥ दृष्ट्वा स्वस्मिंस्तथा भक्तिं प्रसन्नो महिषध्वजः । प्रत्यक्षीभूय तं प्रोचे श्रेष्ठिनं श्रेष्ठमानसः ॥ ५३ ॥ हंहो श्रेष्ठिन् ? मयीदृक्ते यदि भक्तिर्गरीयसी । ततोऽहं तव तुष्टोऽस्मि यदिष्टं त्वं तदर्थय ॥ ५४ ॥ ततः श्रेष्ठ्यभ्यधात् स्वामिन ? मम काऽप्यूनता नहि । भवादृशां प्रसादेन धनधान्यादिवस्तुनः ॥५५॥ केवलं स कुटुंबेन सर्वाभ्युदयशालिना । वाञ्छया जीवितं त्वत्त--स्तत्र भक्तिः कृता मया ॥ ५६ ॥ तत्स्वामिंश्चेत्प्रसन्नोऽसि शरीरेणामुनैव मे । अमरत्वं ततो देहि देवा हीप्सितदायिनः ॥ ५७ ॥ तन्निशम्य यमः प्रोचे भूयादेवं परं शृणु । मत्पत्रेऽस्ति ते नाम लिखितं जन्मनः क्षणे ॥ ५८ ॥ उत्सार्यते ततस्तच्चेन्महाभाग ? तदा सदा । प्राप्यामरत्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्भीकः सुखं तिष्ठसि भूतले ॥ ५९ ॥ तेनायाहि मया सार्द्धं यथा तत्रैव तेऽभिधाम् । निष्कास्य चित्रगुप्तेना-प-सारयामि पत्रतः ॥ ६० ॥ श्रेष्ठी हृष्टस्ततोऽध्यासी--दहो फलवती मम । यमस्य भक्तिः सञ्जज्ञे यदेषोऽध्यक्षतां गतः ॥ ॥ ६१ ॥ मदभीष्टं वरं चासा--वार्पयद्भक्तिरञ्जितः । दुःसाध्यमथवा भक्तेः किं जगत्यपि विद्यते ।। ६२ ॥ अपसारयि-तुं चैत्र स्वपत्रान्नाम मामकम् । मामाकारयते प्रीत- स्तद्गच्छाम्यमुना सह ॥ ६३॥ स्वसाक्षीकमहं नाम स्वकीयं यमप-त्रतः । माऽर्जयित्वा समायामि यथा मे न मृतिर्भवेत् ॥ ६४ ॥ इति ध्यात्वा ययौ सोऽपि यमेन सह तत्पुरम् । या-वत्तन्मन्दिरद्वारं जग्मतुस्तावुभावपि ॥ ६५ ॥ यमस्तत्रैव तं मुक्त्वा स्वयं प्राविशदन्तरा । प्रतिपन्नविधानाय चित्रगुप्त-मजूहवत् ॥ ६६ ॥ उवाच चैनं भो चित्र ? गुप्तपत्राणि सत्वरम् । वाचयित्वा ततस्तेभ्यो नामैतस्यापसारय ॥ ६७ ॥ प्रमाणमादेश इति भणित्वा सोऽथ लेखकः । पत्राणि वाचयामास तत्कालं शमनाग्रतः ॥ ६८ ॥ वाचितेष्वथ पत्रेषु प-त्रमेकं विनिर्गतम् । श्रेष्ठिनस्तस्य जन्मादि समाचारनिवेदकम् ॥ ६९ ॥ चित्रगुप्तस्तदा प्राह सावधानो भव प्रभो ? । मृत्युहेतुं श्रेष्ठिनोऽस्य समाकर्ण्यापसारय ॥ ७०॥ वाचयेति यमेनोक्ते ततोऽवाचयदित्यसौ । यथाऽमुकपुरे श्रेष्ठी समृद्धो भविताऽमुकः ॥ ७१ ॥ स चान्यदा मृत्युभीतो मृत्युमाराधयिष्यति । भक्तितुष्टो यमाश्वास्या-भीप्सितं प्रतिपत्स्यते ॥७२ नाम चास्य स्वपत्रेभ्योऽपाकर्तुं स्वात्मना सह । समानेष्यति तं च स्व-प्रतोल्यां स्थापयिष्यति ॥ ७३ ॥ समेष्यति स्वयं मध्ये प्रतोली तावदेव सा । पतिष्यति तयाक्रान्तः स पञ्चत्वं च लप्स्यते ॥ ७४ ॥ यमः प्रोवाच तन्मन्ये वरा-कः स ममार किं । यावत्पश्यन्ति तं तत्र मृतं तत्किंकरादयः ॥ ७५ ॥ आराधितोऽपि न यम-स्त्रातवान् वणिजं मृतेः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ही दुरन्तोऽतिदुष्टानां विपाकः खलु कर्मणाम् ॥ ७६ ॥ मरणाद्रक्षितः कोऽपि न देवैर्न च दानवैः । लौकिकाख्यानतो ह्यस्मात् सत्यमेतत् प्रपञ्चितम् ॥७७॥ तस्मात् सम्यक्त्वमेवैकं स्थिरीकार्यं स्वचेतसि। यदाराधनतः प्राप्ता अमरत्वं शरीरिणः ॥ ७८ इति लौकिकदृष्टान्तः ॥'' ननु तर्हि किं कोऽपि मरणाद्रक्षनीत्याह-'दढकए'त्यादि, दृढीकृतजिनसम्यक्त्वाः सम्यक् सत्यं यथातथमित्येकोऽर्थः सम्यग्भावः सम्यक्त्वं, जिनस्य सम्यक्त्वं जिनसम्यक्त्वं दृढीकृतं निश्चलतामापादितं जिनसम्यक्त्वं यैस्ते दृढीकृतजिनसम्यक्त्वा निश्चलीभूतार्हदाद्या ध्यातव्याः । "नेत्रे साम्यसुधारसैकसुभगे आस्यं प्रसन्नं सदा, यत्ते चाहितहेतिसंहतिलसत्संसर्गशून्यौ करौ । अङ्कश्च प्रतिबन्धबन्धुरवधूसम्बन्धबन्ध्योऽधिकं, तद्देवो भुवने त्वमेव भवसि श्रीवीतरागो ध्रुवम् ॥ १८ ॥ इत्यादिभावनया अथवा सम्यक्त्वं मिथ्यात्वमोहनीयकर्मक्षयक्षयोपशमोपशमेभ्यः प्रादुर्भूतं तत्त्वार्थश्रद्धानं सम्यग्दर्शनमित्यर्थः । जिनप्रणीतं सम्यक्त्वं मध्यपदलोपाज्जिनसम्यक्त्वं ततश्च दृढीकृतं जिनसम्यक्त्वं यैस्ते तथा । बहवोऽपि प्रभूता अपि नैकः कश्चित् किमित्याह—' जरामरं जरा वयोहानिलक्षणोपलक्षणत्वाज्जन्म च मरणं प्राणमुक्तिलक्षणं, ते जरामरणे, न विद्येते यत्र तदजरामरं पदमिति शेषोऽक्षयं स्थानं प्राप्ता आसादितवन्तः, उपलक्षणत्वात् प्राप्नुवन्ति प्राप्स्यन्ति चेति, तथा चोक्तं—"तेलुक्कस्स पहुत्तं लध्धूण वि परिवडंति कालेणं । सम्मत्तं पुण लध्धुं अक्खयसुक्खं लहइ मुक्खं ॥१९॥ तथा-"तुह सम्मत्ते लद्धे चिंतामणिकप्पपायवब्भहिए । पावंति अविग्घेणं जीवा अयरामरं ठाणं ॥२०॥ अथवा 'अजरामरमिति' भावप्रधानत्वान्निर्देशस्याजरामरत्वं प्राप्ताः । ननु दृढकृतजिनसम्यक्त्वानामप्यायुर्दलिकापचये प-



For Private and Personal Use Only

रासु(र)तास्त्येव तत्कथमुच्यते तेऽजरामरत्वं प्राप्ता इतिचेत्, उच्यते-राज्यार्हकुमारस्य राजव्यपदेशवत् अजरामरत्वार्हस्याजरामरत्वं जिनसम्यक्त्वदार्ढ्ये च केऽपि प्राप्तोत्तरगुणास्तस्मिन्नेव भवे सिद्ध्यन्ति केऽपि द्वितीयादिभवेषु सिद्ध्यन्ति, "अत्थेगइया तेणेव भवग्गहणेणं सिज्झंति बुज्झंति मुच्चंति परिनिव्वायंती"त्यादिवचनप्रामाण्यात् यावद्दूरादपि प्राप्तोत्तरगुणा अपार्द्धपुद्गलपरावर्त्तते सुसिद्ध्यन्त्येव । तदुक्तं-" अंतोमुहुत्तमित्तं पि फासियं जेहिं हुज्ज सम्मत्तं । तेसिं अवड्ढपुग्गल परियट्टो चेव संसारो ॥२१॥ तस्माज्जिनसम्यक्त्वादजरामरत्वं स्फुटमेव । शेषदेवसेवया तु सर्वदुःखमूलमिथ्यात्वार्जनेनानन्तानि जन्मजरामरणदुःखान्यनन्तकालमनुभवन्तीत्यर्थः ॥ ४ ॥ ननु यदि सम्यक्त्वमेवं गुणकारणं मिथ्यात्वं वानर्थकारणं ? तत्किममी लोका मिथ्यात्वं सेवन्ते न तद्दुःखहेतुत्वेन चेतयन्ते, इत्यतः सोपनयं दृष्टान्तमाह—

मूलम्—जह कुवि वेसारत्तो, मुसिज्जमाणो वि मन्नए हरिसं ।
तह मिच्छवेसमुसिया गयंपि न मुणंति धम्मनिहिं ॥ ५ ॥

व्याख्या-यथेति दृष्टान्तोपन्यासे, कोऽपि कश्चित् वेश्यारक्तो वेश्या वारवधूस्तस्यां रक्तोऽनुरागवानासक्तिगत इति यावत्, मुष्यमाणोऽपि धनापहारेण निःसारीक्रियमाणोऽपि मन्यते हर्षप्रमोदमिति । यतः-" गणयन्ति नापशब्दं न वृत्तभङ्गं न चार्थपरिहाणिम् । रसिकत्वेनाकुलिता वेश्यापतयश्च कवयश्च ॥ २२ ॥ " तथेत्यौप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



म्ये मिथ्यात्वमेव चित्तमोहनहेतुत्वेन वेश्येव पणाङ्गनेव वेश्या । मिथ्यात्ववेश्या तया मुषिता रत्नत्रयापहारेण निःसारीकृता लोका इति शेषः । गतमपि नष्टमपि न मुणंति न जानन्ति किं तदित्याह--' धम्मनिहिंति ' धर्मस्य चारित्रधर्मस्य निधिं निधानं सम्यक्त्वमित्यर्थः, सम्यक्त्वस्यैव चरणधर्मनिधित्वेन प्रतिपादनात्, तदुक्तं-" भाविज्ज मूलभूयं दुवारभूयं पइट्ठनिहिभूयं । आहारं भायणसमं सम्मत्तं चरणधम्मस्स ॥२३॥ अथवा धर्मोऽत्र प्रस्तावात् सम्यक्त्वं स एव सर्वार्थपूरकत्वेन निधिरिव निधिस्तं, अयमाशयः-यथा कश्चित् कामुको वारविलासिन्या ह्रियमाणसर्वस्वोऽपि विषयमोहितचेतस्तयाऽऽत्मानं सुभगं मन्यमानो हृष्यति न तु चिन्तयति पश्चान्निःस्वीभूतोऽहं दुःखमनुभविष्यामि, तथाऽजीवोऽपि कुदृष्टिरागमोहितमानसः कुदेवाद्याराधनेन तदुद्भूतमिथ्यात्वह्रियमाणधर्मनिधेरपि स्वं धार्मिकं मन्यते, नतु दुरन्तदुरितोपचितदुःखभाजनमात्मानं चिन्तयतीत्यर्थः॥५॥ मिथ्यात्वमुषिता धर्मनिधिं गतमपि न जानन्तीति वदता सामान्येन मिथ्यात्वस्य धर्मत्वं निरस्तम्, प्रागथ पुनर्लोकप्रवाहरूपस्य कुलक्रमस्य सम्भावितं धर्मत्वं निरस्यन्नाह–

मूलम्—लोयपवाहे सकुल-क्कमंमि जइ होइ मूढधम्मुत्ति ।
ता मिच्छाण वि धम्मो, थक्का य अहम्मपरिवाडी ॥ ६ ॥

व्याख्या–लोकस्य तथाविधविवेकविकलस्य प्रवाहोऽविचारितपूर्वापरप्रवृत्तिः, लोकप्रवाहस्तस्मिन् स्वस्यात्मनः कुलमन्वयस्तस्य क्रमः परिपाटिराचार इति भावः । स्वकुलक्रमस्तत्र ततश्च लोकप्रवाहरूपे स्वकुलक्रमे क्रियमाण इति गम्यते



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदीत्यभ्युपगमे भवति जायते मूढसदसद्विवेकविकलधर्म्मः कुगतिपतत्प्राणिधारणलक्षणः, इति शब्दो वाक्यसमाप्त्यर्थः । 'ता' तदा म्लेच्छानामपि श्वपचकिरातादीनामपि धर्मो भवतीत्यत्रापि सम्बध्यते प्रायस्तेऽपि स्वकुलक्रमं न लुम्पति स्वकुलक्रममात्रपालनमेव च परस्य धर्मोऽभिमतः । ततः किमित्याह—'थक्केति'थक्का देशीभाषया स्थिता निवृत्ता चशब्दोऽवधारणार्थे, अधर्मपरिपाटिः पापपद्धतिः । अयमर्थो यदि कुलक्रममात्रपालनादेव विवेकविकलस्य धर्मो भवति तदा म्लेच्छानामपिधर्म एव भवति तथा चाधर्मपरिपाटिः स्थितैवेत्यर्थः॥६॥ एवं सामान्येन लोकप्रवाहरूपस्य कुलक्रमस्य धर्मत्वे म्लेच्छादीनामपि धर्मवत्त्वं प्रतिपादयता तत्त्वतस्तस्याधर्मत्वेनाप्रामाण्यमुक्तम् । अथ लोके लोकोत्तरे च विशेषतस्तस्य तदेवाह—

मूलम्—लोयम्मि रायनीई, नायं न कुलक्कमंमि कइया वि ।
किं पुण तिलोयपहुणो, जिणंदधम्माहिगारम्मि ॥ ७ ॥

व्याख्या—लोके ज्ञातमुदाहरणमस्तीति शेषः, किं तज्ज्ञातमित्याह--' रायनीईत्ति ' राजनीतिर्न कुलक्रमेऽर्थवशाद्विभक्तिपरिणाम इति। न कुलक्रमापेक्षया प्रवर्त्तत इति गम्यम्, कदापि कस्मिन्नपि काले किमुक्तं भवति यथा राजनीतिः स्वकुलक्रमापेक्षया परकुलापेक्षया वा न प्रवर्त्तते।कोऽर्थः, किल कोऽपि वणिगादिरपि राज्यं प्राप्य कृषिवाणिज्यपाशुपाल्यादिकं स्वकुलक्रमं नापेक्षते नन्दराजवत्, नन्दः किल नापितकुलोत्पन्नोऽपि देवतादत्तं पाटलीपुत्रराज्यमासाद्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न स्वकुलक्रमे प्रवृत्तिं कृतवान्, परं कुलक्रमानपेक्षा चैवम्, किल राजानो न्यायकुर्वन्तो नैवमपेक्षन्ते यदेतत्कुले चौर्यमागतमित्यस्माभिर्न हन्तव्योऽयम् । किन्तु कुलक्रमायातमपि चौर्यं कुर्वन् विनाश्यत एव । यदि पुनरेवं लोके कुलक्रमे राजनीतिर्न प्रवर्त्तते तर्हि किमित्याक्षेपे पुनर्विशेषे त्रिलोकप्रभोस्त्रिजगतीस्वामिनः श्रीवीतरागस्य जिनेन्द्रधर्माधिराज्ये 'जिणंदधम्माहिगारम्मि' इति पाठः क्वापीति जिनेन्द्रधर्माधिकारे वा जिनेन्द्रस्य धर्मो जिनेन्द्रधर्मस्तदेवाधिराज्यं जिनेन्द्रधर्माधिराज्यं तस्मिन् अधिकारपक्षे त्वेवम्--अधिकारः प्रक्रमाद्राजनियोगो जिनेन्द्रधर्मस्याधिकार इव राज व्यापारे इव जिनेन्द्रधर्माधिकारस्तस्मिन् कुलक्रम एव प्रवृत्तिः किलास्मत्कुले हिंसादिको धर्मस्तं कथं वयं त्यजाम इत्येवमादिरूपा समुचितेत्यर्थः ॥ अथ चैवं योजना कार्या लोके सामान्यजने राजनीतिर्न्यायं राजनीतिप्ररूपकं शास्त्रमप्युपचाराद्राजनीतिस्तया न्यायो निर्णयस्तं न कुलक्रमे कुलाचारापेक्षया प्रवर्त्तयन्ति राजामात्यादय इति गम्यते कदापि यदि चैवं तदा किं पुनस्त्रैलोक्यप्रभोर्जिनेन्द्रधर्माधिराज्ये धर्माधिकारे वा लोकोत्तरे कुलक्रमाग्रहस्य वाच्यमिति । तस्मात्कुलक्रमायातधर्माभिनिवेशत्यागेन सुधर्मे एव मनोविधेयमिति तात्पर्यार्थः ॥ ७ ॥ ननु यदि प्रवाहरूपस्य कुलक्रमाचारस्य धर्माजनकत्वेनाप्रामाण्यं तदा किमयं जनो भवभ्रमणहेतुभूतात्तदाग्रहादेर्न विरज्यते इत्यादिशंकाजिनवचनवेदिनामपि विरतिदुष्करतामभिदधत्तदज्ञानां विशेषेण तद्दुष्करतामाह—

मूलम्—जिणवयणवियन्नूण वि जीवाणं जं न होइ भवविरई ।
ता कह अवियन्नूणं मिच्छत्तहयाण पासम्मि ॥ ८ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—जिनवचनवेदिनामपि सर्वज्ञागमज्ञायकानामपि, अपिः सम्भावने सम्भाव्यत एतद्यत्प्राप्तजिनवचनानामपि केषांचित्कुग्रहगुरुयोगाद्भवसम्बन्धो दुःखदः । तदुक्तं स्तुतौ—" तुह पययणं पि पाविय संभाविय साहुसावगत्तं-पि । कुग्गहकुगुरूहउ पुण अणंतखुत्तो दुहं पत्तो ॥ २४ ॥ " ततश्च जिनवचनवेदिनामपि जीवानां प्राणिनां यत् यस्मात् कारणात् न भवति न जायते भवविरतिः संसारविरामः गोष्ठामाहिलादीनामिव । ' ता ' तत् कथं केन प्रकारेण अविज्ञानां प्रक्रमाज्जिनवचनाऽवेदिनां मिथ्यात्वहतानां पार्श्वे समीपे भवविरतिर्भवतीति सम्बध्यते, तेषां हि, " सुवैद्यवचनाद्यद्वद्याधिर्भवति संक्षयः । तद्वदेव हि तद्वाक्याद्ध्रुवः संसारसंक्षयः ॥ १ ॥" इत्यादिवचनप्रामाण्यात् संसारविच्छेदकभगवद्वाक्यावगमविकलत्वेन मिथ्यात्वेन च " मिच्छत्तपडलसंछन्न—दंसणावत्थुत्तंमि नियंता। अमु-णंताहियमहियमहियं निवडंति भवावडे जीवा ॥१॥" इति वचनाद्दुरन्तभवभ्रमणहेतुनोपहतबुद्धित्वेन च भवविरतेरस-म्भव एव । तादृशानां प्रत्युतैकेन्द्रियाद्यनन्तभवप्रतिपादनात्, यत उक्तं- पण्डितधनपालेन ऋषभस्तुतौ —तुह समयस-रुभट्ठा भमंति सयलासु रुक्खजाईसु । सारणिजलं व जीवा, ठाणठाणेसु बज्झंता ॥ २८ ॥ " ततो-

---

१ हे नाथ ? तव समयसरोभ्रष्टा भवत्सिद्धान्ततडागविकलाः भ्रमन्ति पर्यटन्ति के ते जीवाः प्राणिनः, कासु रूक्षजातिषु हीनजातिष्वित्यर्थः । । किमिवेत्याह--सारणिजलमिव कुल्यावारीव, किं विधाः पच्यमाना कर्मणेति गम्यते केषु स्थानेषु नरकादिभेदभिन्नेषु किमुक्तं भवति यथा सरोभ्रष्टं सततसारणिजलं सकलासु वृक्षजातिषु भ्रा-म्यति स्थानस्थानेष्वालवालेषु बध्यमानं तथा जीवाअपि तव समयभ्रष्टा नरकादिस्थानेषु भ्राम्यन्तीति गाथार्थः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽसमर्थो यदि जिनागमविदामपि केषांचिद्गुरुकर्म्मणां भवविरतिर्न सम्पद्यते तत्कथं तद्विकलानां मिथ्यात्विनां पार्श्वे भवविरतिवार्ताऽपि सम्भवतीत्यर्थः॥ ८ ॥ एवं विरतिदुर्लभतामभिधायाधुना तद्वतां गुणविशेषमभिधित्सुराह-

**मूलम्—विरयाणं अविरए, जीवे दट्ठूण होइ मणतावो ।**
**हा हा कह भवकूवे बुड्डंता पिच्छ नच्चंति ॥ ९ ॥**

व्याख्या-विरतानां षड्जीवनिकायवधादिविरतिमतां अविरतान् विरतिविकलान् जीवान् प्राणिनो दृष्ट्वा भवति मनस्तापो मनसश्चित्तस्य ताप इवाविरतानां भाव्यपायचिन्तनेनासुखयुक्तत्वात्तापो मनस्तापः करुणा तस्याश्चतुर्भेदाया असुखयुक्तभेदे मनस्तापान्तर्भावात् चतुर्भेदभणनं चैवम्-" षोडशकग्रन्थे " करुणायाः । तथाहि-" उपकारि

---

१. एताश्चतुर्विधा इत्युक्तं तदेव चातुर्विध्यं प्रत्येकमभिधातुमाह-'उपकारी'त्यादि, उपकारी च स्वजनश्चेतरश्च सामान्यं च एतद्गता एतद्विषया चतुर्विधा चतुर्भेदा मैत्री भवति, उपकर्तुं शीलमस्येत्युपकारी उपकारं विवक्षितपुरुषसम्बन्धिनमाश्रित्य या मैत्री लोके प्रसिद्धा सा प्रथमा। स्वकीयो योज नो नालप्रतिबद्धादिस्तस्मिन्नुपकारमन्तरेणापि स्वजन इत्येवं या मैत्री तदुद्धरणादिरूपा प्रवर्त्तते सा द्वितीया । इतरप्रतिपन्नपूर्वपुरुषप्रतिपन्नसम्बन्धिषु स्वप्रतिपन्नेषु वा स्वजनसम्बन्धनिरपेक्षा या मैत्री सा तृतीया । सामान्ये सामान्यजने सर्वस्मिन्नेवापरिचितेऽपि हितचिन्तनरूपा प्रतिपन्नत्वसम्बन्धनिरपेक्षा सा चतुर्थी । मैत्रीमोहश्चासुखं च संवेगश्चान्यहितं च तैर्युता चैव समन्विता चैव करुणेति करुणा भवति मोहोऽज्ञानं तेन युता ग्लाना पथ्यवस्तुमार्गणप्रदानाभिलाषरूपा प्रथमा असु-

For Private and Personal Use Only

स्वजनेतर--सामान्यगता चतुर्विधा मैत्री । मोहासुखसंवेगा--न्यहितयुता चैव करुणेति ॥ २६ ॥" सामान्येनाऽपि सन्तः परदुःखदुःखिता भवन्ति, यतः-"न ब्रूते परदूषणं परगुणं वक्त्यल्पमप्यन्वहं, सन्तोषं वहते परर्द्धि. पराबाधासु धत्ते शुचम् । स्वश्लाघां न करोति नोज्झति नयं नौचित्यमुल्लङ्घयत्युक्तोऽप्यप्रियमक्षमां न रचयत्येतच्चार त्रं सताम् ॥ १ ॥ किं पुनरनुकम्पाप्रधानानां विरतानां सदग्रेसराणां परदुःखदुःखितत्वे वाच्यम्, ततो युक्तमेवाविर-तान् दृष्ट्वा विरतानां मनस्तापो भवतीति यथा भगवतो वर्द्धमानस्वामिनः कौशिकं दृष्ट्वा समजनीति स एव दृष्टान्तो-ऽभिधीयते । यथा-" सिरिवद्धमाणसामी चामीयरपवरदित्तदित्तिधरो । सत्तकरुस्सेह तणू छउमत्थो हिंडए पुहविं ॥१॥ अप्पडिबद्धविहारो निस्संगो निम्ममो निरभिसंगो । निरविक्खो नियदेहे समतिणमणि लट्ठुकणगो य ॥ २ ॥ इरि-यासमिइसमेओ मोणी मइणारिदप्पनिद्दलणो । एगागी उववन्ने सहमाणो विविह उवसग्गे ॥ ३ ॥ दुसहपरीसहस-हणो कोहाइकसायसायरतरंडो । गुणरयणाण करंडो भंडोवगरणविरहिओ य ॥ ४ ॥ तव तेयसा जलंतो धवलंतो नियजसेण भुवणयलं । समसत्तमित्तवग्गो समदुक्खसुहो य अपमाई ॥ ५ ॥ करुणारसस्स जलही सोमो सं-

---

खं सुखाभावो यस्मिन् प्राणिनि दुःखिते सुखं नास्ति तस्मिन् याऽनुकम्पा लोके प्रसिद्धा आहारवस्त्रशयनास नादिप्रदानलक्षणा सा द्वितीया, संवेगो मोक्षाभिलाषस्तेन सुखितेष्वपि सत्त्वेषु प्रीतिमत्तया सांसारिकदुःखपरि त्राणे छद्मस्थानां या स्वभावतः प्रवर्त्तते सा तृतीया, अन्यहितयुता सामान्येनैव प्रीतिमत्ता सम्बन्धविकलेष्वपि स-र्वेऽष्वेवान्येषु सत्त्वेषु केवलिनामिव भगवतां महामुनीनां सर्वानुग्रहपरायणा हितबुद्ध्या चतुर्थी करुणा ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तो य सयलजीवहिओ । भुवणगुरुगयमोहो सोहग्गनिही सुरिंदनओ ॥ ६ ॥ गामागरनगरेसु विहरंतो छाउमत्थकालम्मि । सो उत्तरचावा(वाचा)लं जंतो गोवेहिं इइ भणिओ ॥ ७ ॥ देवाणुप्पिय मुणिवर ! एस पहो जइवि उज्जुओ अत्थि । तहवि हु नहु गंतव्वं, तुम एएयंमि मग्गंमि ॥ ८ ॥ जेणित्थकणखलाभिह–मुज्जाणं वट्टए अइमहंतं । तत्थत्थि महाभीमो दुट्ठो दिट्ठीविसो सप्पो ॥ ९ ॥ तद्दिट्ठीए जो कोइ चडइ दुपओ चउप्पओ वा वि । पक्खी वा सो तक्खणमेव मरइ विसमविसवेगा ॥ १० ॥ ताइ मिणावं केण वि वच्चसुमग्गेण भो महासत्त?। जं सव्वो वि हु पुच्छइ कुसलं न हु सिग्घमागमणं ॥ ११ ॥ भयवं ? तेसिं वयणं सुणित्तु जाणित्तु तस्स पडिबोहं । असुणंतो इव तंपि हु अगेणंतो नियतणुपीडं ॥ १२ ॥ उज्जुगइए पत्तो सो कणखलकाणणे महावीरो । तत्थट्ठिओ पडिमाए जक्खहरे मंडवतलम्मि ॥ १३ ॥ सो किर सप्पो पुव्वं आसी गच्छम्मि कम्मिवि विसिट्ठो, खवगो वि सेसतवलद्धि लद्धमाहप्पपसरो उ ॥ १४ ॥ सो खवणपारणम्मी वासियभत्तस्स निग्गओ सहसा । अक्कंता मंडुकी चळणेणं तेण सा वि मया ॥ १५ ॥ खुड्डेण सहगएणं सो वुत्तो तो विराहिया तुमए । मंडुक्की तो खवगो दंसइ ताळो य पहयाओ ॥ १६ ॥ भणइ य किं एयाओ विराहिया नणुमए,अहो खुड्ड? । तो खुड्डुणं नायं संपइ लुहिउत्ति चिट्ठउ ता ॥ १७ ॥ आवस्सगस्स काले आलोएहित्ति अप्पणा चेव । जावावस्सगकाले वि तेण नालोइया सा उ ॥ १८ ॥ चिंतेइ तओ खुड्डो नूणं विस्सरियमेयमेयस्य । सारेमि तओ इन्हिति तेण तं सारियं तस्स ॥ १९ ॥ सो फडफडंतहोट्ठो कोहुदएणं पकंपमाणतणू । अरुणतरनयणवयणो भिउडी भीसणलळाडो य ॥ २० ॥ भुज्जो भुज्जो किं रे मं खिंससि दुट्ठ सेहइ भणिरो ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तो तं पइ कोवा पहाविओ आहणामित्ति ॥ २१ ॥ वेगेण पहावंतो आवडिओ खाणुगम्मि तक्कालं । पंचत्तमुवगओ सो तव्वेयणविहुरिओ संतो ॥२२॥ मरिउं जोइसिएसुं सामन्नविराहणेण उववन्नो । तत्तो चुओ कणखलासमम्मि रम्मे तरुगणेहिं ॥ २३ ॥ पंचसयतावसाणं कुलवइणो तावसीए उयरम्मि । पुत्तत्तेणायातो पुन्ने काले पसूया य ॥२४॥ नामेण कोसिपुत्ति य जणणी जणएहिं सो कओ तत्थ । पुव्वभवब्भासेणं तेणं सो चंडकोहो य ॥ २५ ॥ अन्ने वि तत्थ बहवे कोसिया आसि तेसु सो चंडो । तो चंडकोसि गुत्तिय तेहिं कओ नामओ तइया ॥ २६ ॥ तत्थासमे कुलवइ मओ पुराणो तओ य सो जाओ । जं पिउणो रीद्धीए पुत्तुच्चिय सामिओ पायं ॥ २७ ॥ तम्मि उ सो वणसंडे मुच्छिओ ताण तावसाणं पि । पुप्फफलाणि न घेत्तुं देइ न वा दारुखंडं पि ॥२८॥ अलभता य फलाई दिसो दिसंतो गया तओ सव्वे । किविणाणं क्रूराणं कोवा पासे जणो वसइ ॥ २९ ॥ गोवाळाई जो कोइ तत्थ वच्चेज्ज तं पि सो रूठो । हंतुं निद्धाडेइ अइमुच्छकोहलुत्तमइ ॥ ३० ॥ तस्स वणस्स अदूरे सेयविया नाम पुरवरी अत्थि । तत्थ ठिएहि निसुयं वणवित्तं रायपुत्तेहिं॥३१॥अन्नदिणे तम्मि गए कणखलनामा समाओ अन्नत्थ । आगंतूणं तेहिं खलीकयं तं वणं सव्वं ॥३२॥ कोइ पुप्फवहारं फलावहारं च कुणइ तहिं कोवि । छिंदइ कोई साहा भंजइ कोइ पसाहाउ ॥३३॥ जाव वणं तं सव्वं विणासियं तेहिं रायउत्तेहिं । दुद्दंतुम्मत्तेहिं केलीए कलयलमुहेहिं ॥ ३४ ॥ गोवेहिं तस्स सिट्ठं तुज्झ वणं अज्ज रायउत्तेहिं । विद्धं सिज्झइ कोसि गरिऊहिं परपुरमणाहं व ॥ ३५ ॥ सो य तया कट्ठाणं गतो तओ ताणि तत्थ छड्डित्ता । निसियग्गफरसुहत्थो पत्तो निय आसमेज्झत्ति ॥ ३६ ॥ रोसेण धमधमंतो अक्कोसंतो य दुट्ठवयणेहिं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवणपणुल्लियलहु- लयमालु व्व पकंपमाणंगो ॥ ३७ ॥ दिट्ठो य कुमारेहिं सो दुट्ठो चंडकोसियो तेहिं । आगच्छंतो रक्खुव्व भीसणो करठियकुहाडो ॥ ३८ ॥ कुविउ एस कुहाडेण मारिहीकमवि निद्दओ धणियं । ता भो नस्सह नस्सह इअ भणिओ ज्झत्ति ते नट्ठा ॥ ३९ ॥ सो रोसपसरछाइय नयणो नयमग्गउ परिब्भट्ठो । सहसा तेसिं पिट्ठे पहाविओ ताण वहणट्ठा ॥ ४० ॥ धावंतो रोसंधो खड्डाए निवडिओ स खलिऊण । जीवो पमायबहुलो जह निवडइ भवसमुद्दंमि ॥४१॥ निवडंतस्स य तस्स उ करट्ठिओ सो कुहाडओ अड्डो । रहिओ तेण य सीसं तिक्खेण दुहा कयं ज्झत्ति ॥४२॥ अट्टवसट्टो मरिउं तत्थेव वणम्मि सो समुप्पन्नो । अइदुट्ठो दिट्ठिविसो भुयगो रोसस्स माहप्पो ॥ ४३ ॥ कोइ कला-विकुलगल नीलुप्पलसजलजलहराभतणू । जवणजलुल्लियकज्जल-पंकेहिं विणिम्मिउव्व तणु ॥ ४४ ॥ कुडिलगइ कुडि-लमई कुडिलागारो य दुज्जणजणुव्व । छिद्दन्नेसणपवणो निक्कारणरोसभरभरिओ ॥ ४५ ॥ फारफडाडोवेणं पसारि-एणेव मच्चुहत्थेण । उप्पायंतो पायं मणखोहमकायराणं पि ॥ ४६ ॥ तडितरलजीहजुयलं पयडंतो भिक्खणं मुहगु-हाओ । जमदंडुव्व पलंबो सुकुमारो तूलफासाओ ॥४७॥ मुच्चंत फारफुक्कार- भारछा(ढा)रीकयंगिसंभारो । दारुण-रोसो दारुण-रूवो दिप्पंतमणिकिरणो ॥ ४८ ॥ अइपसरंतमहाविस जलंतवेसा नरस्स कुंडमिव । पजलंतनयणजुयलं निच्चवहंतो य अपसंतो ॥ ४९॥ विसमविसक्करेहि व दाढग्गेहिं सुसण्हनिक्खेहिं । सययं विडंबियमुहो अइवक्करो कयं तुव्व ॥ ५० ॥ वड्ढंतो य कम्मेणं तत्थेवासमयए महंतम्मि । कयनयदिणेहिं इह सो संजाओ किर महाकाउ ॥ ५१ ॥ पुव्वभवब्भासेणं तेणं कोहेण तह य लोहेण । रक्खइ सो वणसंडं निच्चंचिय तं निहाणं व ॥ ५२ ॥ दट्ठा य तावसा ते

For Private and Personal Use Only

वहवे दिट्ठीविसेण तेण तओ । अन्ने तब्भयभीया णट्ठा य दिसोदिसं खिप्पं ॥ ५३ ॥ सो य तिसंज्झं तम्मि उ वणखंडे भमइ रक्खणनिमित्तं । जं सउण गमवि पासइ तं डहइ सकोहणो सहसा ॥ ५४ ॥ ताहे दिट्ठो सामी परिब्भमंतेण तेण तत्थ ठिओ ॥ वीरो धीरसरीरो मंदरचूलोव्व निक्कंपो ॥ ५५ ॥ तं दट्ठूण स जलिओ अहिययरं कोहकूरजलणेण । चिंते इमं न याणइ जं एसट्ठिओ इहं एवं ॥ ५६ ॥ इय चिंतिय दिणनाहं निज्झाइत्ता पलोयए सामिं । कोवेण ड-हणहेउं दिट्ठीए विसभरजुयाए ॥ ५७ ॥ डज्झंति जहा अन्ने तद्दिट्ठीए तहाण डज्झइय । सामी किं सुहुय हुया-सणंमि डज्झेइवज्जं पि ॥ ५८ ॥ तो पुणरवि निज्झायइ वाराओ दुन्नि तिन्नि वा जाव । तय वत्थं चिय पासइ तह वि हु परमेसरं वीरं ॥ ५९ ॥ ता आगंतुं को वा डसइ स चरणंमि निट्ठुरो धणियं । मा मे उवरिं पडिहिति डसिय दूरं च उसरइ ॥ ६० ॥ तह वि हु तयवच्छं चिय दट्ठूणं डसइ पुण वि सो दुट्ठो । दो तिन्नि व वाराओ जाव न मुच्छा वि से जाया ॥ ६१ ॥ तो पुण वि अमरिसेणं सो भुयगो अच्छ(च्छि)ए पलो-एंतो । अहवा दुट्ठा विरमंति नेव पावाउ कइया वि ॥ ६२ ॥ पिच्छंतस्स उ तस्स उ रूवं सामिस्स वद्धमाणस्स । अइसंतं अइकंतं संपुन्नं अमयकुंडंव्व ॥ ६३ ॥ विसभरिया वि हु दिट्ठी विज्झाया ज्झत्तिसामि सोमत्ता । घोरो वि व-णदवो जह विज्झायइ मेहवुट्ठीए ॥ ६४ ॥ अहव बहुमरणकारण कसायविसुवसमहेउणो जस्स । आलोयणेण जइ व-ज्झ विसुवसमो तोणु किं वुज्जं ॥ ६५ ॥ नाऊण तं अविरयं तेणं पावेण कुगइगमणरिहं । तप्पडिबोहनिमित्तं तो भ-वणगुरू भणइ एवं ॥ ६६ ॥ उवसमसु चंडकोसिग बुज्झसु तत्तं भवंमि मा मुज्झ । सरसु नियपुव्वभवं जह कोहफ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लेण जाउसि ॥ ६७॥ सुणिऊण सामिवयणं चिंतइ सो पन्नगो समुवसंतो । किर कोसिगुत्ति नामं निसुयं मे कत्थ वि पुरा वि ॥ ६८ ॥ इय ऊहापोहेणं समग्गणगवेसणं करेमाणो । संजाइजाइसरणो खवगाईए भवे पासे ॥ ६९ ॥ चिंतेइ य सो पुणरवि हीही कोहो कउमए पुव्वि । ता एयायिरिसवत्थो जाओ लद्धुं पि जिणबोहिं ॥७०॥ संपइ पुण भुवण-गुरु-बहुसो आसाइओ मए मोहा । तो नूणं भमियव्वं भवाडवीए मए बहुहा ॥ ७१ ॥ ता मुत्तूण कसाए पिसाय इव भीमभयकरे इन्हि । एयस्स समक्खं चिय पयडिवज्जेउ चिय धम्ममहं ॥ ७२ ॥ खामेमि सामि सालं एयं करुणापरं महासत्तं । जो मं पडिबोहेउं नियपीडमुविक्खिऊण ठिओ ॥ ७३ ॥ इय वेरग्गसमेओ परमं भत्तिं च हियमज्झम्मि । सामि उवरिं वहंतो करेइ तिपयाहिणं वीरं ॥ ७४ ॥ वंदिय वीरजिणंदं भत्तीए तस्स चेव पच्चक्खं । अंगीकयसम्मत्तो पच्चक्खइ चउव्विहाहारं ॥ ७५ ॥ जाणंति चउनाणजुओ तित्थगरो सव्वमेव तब्भावं । न हु किंपि अपच्चक्खं जयम्मि जं परमजोगीणं ॥७६ ॥ मा हं रुट्ठो संतो दिट्ठीए जणवहं करेमित्ति । तुंडं बिलम्मि ठाविय ठिओ समाहीए सो सप्पो ॥७७॥ सामी तत्थेव ठिओ तस्सणुकंपाए परमकारुणिउं । गरुयाण सहावुव्वि(च्चि)य जं परकज्जेसु वट्टंति ॥७८॥गो-वालवच्छवाला सामिं दट्ठूण तत्थ पडिमठियं । तम्मि वणे, अल्लीणा-रुक्खेहिं आवरियअंगं ॥ ७९॥ तस्स उरगस्स दूरा खिवंति पाहाण एय ते गोवा । तहवि हु सो न वि चलेई जाणंतो कोहमाहप्पं ॥ ८० ॥ तो ते आसन्नं चिय आ-गंतुं तं भुयंगमं तत्थ । दंडेहिं घट्टंति य तहविहु न फुरइ मणागंपि ॥ ८१ ॥ तो तेहिं गंतूगं सिट्ठं लोगस्स इइ जहा भुयगो । सो उवसंतो सामिं दट्ठूणं दुट्ठकम्मो त्ति ॥ ८२ ॥ तं सुणिऊणं लोगो परमं अत्थेरयं नियचित्ते । धारिं-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो तत्थ गओ. पणमेइ जिणस्स पयजुयलं ॥८३॥ उरगस्स तस्स महिमं करेइ लोगो पसंतचित्तस्स । धम्मं आराहं-तो को वा नहि पूयमरिएइ ॥८४॥ घयविक्कणणनिमित्तं वच्चंतिआ य गोवत्थीओ। मग्गम्मि तम्मि भुयगं दट्ठुं बिलमज्झठियतुंडं ॥ ८५ ॥ तप्पूयाकरणत्थं घयहिं मक्खंति तं च फरिसंति। अहवा संतसहावो केसिं नहु वल्लहो होइ ॥ ८६ ॥ सोऽयमक्खियदेहो निस्संदेहो जिणंदधम्मंमि । तग्गंधसमेयाहिं पिवीलियाहिं तओ गहितो ॥ ८७ ॥ सो ताहिं खज्जमाणो अहियासइ वेयणं दुरहियासं । न पउसं आवज्जे तासु मणागंपि निक्कंपो ॥ ८८ ॥ एवं पनरस दिवसे अहियासित्ता परिसहं घोरं। आउ समत्ती ए सो सहसारे सुरवरो जाओ ॥ ८९ ॥ नाऊण सहस्सारे देवत्तणोववन्नमुरगं तं । भयवं पि हु कयकिच्चो पडिमं पारित्तु तो चलिओ ॥ ९० ॥ इइ अविरयसप्पे, विप्फुरंतुग्गदप्पे विरइ रयणधारी, सव्वजीवोवयारी । जह करुणमकासी, वद्धमाणो महेसी, तह चिय भवियाणं होइ साधम्मियाणं॥९१॥

एवं विरतानामविरतान् दृष्ट्वा मनस्तापो भवतीत्युक्तं, यथा चासौ भवति तथाह–हा हा! इति खेदे, कथं भवकूपे संसारावटे ब्रुडन्तो मज्जन्तः पश्य प्रेक्षस्वेति तेषां दुःखातिशयकथनार्थमात्मन एव सम्बोधनपूर्वं दर्शनम् । नृत्यन्तीव नृत्यन्ति हृष्यन्तीत्यभि प्रायः इदमुक्तं भवति । हा कथं दुर्गतिदुःखहेतुपापं कुर्वाणा अपि भव्यमेव तदस्माभिः क्रियत इति हृष्यन्ति । तदुक्तं— [1]हिंसे बाले मुसावाई माइल्ले पि सुणेसढे । भुंजमाणे सुरं मंसं सेयमेयंति

१, हिंस्रो हिंसनशीलः सन् बालो मूढो मृषावादो मिथ्याभाषणशीला माइल्लेति मायापरवञ्चनोपायचिन्तनं तद्वान् पिशुना परदोषप्रकाशकः शठो यो वेषविपर्यासादिना आत्मानमन्यथाभूतं दर्शयति मण्डिक चौरवत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मज्झइ ॥ २७ ॥ ननु भाविदुरन्तदुःखं चिन्तयति- "जहा सागडिओ जाणं समंहिच्चा महापहं । विसमं मग्गमाइन्नो अक्खे भग्गम्मि सोयई ॥ १ ॥ एवं धम्मं चिउ कम्म अहम्मं पडिवज्जिया । बाले मच्चुमुहं पत्ते अक्खे भग्गम्मि सोयई ॥ २ ॥" एवं चाविरतेषु विरतानां मनस्तापादनुकम्पालक्षणो गुणो भवतीत्यर्थः ॥ ९ ॥ नन्वेवमविरतस्यानुकम्प्यत्वमभिदधता तत्कृतारम्भस्यैव तीक्ष्णदुःखहेतुत्वमुक्तं न मिथ्यात्वस्य साक्षात् । तद्धेतुत्वमित्याशङ्क्य तस्य सर्वदुःखहेतुत्वमधित्सुराह—

**मूलम्—आरंभजम्मि पावे जीवा पावंति तिक्खदुक्खाइं ।**
**जं पुण मिच्छत्तलवं तेण न लहंति जिणबोहिं ॥ १० ॥**

व्याख्या—आरम्भणमारम्भो जीवस्य उपद्रवणमित्यर्थः, इदं च संरम्भसमारम्भयोरुपलक्षणम्, तदुक्तं—"**संकप्पो संरंभो परियावकरो भवे समारंभो । आरंभो उद्दवओ सुद्धनयाणं तु सव्वेसिं ॥२८॥** तत आरम्भाज्जातं आरंभजं तस्मिन् आरम्भजे पापे दुरिते कृत इति गम्यम् । जीवाः सत्त्वाः प्राप्नुवन्ति लभन्ते तीक्ष्णदुःखानि तीक्ष्णानि कटुविपाकानि दुःखानि कृच्छ्राणि तीक्ष्णदुःखानि । अत्रान्ययोगव्यवच्छेदकैव शब्दाध्याहारः कर्त्तव्यः, ततो दुःखा-

अत एव च भुञ्जानः सुरां मद्यं मांसं च श्रेयोऽतिप्रशंस्यमेतदिति मन्यते उपलक्षणत्वाद् भासते च "न मांसभक्षणे दोषो न मद्येन च मैथुने । प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ १ ॥ इत्यादीति सूत्रार्थः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्येव लभन्ते,कृष्णादय इव । ननु बोध्यभावमपीत्याशयः । यदिति निर्देशे, पुनरिति विशेषणे, तेनारम्भशतजातात्पापान्मिथ्यात्वलवस्याप्याधिक्यं विशिनष्टि, मिथ्यात्वमतत्त्वश्रद्धानरूपं तस्य लवो लेशो मिथ्यात्वलवस्तं कुर्वन्तीति शेषः । तेन मिथ्यात्वलवकरणेनास्तां बहुना मिथ्यात्वेन । यतो वितथप्ररूपणादिकस्य स्तोकस्यापि मिथ्यात्वस्यारम्भकर्तृपापेभ्योऽप्यनन्तदुःखहेतुत्वात् । तदुक्तं–अहह सयलन्नपावा वि तह पन्नवणमणुमवि दुरंतं । जम्मि रियभवतदज्जिय दुक्कयअवसेसलेसवसा ॥ २९ ॥ सुरघयगुणो वि परमेसरो वि तिहुयण अतुल्लमल्लो वि । गोवाईहि वि बहुहा क इत्थिओ तिजयपहुतं पि ॥३०॥ "थीगोबंभणभूवणंतगा वि केइ पुण दढपहाराई । बहुपावा वि पसिद्धा सिद्धा किर तम्मि चेव भवे॥१॥'इति । ततस्तेन किमित्याह-न लभन्ते न प्राप्नुवन्ति जिनबोधिं प्रेत्यजिनधर्मप्राप्तिं सम्यक्त्वमित्यर्थः । यां जिनानुग्रहरूपां तत्कार्यां वा जिनबोधिं विनाऽनन्तामनर्थपरम्परामनुभवन्ति । तदुक्तं–" तुहणुग्गहं विणा पहु पभूयघणकम्मबंधणं धणियं । तत्तो असप्पवित्ती तुहणुग्गहजुग्गया न तओ ॥ ३० ॥ इय पुणरुत्तमणंतं दुरंतभवचक्कगे किलिस्संतो । लोए पइखपएसं जाओ य मओ य बहुसोहं ॥ ३१ ॥ उस्सप्पिणि असंखा लोगा य गया जलग्गिभूपवणे । निवसंतस्स तरुसु य तेऽणंतगुणा मह अईया ॥ ३२ ॥ बिति चउ पणिंदियत्तं सुरनरतिरियत्तणं च भवकूवे । बहुसो पाविय पुणरवि अरहट्टघडिव्व भमिओहं ॥३३ ॥ तत आरम्भेभ्यो मिथ्यात्वलवोऽपि दुष्ट इत्यर्थः ॥ १० ॥ अथ येन मिथ्यात्वलवेन बोधिर्न लभ्यते तमेव प्रकटयन्नाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—जिणवरआणाभंगं उम्मग्गउस्सुत्तलेसदेसणयं ।
आणाभंगे पावं ता जिणमयदुक्करं धम्मं ॥ ११ ॥

व्याख्या–जिनवरोऽर्हन् तस्याज्ञा आज्ञायन्ते अधिगम्यन्ते मर्यादया अभिविधिना वा अर्था यया सा आज्ञा आगमस्तस्या भङ्ग इव भङ्गः खण्डनं,तत्फलस्य दुःखादेः प्रसाधकत्वान्न साक्षात् तस्या भङ्गः सम्भवति । शाश्वतत्वात्तदुक्तं श्री नन्दीसूत्रे-'इच्चेय दुवालसंगं गणिपिडगं ण कयाइ णाऽऽसी ण कयाइ ण भवंति । ण कयाइं ण भविस्सइ।तं भूतं भवति य भविस्सति य धुवे, नितिए सासए । अक्खए अव्वए अवट्ठिते निच्चे' इत्यादि। जिनवराज्ञाभङ्गस्तं किमित्याह–उन्मार्गोत्सूत्रलेशदेशनजं वदन्ति तीर्थकरा इति क्रिया कर्त्रध्याहारः । तत्रोन्मार्गः क्षायोपशमिकभावमतिक्रम्यौदयिकभावेन वर्त्तनं सूत्रादतिक्रान्तमुत्सूत्रं तयोर्लेशो लवस्तस्य देशनं कथनं तस्माज्जातमुन्मार्गोत्सूत्रलेशदेशनजं, उन्मार्गोत्सूत्रलेशदेशनकं चादेशनमेव देशनकं उन्मार्गोत्सूत्रलेशस्य देशनकं यत्रेति बहुव्रीहिणा विशेषणमाज्ञाभङ्गस्य कार्यं,प्राकृतत्वाद्विसन्धिरुमग्गओ सुत्तेत्यत्र । ननून्मार्गोत्सूत्रलेशदेशनज आज्ञाभङ्गस्तर्हि को दोष इत्याह–' आणाभंगेत्ति ' आज्ञाभङ्गे पापं पापहेतुकर्म भवतीति गम्यम्, ' ता' तस्मात्पापादाज्ञाभङ्गरूपाज्जिनमतोऽत्रापि प्राकृतत्वाद्विभक्तिलोपो धर्मः प्रथमार्थे द्वितीया सम्यक्त्वादिर्दुष्करः कर्त्तुमशक्यो मिथ्यात्वमोहनीयोदयात् । तदुदये च जिनमतधर्मे प्रत्युत द्वेषोत्पत्तिः । तदुक्तं
" जिणधम्मंमि पउसं वहइ य हियएण जस्स उदएणं । तं मिच्छत्तं कम्मं संकिट्ठो तस्स उ विवागो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ३४ ॥ इदमुक्तं भवति जिनवराज्ञाभङ्गमुन्मार्गोत्सूत्रलेशदेशनजं वदन्ति तस्मिंश्च पापं तस्माच्च जिनमतो धर्म्मो बोधिलक्षणो दुष्कर इत्यर्थः । एवमाज्ञाभङ्गस्य पापत्वमुक्तम्, अथाज्ञाविकलस्य धर्मस्यापि पापफलत्वमाह--

मूलम्—जिणवरआणारहियं वद्धारंता वि के वि जिणदव्वं ।
बुड्डंति भवसमुद्दे मूढा मोहेण अन्नाणी ॥ १२ ॥

व्याख्या—जिनवराज्ञारहितं जिनद्रव्यं वर्द्धयन्तोऽपि मूढा भवसमुद्रे ब्रुडन्तीति सम्बन्धः, तत्र जिनवराज्ञा प्राग् व्याख्याता, तया रहितं मुक्तं जिनवराज्ञारहितमिति क्रियाविशेषणवतश्च जिनवराज्ञारहितं यथा भवति तत्तथा वर्द्धयन्तोऽपि-वृद्धिं नयन्तोऽपि केऽपि मुग्धबुद्धयो जिनद्रव्यं देवसम्बन्धिद्रव्यं आज्ञारहितं वर्द्धनं चैवं, तथा श्रावकेण देवस्ववृद्धये कल्पपालमत्स्यबन्धकवधकवेश्याचर्म्मकारादीनां कलान्तरादिदानं, तथा देववित्तेन वा भाटकादिहेतुकदेवद्रव्यवृद्धये यद्देवनिमित्तं स्थावरादिनिष्पादनं । तथा महार्घतासंभवे विक्रयेण बहुदेवद्रविणोत्पादनाय गृहिणा यद्देवधनेन समर्घधान्यसङ्ग्रहणं, तथा देवहेतवे कूपवाटिकाक्षेत्रादिविधानं, तथा शुल्कशालादिषु भाण्डमुद्दिश्य राजग्राह्यभागाधिककरोत्पादनादुत्पन्नेन द्रविणवृद्धिनयनं जिनवराज्ञारहितं तथा चोक्तं—“ उस्सुत्तं पुण इत्थं थावरपाउग्गकूवकरणाई । उब्भूयगकरउप्पायणाइ धम्माहिगारम्मि ॥ ३५ ॥ ” तत्र स्थावरादिनिर्म्मापणादीनां षट्कायारम्भासंयतवासादिना महासावद्यत्वेन निवारितत्वात् । देवार्थं उद्भूतकरोत्पादनस्य च लोकाप्रीतिजनकत्वेनाबोधिहेतुत्वात् । तदुक्तं—“ धम्मत्थमुज्ज-

For Private and Personal Use Only

एणं सव्वस्सापत्तियं न कायव्वं । इय संजमो विसेओ इत्थ य भगवं उदाहरणं ॥ ३६ ॥ सो तावसासमाओ तेसिं अपत्तियं मुणेऊणं । परमं अबोहिबीयं तओ गओ हंत काले वि ॥ ३७ ॥ तदेवं वर्द्धयन्तोऽप्यास्तां भक्षयन्तः । तद्भक्षणस्य महानर्थहेतुत्वात् । यदुक्तं –"जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं । भक्खंतो जिणदव्वं अणंतसंसारिओ होइ ॥ ३८ ॥ तथा–चेइयदव्वं साहारणं च जो दुहइ मोहियमईओ । धम्मं च सो न याणइ अहवा बद्धाउओ नरए ॥ ३९ ॥ तथा–देवस्स परीभोगो अणंतजम्मेसु दारुणविवागो । जं देवभोगभूमिसु वुड्ढी न हु वड्ढइ चरित्ते ॥ ४० ॥ तथा भक्षणवदुपेक्षाऽपि दोषायैव । तदुक्तम्–" भक्खेइ जो उवक्खेइ जिणदव्वं च सावओ । पन्नाहीणो भवे सो उ लिप्पई पावकम्मणा ॥ ॥ ४१ ॥ आयाणं उवभुंजइ पडिवन्नधणं न देइ देवस्स । नस्संतं समुविक्खइ सो वि हु परिभमइ संसारे ॥ ४२ ॥ चेइयदव्वविणासे तद्दव्वविणासणे दुविहभेए । साहू उविक्खमाणो अणंतसंसारिओ होइ ॥ ४३ ॥ किमित्याह–ब्रुडंति मज्जंति भवसमुद्रे, संसारवारिधौ मूढा मन्दाः किंविशिष्टा मोहेन मोहनीयकर्मणा–अज्ञानिनो विशुद्धज्ञानविकलाः । तदयमभिसन्धिः संकाशश्रावकस्य देवस्वभक्षणात् प्रभूतभवान् यावन्नरकगतितिर्यग्गतिकुमनुष्यगतिदारिद्रदौर्भाग्यदौर्मनस्यकुष्ठादिरोगाद्यनन्तदुःखानुभवनं पुनस्तत्कर्मशेषक्षपणाय सकलेन स्वोपार्जितद्रव्येण ग्रासाच्छादनातिरिक्तेन देवद्रव्यवर्द्धनं परिभाव्य देवद्रव्यवर्द्धनसञ्जातश्रद्धाः केऽपि श्राद्धास्तथाविधविवेकविकलतया प्राशुकस्थावरादिकारणेन मालाकारसूत्रधारादीनां वञ्चनेन वा तद्वञ्चनस्यापि निषिद्धत्वात् । तदुक्तम्–अभिसं-



For Private and Personal Use Only

धानं चैषां कर्तव्यं न खलु धर्ममित्राणां । न व्याजादिह धर्मो भवति तु शुद्धाशयादेव ॥ १ ॥ इति अभिसन्धानं च वञ्चनमुच्यते, देवद्रव्यवर्द्धयन्तोऽपि भवसमुद्रे मज्जन्ति जिनाज्ञाभङ्गहेतुत्वात् तादृशवर्द्धनस्य, ननु तर्हि जिनद्रव्यं वृद्धिमपि न नेयमिति चेत्, न, तद्वृद्धिप्रयोगस्यागमे बहुशः शुभफलहेतुत्वेनाभिधानात् । तदुक्तम्–जिणपवयणवुड्ढिकरं पभावगंनाणदंसणगुणाणं । वड्ढंतो जिणदव्वं तित्थयरत्तं लहइ जीवो ॥ ४५ ॥ तथा-देवस्स नाणदव्वं च, तहा साहारणं धणं । सावएहिं तिहा कं नेयव्वं वुड्ढिमायरा ॥ ४६ ॥ जिणपवयणवुड्ढिकरं पभावगं नाणदंसणगुणाणं । रक्खंतोजिणदव्वं ..रत्तसंसारिओ होइ ॥ ४७ ॥ ततो वृद्धिं नेयम् । वृद्धिश्चात्र कलान्तरप्रयोगः । यदुक्तमुपाशकदशाङ्गे–तस्सणं आणंदस्स गाहावइस्स चत्तारि हिरन्नकोडीओ निहाणपउत्ताओ । चत्तारि हिरन्नकोडीओ वुड्ढि पउत्ताओ चत्तारि हिरन्नकोडीओ पवित्थरपउत्ताओ " इति । तत्र देवद्रव्यकलान्तरप्रयोगेऽयं विधिः बहुलाभेऽपि अङ्गोपर्युद्धारग्रहणदानत्यागेन स्तोकलाभेऽपि सुवर्णादिग्रहणैकग्रहणेन च " अंगोवरिओद्धारं वज्जइ अइलाभयं मुणेऊणं । थोवेण वि लाभेणं बंधेणं अहवरुक्केणं ' ति वचनात् । शुभस्थानेऽवञ्चकवणिगादिषु कलान्तरप्रयोगं करोति जिनद्रव्यवृद्धये विवेकवानिति । तदुक्तम्--' वड्ढेइय तदव्वं विसुद्धभावो सया कालं ति' अमुं चोपायं विना जिनद्रव्यवृद्धिर्न भवति तस्मादेवं वृद्धिः कर्तव्या । ननु पूर्वोक्तस्थावरादिकारणेनेति गाथार्थः ॥ १२ ॥ अयं च पूर्वोक्तः सर्वोऽप्युपदेशः स च योग्यस्यैव देयो नायोग्यस्य, तस्य तद्दानेऽपि लाघवादिदोषप्रसङ्ग इत्याह-

मूलम्—कुग्गहगहगहियाणं मुद्धो जो देइ धम्मउवएसं ।
सो चम्मासी कुक्कुर-वयणम्मि खिवेइ कप्पूरं ॥ १३ ॥

व्याख्या—कुग्रहग्रहगृहीतानां यो धर्म्मोपदेशं ददाति स कुक्कुरमुखे कर्पूरं क्षिपन्तीति सम्बन्धः, तत्र कुग्रहः सिद्धान्तबाह्यस्वमतिकल्पितस्वाभ्युपेतासत्पदार्थसमर्थनानुष्ठानगोचरो मानसोऽभिनिवेशः स एव ग्रहो भूतादिस्तेन गृहीता अधिष्ठिता ये ते तथा तेषां कुग्रहग्रहगृहीतानां मुग्धो हेयोपादेयज्ञानविकलो य इत्यनिर्दिष्टनामा ददाति वितरति धर्मोपदेशशुद्धधर्मप्ररूपणालक्षणं स इति यच्छब्दपरामृष्टो मुग्धश्चर्म्मत्वगुपलक्षणत्वादस्थिमांसाद्यश्नातीत्येवं शीलश्चर्म्माशी स चासौ कुक्कुरो भषणश्चर्माशी कुक्कुरस्तस्य वदनं मुखं तस्मिंश्चर्म्माशि कुक्कुरवदने क्षिपति न्यस्यति कर्पूरं घनसारमत्रै-व शब्दस्य लोपात् लुप्तोपमा ततः कर्पूरमिव अयमर्थोऽन्यत्राप्येवमेव वैशिष्ट्येन प्रत्यपादि । तदुक्तं—अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् । दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे ॥ ४८ ” तथा- उपदेशो हि मूर्खा-णां प्रकोपाय न शान्तये । पयःपानं भुजंगानां केवलं विषवर्द्धनम् ॥ ४९ ॥ .” लौकिकैरप्युक्त--उपदेशो न दातव्यो यादृशे तादृशे नरे । पश्य वानर मूर्खेण सुगृही निगृहीकृता ॥ ५० ॥ ततोऽयं भावः कुग्रह-ग्रहगृहीतानां शुनां च पिशुनानां च परवेश्मप्रधावतां प्रयोजनं न पश्यामः । पात्राणां दूषणादने इत्युक्तेः चर्म्माशिकु-क्कुरसमानानां वदने कर्पूरक्षेपसमं धर्मोपदेशं ददानो लाघवस्वार्थनाशमनःसङ्क्लेशमतिनाशादिदोषान् मुग्ध उपदेष्टा



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राप्नोति । यतः-किंवा करोत्यनार्याणामुपदेष्टा सुवागपि । तक्षा तीक्ष्णकुठारोऽपि दुर्दारूणि विहन्यते तस्मात्तादृशानामुपदेशो न देय इत्यर्थः ॥ १३ ननु तर्ह्ययोग्याननुपदिशतामुपदेष्टॄणां तेषु रोष एव सम्भाव्यत इत्याशंक्याह--

मूलम् -- रोसो वि खमाकोसो सुत्तं भासंतयस्स धन्नस्स ।
उस्सुत्तेण खमाविय दोसमहामोह आवासो ॥ १४ ॥

व्याख्या-रोषोऽपि क्रोधोऽपि:सम्भावने स चैवं सम्भावयति । तन्नास्य विषयतृष्णाप्रभवत्युच्चैर्न दृष्टिसम्मोहः । अरुचिर्न धर्म्मपथ्ये न च पापाक्रोधकण्डूतिः । इति वचनात् ज्ञातार्हत्प्रवचनरहस्यसंवेगसुधारसपूर्णहृदयपूर्णकलशस्य पुरुषस्य क्रोधोदयो न भवति । प्रायः क्वचिदयोग्यदेशनानिषेधप्रमादस्खलितचोदनादौ कृत्रिमस्तदकृत्यनिवारणाय भवत्यपि रोषः । स च रोषोऽपि क्षमाकोष एव सर्वस्य वाक्यस्य सावधारणार्थत्वात् । क्षान्तिभाण्डागारमेव किं यस्य कस्यापि नेत्याह-सूत्रं भाषमाणस्य तत्र सूत्रानुगतं वाक्यमप्युपचारात् सूत्रं सूत्राविसंवादीत्यर्थो भाषमाणस्य वदतो धन्यस्य पुण्यवतो रोषफलं ताडनाद्यपि कुर्वतस्ताडनीये शिष्यादौ क्षान्तिफलप्रशमादिगुणाधानेन गुणहेतुत्वात्तद्रोषस्य, तदुक्तं-लालिज्जंते दोसा ताडिज्जंते बहु गुणा हुंति । गयवसभतुरगाण व तो हुज्ज सुसिक्खपरिवारो ॥ ५२॥ तथा त एव तथाविधाविनीतविनेयाद् गुरुणा इच्छाकारमंतरेण सकोपेनेवाज्ञाबलाभियोगादिना वैयावृत्त्यकारा-

पण्णं, तदुक्तमावश्यकनिर्युक्तौ- "जह जच्च वाहणाणं आसाणं जणवएसु जायाणं। सयमेव खलियगहणं अहवा वि बलाभिओगेणं ॥५३॥ पुरिसज्जाए वि तहा विणीयविणयंमि नत्थि अभिओगो ।इयरंमि ओ अभिओगा जणवयजाए जहा आसे॥५४॥तस्मात्सूक्तं रोषोऽपि क्षमाकोषः सूत्रं भाषमाणस्येति । अथ व्यतिरेकमाह 'उस्सुत्तेणेत्यादि' उत्सूत्रेण सूत्रमार्गातिक्रमेण क्षमापि च तितिक्षापि आस्तां क्रोध इत्यपेरर्थः । दोषो दूषणं प्राकृतत्वाद्विभक्तिलोपोऽत्र द्रष्टव्यः । किम्भूतो दोष इत्याह " महामोह आवासो,, महांश्चासौ मोहो मौढ्यं तस्यावास इवाऽऽवासो गृहमित्यभिप्रायः । ततश्च यदा साधुः श्रावको वा शिष्यं पुत्रं वा प्रमादस्खलितादिनोन्मार्गे व्रजन्तं सारणादिभिर्न निवारयति दाक्षिण्यादेस्तदा क्षान्तिरपि दोषहेतुत्वाद्दोष एव । तदुक्तं- " इक्केण कयमकज्जं करेइ तप्पच्चया पुणो अन्नो। साया बहुलपरंपर वुच्छेओ संजमतवाणं ॥ ५५ ॥ तथा जीहाए वि लिहंतो न भइओ जत्थ सारणा णत्थि । दंडेण वि ताडंतो स भद्दओ सारणा जत्थ ॥ ५६ ॥ जह सीसाईनिकिंतइ कोइ सरणागयाण जंतूण । तह गच्छमसारिंतो गुरुवि सुत्ते जओ भणियं ॥ ५७ ॥ जणणीए अनिसिट्ठो निहओ तिलहारउपसंगेण । जणणी वि थणच्छेयं पत्ता अनिवारयंतीए ॥ ५८ ॥ इय अणिवारिय दोसा सीसा संसारसागरम्मुविंति विणियत्तूपसंगा पुण कुणंति संसारवुच्छेयं ॥ ५९ ॥ तस्मात्सूत्रोक्तविधिना परुषाक्षरं सारणादिकुर्वतोऽपि क्षान्तितुल्यफलत्वात् क्षान्तिरेव सूत्रोत्तीर्णमविधिमोहादिनोपेक्षमाणस्य क्षमावतो पि अक्षमा तुल्यफवत्वात् सदोषतैवेत्यर्थः ॥ १४ ॥ अथ पुनर्यत एव कश्चिद्रोषोऽपि शुभहेतुः क्वचिच्च क्षमाऽप्यशुभहेतुस्तत



For Private and Personal Use Only

एव जिनधर्मस्य फलनिश्चयावगमेऽपि तद्दुर्विज्ञेयतामाह—

मूलम्—इक्को वि न संदेहो जं जिणधम्मेण अत्थि मुक्खसुहं ।
तं पुण दुव्विन्नेयं अइउक्कडपुन्नरहियाणं ॥ १५ ॥

व्याख्या- एकोऽपि इहापि शब्दः पुनरर्थे, एकः पुनर्न सन्देहो न संशयो यत् जिनधर्मे तृतीया सप्तम्यर्थेऽत्र आराध्यमाने इति गम्यते अस्ति विद्यते मोक्षसुखं निर्वाणसातं । जिणधम्मो मुक्खफलो सासयसुक्खो जिणेहिं पन्नत्तो ।नरसुरसुहाइं अणुसंगियाइ इह किसिपलालं वा॥१॥'इति वचनात् । तं पुनर्जिनधर्मं समुत्पन्नदिव्यकेवलज्ञानेन सर्ववेदिनोपदिष्टं दुर्विज्ञेयं दुरधिगमं।"जावइया वयणपहा तावया चेव हुंति परसमया । जावइया परसमया तावइया चेव नयवाया ॥ ६० ॥ इति वचनादनेके नयास्तन्मयत्वाच्च तस्य तदुक्तं—नत्थि नएहिं विहूणं सुत्तं अत्थो य जिणमए किंचि । आसज्जउ सोयारं नए नयविसारओ बूया ॥ ६१ ॥ अथवा 'मिच्छत्तसमूहमयं सम्मत्तंति',, अतो नयगहनरूपत्वादुत्सर्गापवादमयत्वादेर्वा नामाचार्यप्ररूपिता सन्मार्गशतमध्यपतितत्वाद्वा दुर्विज्ञेयं वदंति दुःखप्रवेशदुःखोत्तारादिप्रकारेण तीर्थंकरगणाधरादय इति वाक्यशेषः । किं सर्वेषां नेत्याह-'अइउक्कडेत्ति' अत्युत्कटमत्युग्रं यत्पुण्यं सर्वधर्मश्रेष्ठमभिनिवेशत्यागेन सम्यक्त्वं तस्यैव सर्वधर्मश्रेष्ठत्वात् । यतः—" जह गिरिवराण मेरू सुराण इंदो गहाण जह चंदो । देवाणं जिणचंदो तह सम्मत्तं पि धम्माणं ॥ १ ॥ " तेन च रहिता विना कृता अ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्युत्कटपुण्यरहितास्तेषां न तु सर्वेषां । लघुकर्मणां निरभिनिवेशिनां जिनधर्मस्य सुज्ञेयत्वात् । अथवा तं पुण दुन्वि-नेयंति पदमेवं व्याख्यायते तमित्यादौ प्रथमार्थे द्वितीया ततश्च स पुनर्जिनधर्म्मो दुर्विज्ञेयः, शेषं तथैव । ततः सामान्येन जिनधर्मान्मोक्षो भवतीति निश्चयेऽपि येन विधिना स धर्मः क्रियते यादृशश्च भवति स विशेषो दुर्विज्ञेयोऽल्पपुण्यानामित्यर्थः ॥ १५ ॥ पुनस्तस्यैव दुर्विज्ञेयत्वमाह—

मूलम्—सव्वंपि वियाणिज्जइ लब्भइ तह चउरिमाय जणमज्झे ।
इक्कंपि भाविदुलहं जिणमयविहिरयणसुवियाणं ॥ १६ ॥

व्याख्या–सव्वंपीत्यादि, सर्वमपीत्यत्र सर्वशब्दस्य " नामं ठवणा दविए आएसे निरवएसे सए चेव । तहसव्वधत्तसव्वं च भावसव्वं च सत्तमयं ॥ ६२ ॥ इति गाथोक्तसप्तविधनिक्षेपादादेशसर्वस्य ग्रामप्रधानेषु गतेषु सर्वो ग्रामो गत इत्यादि रूपस्योपादानं, नतु निरवशेषादिनिक्षेपाणां, ततश्च सर्वं कियदपि स्थूलस्थूलं लोकव्यवहारजनरंजनादिकं विज्ञायते विशेषेणावगम्यते जनैरिति सर्वत्राध्याहार्यम् । अथवा किंचिज्ज्ञा अपि जना गर्वाध्मातत्तयात्मानं सर्वज्ञमिव मन्यन्ते, तदुक्तं–"यदा किंचिज्ज्ञोऽहं गज इव मदान्धः समभवं, तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः । यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतं, तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ६३ ॥ तदपेक्षयेदमुक्तं सर्वमपि विज्ञायते न तु तत्त्वतः, सर्वविज्ञाताऽत्र विवक्षितावास्तवसर्वज्ञतायां हि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वक्ष्यमाणविधिरत्नविज्ञानं सिद्धमेव भवति ।तथा लभ्यते प्राप्यते तथा तेन प्रकारेण चतुरिमा कुशलत्वं उचितकार्येषु दक्षत्वमिति यावत् । जनमध्ये तथाविधाविवेकिलोकमध्ये, न तु विवेकिनां मध्ये, ते हि भगवद्धर्मविकलं शेषकलाचतुरमप्यचतुरमेव मन्यन्ते । तदुक्तं--**बावत्तरि कलाकुसला पंडियपुरिसा अपंडिया चेव । सव्वकलाणं पवरं जिणधम्मकलं अयाणंता ॥ ६४ ॥** ततस्तादृशं सर्वविज्ञत्वं तथा चतुरिमा च, तादृशजने सुखेन लभ्यते । किं तर्हीत्याह--' **इक्कंपीति** ' अपिशब्दोऽवधारणे एकमेव हे भ्रातरिति चोपदेशस्य प्रीत्युत्पादनाय सम्बोधनं दुर्लभं दुष्प्रापं किं तदित्याह--जिनमतविधिरत्नसुविज्ञानं जिनोऽर्हंस्तस्य मतं शासनं तस्य विधिर्विधानमिति कर्त्तव्यताविशेषो जिनमतविधिः स एव रत्नमिव रत्नं चिन्तामणिस्तस्य सुष्ठु अतिशयेन विज्ञानं परिज्ञानमुपलक्षणत्वात्करणं च ' **नाणकिरियाहिं मुक्खो** ' इति वचनात् ज्ञानवत् करणस्यापि दुर्लभत्वं समफलत्वाद्द्वयोः दुरापता च विधिरत्नज्ञानस्यानन्तपुद्गलपरावर्त्तातिक्रमेण भव्यस्य चरम एव तस्मिन् भवतीति भणनात् । तदुक्तं--" **तस्माच्चरमे नियमादागम वचनमिह पुद्गलावर्त्ते । परिणमति तत्त्वतः खलु स चाधिकारी भवत्यस्या ॥ ६५ ॥** इति । ततश्चेदमुक्तं भवति बाह्यजनव्यवहारादि परिज्ञानचातुर्यादिकं जीवेनानन्तशो लब्धं लप्स्यते च । परं जिनमतविधिरत्नविज्ञानं तु समुद्रपतितचिन्तामणिरिव दुर्लभं पूर्वोक्तयुक्तेरित्यर्थः ॥ १६ ॥ प्राग्जिनमतविधिरत्नविज्ञानदुर्लभतां प्रतिपाद्याधुना सम्यक्स्वरूपस्य तस्य कालादिदोषात्कथनस्यापि दुर्लभतामाह--

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—मिच्छत्तबहुलयाए विसुद्धसम्मत्तकहणमवि दुलहं ।
जह वरनरवरचरियं पावनरिंदस्स उदयम्मि ॥ १७ ॥

व्याख्या -मिथ्यात्वस्यातत्त्वश्रद्धानरूपस्य " अभिगहियमणभिग्गहियं तह अभिनिवेसियं चेव । संसइयमणाभोगं मिच्छत्तं पंचहा होइ ॥ ६६ ॥ " त्ति, वचनात् पंचभेदस्य बहुलतायां कालादिदोषात् प्रचुरतायां मिथ्यात्वमिथ्यात्ववतोरभेदोपचारान्मिथ्यात्विप्राचुर्यान्मिथ्यात्वबहुता तस्यां च कुदेवकुगुरुकुधर्माभिनिवेशकलंकापगमेन विशुद्धं निर्मलं यत्सम्यक्त्वं तस्य कथनमपि आख्यानमपि, आस्तां पालनप्ररूपणशिक्षणादि किमित्याह--दुर्लभं दुरवापं च इदमुक्तं भवति । सम्प्रति दुःषमाकालविस्फूर्ज्जद्दशमाश्चर्यमहिम्ना दिशि दिशि प्रसर्पत्सु कुलिङ्गिद्रव्यलिङ्गिसमवायेषु तद्वचनविषग्रस्तेषु विविधजनपदजनेषु विशुद्धसम्यक्त्वकथनमपि, तत्कृतताडनबन्धनादिक्लेशभयाद्दुर्लभं । तदुक्तं, संघपट्टके-" सम्प्रत्यप्रतिमेकसंघवपुषि प्रोज्जृम्भते भस्मके-म्लेच्छातुच्छबले दुरन्तदशमाश्चर्ये च विस्फूर्ज्जति । प्रौढिं जग्मुषि मोहराजकटके लोकैस्तदाज्ञापरै--रेकीभूय सदागमस्य कथयाऽपीत्थं कदर्थ्यामहे ॥ ६७ ॥ " इहैव दृष्टान्तमाह--' जहेत्यादि ' यथा वरनरवरचरितं—वरश्चासौ नरवरो राजा वरनरवरस्तस्य चरितमाचारो नीत्या शिष्टपालनदुष्टनिग्रहादि तत्पापनरेन्द्रस्य पापप्रधानो नरेन्द्रः पापनरेन्द्रोऽनीतिपर इत्यर्थः तस्योदये उद्गमे अधिराज्ये कथयितुमपि दुर्लभमिति सम्बन्धः । ततो यथा नीतिशालिनो राज्ञश्चरितं दुर्नयनृपोदये वक्तुमपि ॥ २६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न पार्यंते, तथा मिथ्यात्वबहुलतायां विशुद्धसम्यक्त्वकथनमपीति भावार्थः ॥ १७ ॥ ननु यदि मिथ्यात्वबहुलतायां विशुद्धसम्यक्त्वकथनमपि दुर्लभं तर्हि विद्यादिगुणवतां द्रव्यलिङ्ग्यादीनामनुवृत्तिः क्रियतां यथा कृतानुवृत्तयस्ते सम्यक्त्वाङ्गीकारपरायणेषु धार्मिकेषु न द्विषन्तीत्याशङ्कयोत्सूत्राभिनिवेशसंक्लिष्टमनसां तेषां सङ्गमपि महानर्थकरं मन्वानो निवारयन्नाह—

मूलम्—बहुगुणविज्झानिलओ उस्सुत्तभासी तहा वि मुत्तव्वो ।
जह वरमणिजुत्तो वि हु विग्घकरो विसहरो लोए ॥ १८ ॥

व्याख्या—उत्सूत्रभाषी मोक्तव्य इत्यन्वयः । यद्यपि बहुगुणविद्यानिलयः बहवः प्रभूता गुणा निष्ठुरक्रियाकरणादिरूपा यस्य स बहुगुणः । विद्याश्चतुर्दश श्रुताभ्यासरूपा वा तासां निलय इव निलयो गृहमिति यावत्ततश्च कर्मधारयः । अथवा बहुगुणेति विद्याविशेषणं बहुगुणत्वं च विद्याया लोके लोकोत्तरे च सिद्धं, तदुक्तं-" हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा-ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् । कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं, येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्द्धते ॥ ६८ ॥ ( भर्तृहरेः ) जह जह सुयमवगाहइ अइसयरसपसरसंजुयमपुव्वं । तह तह पल्हाइ मुणी नवनवसंवेगसद्धाए ॥ ६९ ॥ ततो यद्यपि बहुगुणविद्यानिलयस्तथापि तदपि उत्सूत्रभाषी सिद्धान्तविरुद्ध-

For Private and Personal Use Only

मार्गोपदेष्टा चेत्तर्हि मोक्तव्य एव त्याज्य एव । तदुक्तं-" उम्मग्गदेसणाए चरणं नासंति, जिणवरिंदाणं। वावन्नदंसणा खलु नहु लब्भा तारिसा दट्ठुं ॥ ७० ॥" अमुमेवार्थं द्रढयन् दृष्टान्तमाह-जहेत्यादि-यथौ- पम्ये, वरः प्रधानो विषादिदोषनिराकरणेन मणीरत्नं वरमणिस्तेन युक्तोऽपि सहितोऽपि 'हु' एवधारणे स चाग्रे यो- जयिष्यते। विषधरो भुजगो लोके विघ्नकर एव जीवितादिप्रत्यूहकर एव तस्मान्मोक्तव्य इति। यथाहि विषधरो वर- मणियुक्तोऽपि विघ्नकर एव तथोत्सूत्रभाषी मणिसमानबहुगुणविद्यावानपि धर्मविघ्नकर एवेति मोक्तव्य इत्यर्थः ॥ १८ ॥ ननु यद्येवमुत्सूत्रभाषी विषधरवद्विघ्नकरत्वान्मोक्तव्यः, तर्हि किं न लोकैः स मुच्यत इत्याशंक्याह —

मूलम्—सयणाणं वा मोहे लोया विप्पंति अत्थलोहेण।
नो घिप्पंति सुधम्मे रम्मे हा मोहमाहप्पं ॥ १९ ॥

व्याख्या-स्वजनानां स्वज्ञातीनां विशिष्ट आसमन्तान्मोहो मूढता व्यामोहस्तेन स्वजनानां व्यामोहेन द्वितीयातृतीययोः सप्तमीति प्राकृतलक्षणात् तृतीयान्तं पदं व्याख्यायते,ततो लोकाः सामान्यजनाः स्वजनानां व्यामोहेन गृह्यन्ते उपादीयन्ते स्वायत्तीक्रियन्त इत्यर्थः। किलोत्सूत्रभाषी कुलक्रमायातगुरुत्यागेन स्वजनानां त्यक्ष्यन्ति अथवा मत् स्वजनैः सर्वैरपि एत एवादृता, अतोऽहं कथमेतत्त्यागेन तेषां नाम निर्गमयामीति व्यामोहेन, तथा च शब्दस्याक्षेपादर्थलोभेन गृह्यन्ते। अर्थोऽत्र प्रयोजनं तल्लोभेन एते ह्यस्माकं मन्त्रतन्त्रज्योतिरौषधादिनोपकारं कुर्वन्तीति।कथमेतत्त्यागो युक्त इति प्रयोजन-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोभेन अथवाऽर्थलोभो द्रव्यपरिग्रहः स हि धर्मपरिमंथः परिमन्थः सर्वदोषस्थानम् । यतः-"मोहस्यायतनं धृतेरपचयः शान्तेः प्रतीपो विधिर्व्याक्षेपस्य सुहृद् मदस्य भवनं पापस्य वासो निजः । दुःखस्य प्रभवः सुखस्य निधनं ध्यानस्य कष्टो रिपुः प्राज्ञस्यापि परिग्रहो ग्रह इव क्लेशाय नाशाय च ॥ ७१ ॥ तेन च गृह्यन्ते परं नो गृह्यन्ते नोपादीयन्ते सुधर्मेण जिनप्रणीतधर्मेणात्रापि तृतीयार्थे सप्तमी । किं विशिष्टेन सुधर्मेण रम्येण रमणीयेन रमणीयता चास्य-" धर्माज्जन्मकुले शरीरपटुता सौभाग्यमायुर्बलं, धर्मेणैव भवन्ति निर्मलयशो विद्यार्थसम्पच्छ्रियः । कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्मः सम्यगुपासितो भवति हि स्वर्गापवर्गप्रदः ॥ ७२ ॥ इत्यादिवचनात् तदेतत्किमित्याह-हा ! मोहमाहात्म्यम् ? हा इति खेदे मोहमहिमा, तदुक्तं स्तुतौ मोहदोषान् प्रकटयता-" तुह दंसणं निवारइ कारइ सव्वत्थवत्थुवच्चासं । चरणकरणम्मि सड्ढं विद्धंसइ दंसइ कुमग्गं ॥ ७३ ॥ ततो मोहमाहात्म्याल्लोकाः स्वार्थरतस्वजनव्यामोहेन गजकर्णचंचलार्थलोभेन च गृह्यन्ते । यद्वा गृहीताश्चैहिकामुष्मिकदुःखभाजो भवन्ति नतु सुधर्मेणैकान्तहितेन परलोकानुयायिना सर्वसुखनिदानेन गृह्यन्त इत्यर्थः ॥ १९॥ स्वजनव्यामोहादिना लोका गृह्यन्ते न सुधर्मेणेत्यभिधाय तथात्वे च सर्वलोकानां सम्प्रत्येव धर्म्मोच्छेदमाशङ्कमानः कांश्चित्तथाविधगृहव्यापारेऽपि निबिडं मोहपरान् पश्यन् कांश्चिच्च धर्मपरान् पश्यंस्तदपवादमाह—

मूलम्——गिहिवावारपरिस्सम-खिन्नाण नराण वीसमणठाणं ।
एगाण होइ रमणी अन्नेसिं जिणिंदवरधम्मो ॥ २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या– गृहं भार्यादिः परिवारः, गृहिणी गृहमुच्यते इत्युक्तेः उपलक्षणत्वात्पुत्रादिकुटुंबं तस्य गृहस्य निमित्तं व्यापारः कृषिपाशुपाल्यवाणिज्यसेवादिको वित्तोपार्जनलक्षणो गृहव्यापारस्तेन यः परिश्रमः खेदो भवति । वित्तार्थिनां खेदः ॥ यतः–“ नीचस्यापि चिरं चटूनि रचयंत्यायान्ति नीचैर्नति, शत्रोरप्यगुणात्मनोऽपि विदधत्युच्चैर्गुणोत्कीर्त्तनम् । निर्वेदं न विदन्ति किञ्चिदकृतज्ञस्यापि सेवाक्रमे, कष्टं किं न मनस्विनोऽपि मनुजा कुर्वन्ति वित्तार्थिनः ॥ ७४ ॥ तेन गृहव्यापारपरिश्रमेण खिन्नानां श्रान्तानां विश्रामस्थानं खेदापनोदास्पदं एकेषां केषांचित्–“ “ हत्थागया इमे कामा, कालिया जे अणागया । को जाणइ परे लोए अत्थि वा नत्थि वा पुणो ॥ १ ॥ ” इत्यादि वादिनां विवेकविकलानां भवति जायते रमणी स्त्री तादृशा हि रमणीमेव सर्वजगद्रमणीयां मन्यन्ते । तदुक्तं--“ वक्त्रं पूर्णशशी सुधाधरलता दन्ता मणिश्रेणयः, कान्तिश्रीर्गमनं गजः परिमलस्ते पारिजातद्रुमाः । वाणीकामदुघा कटाक्षपटली तत्कालकूटं विषं, रे रे चारुरुचे ? किमर्थममरैरामंथि दुग्धोदधिः ॥ ७५ ॥ तथा–प्रिया दर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः निर्वृतिः प्राप्यते येन सरागेणापि चेतसा ॥७६॥तथा-अन्येषां तु [1]सल्लङ्कामा विसंकमा कामा आसीविसोवमा।कामे पच्छेमाणा अकामा जंति

---

१. शल्यमिव शल्यं कामाः शब्दादयः विषमिव विषं कामाः कामा आशीविषोपमाः आशीविषः सर्पस्तदुपमाः, किञ्च कामान् प्रार्थयमाना अपेर्गम्यत्वात् प्रार्थयमाना अपि अकामा इष्यमाणकामा भावाद्यान्ति दुर्गतिं ततः कथं तत्परिहार आश्चर्यं असद्भोगप्रार्थनमपि यद्भवता सम्भावितं तदप्ययुक्तं, मुमूक्षुणां क्वचिदप्याकाङ्क्षाया अभावात् । उक्तं हि मोक्षे भवे च सर्वत्र निःस्पृहो मुनिसत्तम इति ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दुग्गयं ॥ ७७ ॥ पत्ता य कामभोगा कालमणंतं इहं स उवभोगा । अपुव्वंपि व मन्नइ तह वि हु जीवो मणेसुक्खं॥७८॥ मित्यादि संसारस्वरूपवेदिनां विवेकिनां जिनेन्द्रवरधर्मो जिनेन्द्रो वीतरागस्तस्य वरः प्रधानो धर्मो वरधर्मः । जिनेन्द्रधर्म इति सिद्धेऽपि लाभपूजाख्यातिहेतुकस्य धर्मस्य निरासाय वरपदोपादानम् । ततश्चान्येषां जिनेन्द्रवरधर्मो विश्रामस्थानमिति सम्बन्धः । तादृशा हि गृहव्यापारक्लेशमनुभूयापि भूयो गुरुपादान्तिकमागत्य तत्स्वदुश्चरितमालोच्य प्रतिक्रम्य लघुभूताः स्वखेदमुपनुदन्ति । तदुक्तं–" कयपावो वि मणुसो आलोइय निंदिअ गुरुसगासे । होइ अइरेगलहुओ उहरियभरुव्व भारवहो ॥ ७९ ॥ ततोऽयमाशयो गुरुकर्मणां तथाविधगृहव्यापारखिन्नानामपि विषयोपभोगादिना विश्रामो भवति । भवभीरूणां तु गृहव्यापारखिन्नानामपि सुगुरुसेवाव्याख्यानश्रवणावश्यककरणादिना विश्रामो भवतीत्यर्थः ॥ २० ॥ ननु गृहव्यापारश्रान्तानां केषांचित् कामिनी केषाञ्चिद्धर्मो विश्रामस्थानं दर्शितम् । अस्तु नाम तत्तथा । ततः किमित्यत आह—

मूलम्—तुल्ले वि उयरभरणे मूढ अमूढाण पिच्छसु विवागं ।
एगाण नरयदुक्खं अन्नेसिं सासयं सुक्खं ॥ २१ ॥

---

१. पत्ता इति प्राप्ताः कामभोगा अनेन जीवेन कालमनन्तं यावत् इह इति अस्मिन् संसारे कीदृशाः कामभोगाः ' उवभोगा इति ' ऊपभोगेन सहिता एतादृशा भोगा अनन्तवारं प्राप्ताः अपूर्वमिव नवीनमिवानुभूतमिव मन्यते तथापि अयं जीवो मणे इति मनसि सुखं विषयजनितं नवीनमिव मन्यते इत्यर्थः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्याः-तुल्येऽपि समानेऽपि उदरभरणे जठरपूरणे गृहव्यापारकार्ये मूढामूढयोरविवेकिविवेकिनोः प्रेक्षस्व पश्य विपाकं परिपाकं कीदृशमित्याह-' एगाणित्ति ' एकेषां मूढानां "कइया वच्चइ सत्थो किं भंडं कत्थ कित्तिया भूमी। को कयविक्कयकालो निव्विसइं किं कहं केण ॥ ८० ॥ उक्खणइ गणइ निहणइ रत्तिं न सुयइ दिया वियससंको। लिंपइ ठएइ सययं लंछियपडिलंछियं कुणइ ॥ ८१ ॥ इत्यादि प्रकारेण आर्त्तरौद्रध्यायिनां नानाविधाकृत्यकृतां उत्तरोत्तरमहारम्भाविरतानां जठरमात्रभरणार्थं परप्राणापहारिणां नरकदुःखं श्वभ्रवेदना भवतीति गम्यम्। अन्येषाममूढानां सम्यग्दर्शनभावेन यथार्थबोधकत्वेन कामभोगादिविरक्तचित्तानां तादृशा हि गृहवासं पालयन्तोऽपि तत्रानास्था पराभवन्ति । यतः-सव्वत्थनिरासंसो अज्जं कल्लं वयामि चिंतंतो । परकीयं पि च पालइ गेहावासं सिढिलभावो ॥ ८२ ॥ तेषां स्वकुटुम्बपोषणार्थं दुर्भिक्षादावपि महारम्भं परिहरतां सदयानां शास्वतं सुखं शास्वतमिव शास्वतं अनेकसागरोपमस्थायित्वात् । देवलोके सुखं भवतीति। तथा चोक्तं--'आ-

१ अगारिणो गृहिणः सामायिकं सम्यक्त्वश्रुतदेशविरतिरूपं तस्यांगानि निःशंकता कालाध्ययनाणुव्रतादिरूपाणि अगारिसामायिकांगानि ' सड्ढित्ति ' श्रद्धावान् कायेन उपलक्षणत्वान्मनसा वाचा च ' फासएत्ति ' स्पृशति सेवते तथा पौषधं आहारपौषधादिकं ' दुहउपक्खंति ' प्राकृतत्वात् द्वयोरपि सितेतररूपयोः पक्षयोः चतुर्दशीपूर्णिमादितिथिषु ' एगराइंति ' अपेर्गम्यत्वादेकरात्रिमपि केवलरात्रिसम्बन्धिनमपीत्यर्थः, उपलक्षणत्वाच्चैकदिनमपि न हावराति न हापयेन्न हानिं प्रापयेत् रात्रिग्रहणं तु दिवाऽव्याकुलतया कर्तुमशक्तो रात्रावपि पौषधं कुर्यादिति सूचनार्थं, इह च सामायिकांगत्वेनैव सिद्धे यदस्य भेदेनोपादानं तदादरख्यापनार्थमिति सूत्रार्थः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गारि सामाइअंगाइं सड्ढी काएण फासइ । पोसहं दुहओ पक्खं एगराइं नहा वए ॥ ८३ ॥ 'एवं विहिसमाउत्ते गिहवासे वि मुच्चई । मुच्चई छव्विपव्वाउ गच्छे जक्खसलोगयं ॥ ८४ ॥ ननुशास्वतसुखमिति प्रसिद्धं मोक्षसुखमेव किं नोच्यते, इति चेन्नैवं श्रावकस्य सतो मोक्षगमनासम्भवात् । उत्कर्षेणापि च श्रावकस्याच्युतं यावद्गमनभणनात् । तदुक्तं--" उववाओ सावगस्स उ उक्कोसेण च्चुओ जाव । " यदपि पारम्पर्येण शास्वतं सुखं तदपि प्रान्ततः सर्वविरतेरेवेत्यलं प्रसङ्गेन । ततोऽयमर्थो जठरपूरणतुल्येऽपि मूढास्तथा चेष्टन्ते यथा नरकदुःखान्यनुभवन्ति । अमूढाः पुनस्तथा कुर्वन्ति यथा स्वर्गसुखभाजो भवेयुरिति ॥ २१ ॥ एवं कृत्य तुल्यत्वेऽपि मूढामूढयोः फलविशेषं प्रदर्श्यामूढत्वप्राप्त्युपायं प्रकटयन्गाथाद्वयमाह–

मूलम्—जिणमयकहापबंधो संवेगकरो जियाण सव्वो वि ।
संवेगो सम्मत्ते सम्मत्तं सुद्धदेसणया ॥ २२ ॥

---

१ एवमुक्तन्यायेन शिक्षया व्रतात्मिकया समापन्नो युक्तः शिक्षासमापन्नः गृहवासेऽप्यास्तां दीक्षापर्याय इत्यपिशब्दार्थः सुव्रतः शोभनव्रतो मुच्यते मुक्तिमाप्नोति कुत इत्याह–' छव्विपव्वाउत्ति ' छविस्त्वक्पर्वाणि जानुकूर्परादीनि तयोः समाहारे छविपर्वतद्योगादौदारिकं देहमपि छविपर्व तस्मात् ततश्च गच्छेत् यायात् यक्षा देवाः समानो लोकोऽस्येति स लोकः तस्य भावः सलोकता सादृश्यमित्यर्थः । यक्षैः स लोकता यक्षसलोकता तां इयं च देवगतावेव स्यादित्यर्थाद्देवगतिं अनेन च पण्डितमरणावसरे प्रसंगाद्बालपंडितमरणमुक्तमिति सूत्रार्थः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ता जिणआणपरेणं धम्मो सोयव्व सुगुरुपासम्मि ।
अह उचियं सड्ढाउ तस्सुवएसस्स कहगाओ ॥ २३ ॥

व्याख्या-- तस्माद्धर्म्मः श्रोतव्य इति द्वितीयगाथापूर्वार्द्धेन सम्बन्धः, धर्म्मे हि श्रूयमाणे नश्यति मूढता, स्फुरति विवेको, विलीयते मिथ्यात्वं, गलन्ति दुष्कृतानीति । तस्मादिति कस्मात् यस्माज्जिनमतकथाप्रबन्धो जिनोऽर्हंस्तन्मतं शासनं तस्य कथा वचनपद्धतिरूपा तस्याः प्रबन्धो निबन्धो जिनमतकथाप्रबन्धः सर्वोऽपि समग्रोऽपि संवेगो मोक्षाभिलाषस्तत्करो जीवानां देहिनां भवति अत एव जिनमतकथाश्रवणाशंसा श्रावणाशंसा श्राद्धस्योक्ता, तथाहि-- " **चिरसंचिय पावपणासणीय भवसयसहस्समहणीए । चउवीस जिणविणिग्गयकहाए वोलिंतु मे दियहा** ॥ ८५ ॥ तथा एकैकस्यापि जिनमतपदस्य संवेगकरत्वख्यापनार्थं सर्वपदोपादनम् ननु किञ्चित्पदं संवेगकरं भवति किंचिन्न भवति जिनमतस्य । तदुक्तम्--" **जिणमयपयमित्तं पि हु पीयं पीऊसमिव जओ हरइ । मिच्छाविसमिह नाथं रोहिणियबिलाइ पुत्ताई** ॥ ८६ ॥ संवेगश्च सम्यक्त्वे सति भवतीति सर्वत्र गम्यम्, संवेगस्य व्याप्यत्वात् सम्यक्त्वस्य च व्यापकत्वात् व्याप्यव्यापकयोश्चाविनाभावात्, व्यापकाभावे च व्याप्याभावात । सम्यक्त्वे सत्येव संवेगो नान्यथेति सम्यक्त्वं च शुद्धया उत्सूत्रमलकलङ्करहितया देशनया भवति । यद्यपि 'तन्निसर्गादधिगमाद्वे'ति वचनात् केषांचित् देशनां विनापि सम्यक्त्वमुत्पद्यते । तथापि प्रायो मनुष्याणां शुद्धदेशनयै-



For Private and Personal Use Only

वोत्पद्यत इति तद्ग्रहणं धर्मशास्त्रश्रवणस्य बहुगुणत्वात् पठ्यते च–" क्लान्तमुपोज्झति खेदं, तप्तं निर्वाति बुध्यते मूढं। स्थिरतामेति व्याकुल–मुपयुक्तसुभाषितं चेतः ॥ ८७ ॥ अथवा प्राप्तेऽपि सम्यक्त्वे शुद्धदेशना श्रोतव्यैवेति ज्ञापनार्थं शुश्रूषाया अपि सम्यग्दृष्टिलिङ्गत्वात्। तदुक्तं–" सुस्सूसधम्मराओ गुरुदेवाणं जहा समाहीए। वेयावच्चे नियमो सम्मदिट्ठिस्स लिंगाइ ॥ ८८ ॥ ततो यस्माज्जिनमतकथाप्रबन्धः । संवेगकरः संवेगश्च सम्यक्त्वे सम्यक्त्वं च शुद्धदेशनया 'ता' तस्माज्जिनाज्ञापरेणाप्तादेशप्रधानेन जिनाज्ञा चैवं परमया शुश्रूषया श्रोतव्यं शुश्रूषा परमता चैव यथा–"यूनो वैदग्ध्यवतः कान्तायुक्तस्य कामिनोऽपि दृढं। किंनरयगेयश्रवणादधिको धर्मश्रुतौ रागः ॥ ८९ ॥ अपरमशुश्रूषया च श्रवणे प्रत्युतापायसम्भवः, तथा चोक्तं—विपरीतास्वितरा स्यात्। प्रायोऽनर्थाय देहिनां । सा तु या सुप्तनृपकथानकशुश्रूषावत् स्थिता लोके ॥ ९० ॥ इति नापरमशुश्रूषयेति। धर्मः श्रोतव्य आकर्णयितव्यः। क्व श्रोतव्य इत्याह–सुगुरुपार्श्वे संविग्नगीतार्थसूत्राविरुद्धभाषिगुरुसमीपे, यतः–" तित्थे सुत्तत्थाणं सवणं विहिणा उ तत्थ तित्थमिणं। उभयन्नू चेव गुरू विहिओ विणयाइउचित्तो ॥ ९१ ॥" श्रुतविरुद्धभाषिसमीपे हि कारणगतेन साधुनापि न श्रोतव्यः। किं पुनः श्राद्धेन, तदुक्तं– इहराठगेइकन्ने तस्सवणामिच्छामेइ साहूवि। अवलोकिमु जो सड्ढो जीवाजीवाइ अणभिन्नो ॥ ९२ ॥ ननु- संपत्तदंसणाई पयदियहं जइजणाओनिसुणेईय। सामायारिं परमं जो खलु तं सावगं विंति ॥ ९३ ॥ इति गाथोक्तव्युत्पत्त्या प्रतिदिनं सामाचारीश्रवणं श्रावक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्योक्तं तदपि गीतार्थगुरुसमीपे गीतार्थाश्च नहिसर्वदैकत्र तिष्ठन्त्यप्रतिबद्धविहारित्वात् तेषां ततस्तदभावे किमन्यत्रापि क्वापि श्रोतव्यो धर्मो नवेत्याशङ्कयाह–' अहेति 'अथेति पक्षान्तरे तच्चेदं यदि साधवो न भवन्ति। तदा औचित्यानतिक्रमेण श्रावकाद्धारणादिसमेताच्छ्रोतव्यो धर्म इत्यनुवर्त्तनीयं। औचित्यं चेदं श्रावकस्य धर्मकथने एकस्य द्वित्राणां चाग्रे सभाप्रबन्धमकृत्वा यथा सुगुरुवदनादवधारितं तथैव कथयति, तदुक्तं श्रीजिनवल्लभसूरिभिः पौषधविधिप्रकरणे-- गुरुमुहाओ वा जहावधारियमणुपेहेइ। तप्परतंतो तमेव अन्नेसिं किं वि साहेइ वा ॥ न पुण सभापबंधेण धम्मं कहेइ जम्हा। अहिगारिणा खु धम्मो कायव्वो अणहिगारिणो ॥ दोसो आणाभंगा उच्चियधम्मो आणाए पडिबद्धो ॥ ९४ ॥ इत्थ य भवसयसहस्समहणो वि बोहओ भविय-पुंडरीयाणं। धम्मो जिणपन्नत्तो पकप्पजयणा कहेयव्वो ॥ ९५ ॥ पकप्पो निसीहज्झयणं जेण सावज्जणवज्जाणं वयणाणं। जो न जाणइ विसेसं वुत्तंपि तस्स न खमं किमंग पुण देसणं काउं ॥ ९६ ॥अन्नं च -किं इत्तो कट्ठयरं सम्मं अणहिगयसमयसब्भावो। अन्नं कुदेसणाए कट्ठतरागंमि पाडेइ ॥ ९७ ॥ एवं विहाय बहु अ-सुहकम्मसंचोइआ। दुरही य कुनयलवमयमोहिया जिणमयं अयाणंता। जिणवयणमन्नहा भासिऊण अहरगइं जंति ॥ ९८ ॥ जं पुण पढइ सुणेइ गुणेइ जणस्स धम्मं कहेइ इच्चाइ। तं पच्छा कडविसयं तेणे वि जइतं पुराहीयं ॥ ९९ ॥ पयडं चेव अलं पसंगेणेत्यादि। श्राद्धमेव विशिनष्टि-किम्भूताच्छ्राद्धाच्छृणोति-तस्य सुगुरोरुपदेशं कथयतीत्युपदेशकथकस्तस्मात् कोऽर्थः। धारणादिकुशलेन यावानर्थो यथा सुगुरुमुखतः श्रुतस्तथा तावन्तमेवार्थं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथयति, न स्वमतिविकल्पितमश्रुतमपि । तदुक्तं—अहवा वि परूवितो जहट्ठियं पन्नविज्जाउ" तादृशादेव श्रृणोति सुगुर्वभावेन त्वितरस्मादिति भावइति गाथाद्वयार्थः ॥ २२ । २३ ॥ प्राग् धर्म्मश्रवणयत्नः प्रतिपादितोऽधुना श्रवणेऽपि सम्यक्त्वादिज्ञान एव तस्य साफल्यमाह–

मूलम्—सकहा सो उवएसो तं नाणं जेण जाणए जीवो ।
सम्मत्तमिच्छभावं गुरुअगुरूधम्मलोयठिई ॥ २४ ॥

व्याख्या—सा कथेत्यादिपदानां सम्यक्त्वमिथ्यात्वभावं यया जानातीत्यादिपदैः सम्बन्धः । तत्र कथा द्विविधा विकथा सुकथा च, तत्रापि विकथा सप्तधा, स्त्रीकथा भक्तकथा देशकथा राजकथा मृदुकारुणिकी दर्शनभेदिनी चारित्रभेदिनी । तत्र स्त्रीकथा तन्निन्दा प्रशंसादिरूपा ॥यथा-"करहगई कागसरा दुब्भग्गा लंबजठर पिंगच्छी । दुस्सीला दुब्भासा धिट्ठीको नियइतीए मुहं ॥ १०० ॥" तथा–सा तणु य तणू सुभगा सोममुही पउमपत्तनयणिल्ला । गरूयनियंबा उन्नय पयोहरा ललियगइगमणा ॥ १०१ ॥ भक्तकथाऽपि यथा–घयखंडजुयं खीरस्स भोयणं अमयमहह मणुयाणं । कयसालिदालि असणं वंजणपवकन्न घयसारं ॥ १०२ ॥ देशकथाऽप्येवं, यथा–" रम्यो मालवकः सुधान्यकृतकः काञ्चयास्तु किं वर्ण्यते, दुर्गा गुर्जरभूमिरुद्भटभटा लाटाः किराटोपमाः । काश्मीरे वरमुल्यता सुखनिधौ स्वर्गोपमाः कुन्तला, वर्ज्या दुर्जनसंगवच्छुभधिया दे-

For Private and Personal Use Only

शी कथैवंविधा ॥ १०३ ॥ तथा राजकथा–" राजाऽयं रिपुवारदारणसहः क्षेमंकरश्चौरहाः, युद्धं भीममभूत्तयोः प्रतिकृतं साध्वस्य तेनाथवा । दुष्टोऽयं म्रियतां करोतु सुचिरं राज्यं समाप्यायुषा । भूयो बन्धनिबन्धनं बुधजनै राज्ञां कथा हीयताम् ॥ १०४ ॥ मृदुकारुणिकी श्रोतृजनहृदयमार्दवजननान्मृद्वी सा चासौ पुत्रादिप्रलापप्रधानत्वात्कारुण्यवती मृदुकारुणिकी यथा–" हा पुत्त २ हा वच्छ २ मुक्कासिकहमणाहाहं । एवं कलुणपलाधा जलंतजलणिज्ज सा पडिया ॥१०५॥ दर्शनभेदिनी- ज्ञानाद्यतिशयतः कुतीर्थिकप्रशंसारूपा,यथा– सूक्ष्मबुद्धिशतोपेतं सूक्ष्मबुद्धिकरं परं।सूक्ष्मार्थबुद्धिभिर्दृष्टं श्रोतव्यं बौद्धशासनं ॥१०६॥ चारित्रभेदिनी सा, यया कथया प्रतिपन्नव्रतस्य व्रतार्थमुपस्थितस्य वा चारित्रभेदः क्रियते यथा–केवलिमणोहि चउदसदस नव पुव्वीहिं संपयं रहिए । सुद्धमसुद्धं चरणं को जाणइ तस्स भावं वा ॥ १०७ ॥ अन्ये तु " जहमंचाओ पडियस्स देहपीडा सुथोविया होइ गिरिसिहराओ महंती तहणंतभवो तओ भट्ठा ॥ १०८ ॥ तथा--" काले पमायबहुले दंसणनाणेहिं वट्टए तित्थं । वुच्छिन्नं च चरित्तं तो गिहिधम्मो वरं काउं॥१०९॥इत्येषा विकथा,सुकथा तु धर्मकथा साऽपि चतुर्द्धा । आक्षेपिणी विक्षेपिणी संवेदनी निर्वेदनी तथा चोक्तं "आक्षेपिणि विक्षेपिणि विमार्गबाधनं समर्थविन्यासं। श्रोतृजनश्रोत्रमनः प्रसादजननीं यथा जननीं॥१॥संवेदनीं च निर्वेदनीं च धर्म्यां कथां सदा कुर्यादित्यादि",तत्र तु विकथा सर्वथा धर्मानुपयोगिनीति न तस्या इहाधिकारः,किन्तु सुकथाया एव । तत्र आक्षेपिण्याद्यपि कथा सैव कथात्वमासादयति, एवमुपदेशो धर्मप्ररूपणात्मकः स एवोपदेशव्यपदेशं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लभते । तथा ज्ञानमवबोधस्वरूपं तदेव ज्ञानत्वं लभते नान्यदिति । यतः—" सदसदविसेसणाओ भवहेउजहिं छिओवलंभाओ । नाणफलाभावाओ मिच्छद्दिट्ठिस्स अन्नाणं ॥ ११० ॥ तदिति किमित्याह—जेणेत्यादि येन जानाति अवगच्छति जीवः प्राणी सम्यक्त्वमिथ्यात्वभावं किलार्हदुक्ततत्त्वश्रद्धानात्मकं सम्यक्त्वं तदितरन्मिथ्यात्वं । तथा गुर्वगुर्वोर्भावमिति सम्बध्यते । गुरुस्वरूपं चेदं — " महाव्रतधरा धीरा भैक्ष्यमात्रोपजीविनः । सामायिकस्था धर्मोपदेशका गुरवो मताः॥१११॥ अगुरुभावश्चैवम्-सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः ।अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ॥ ११२ ॥ तथा धर्मस्थितिलोकस्थित्योर्भावं धर्मस्थितिरियं--राईभोयणविरई ' इत्यादिप्रव्रज्याविधानादि ग्रन्थोक्तालोकस्थितिस्तदितरा परिग्रहाद्युपदेशात्मिका-यस्यास्ति वित्तं स नरः कुलीनः, स पण्डितः स श्रुतिमान् गुणज्ञः । स एव वक्ता स च दर्शनीयः, सर्वे गुणाःकाञ्चनमाश्रयन्ते ॥ ११३ ॥ इत्यादिरूपा तयोश्च भावं जानाति । ततोऽयं भावः । यया कथया येनोपदेशेन येन ज्ञानेन सम्यक्त्वमिथ्यात्वभावं गुर्वगुरुभावं धर्मलोकस्थितिभावं च जानाति उपादेयहेयभावेन सा कथा स उपदेशस्तज्ज्ञानं तदन्या न कथा नोपदेशो न ज्ञानमफलत्वादित्यर्थः ॥ २४ ॥ अथ तत्कथादिकं यतः--सम्यक्त्वमिथ्यात्वादिभावान् जानातीति वचनश्रुतेः किं जिनवचनश्रवणात्कोऽपि सम्यक्त्वमिथ्यात्वादिभावान् विज्ञायापि सम्यक्त्वं न लभतेऽपीति जातसंशयं प्रति तत्कृतप्रश्नमनुवदन् दृष्टान्तेनोत्तरमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—जिणगुणरयणमहानिहिं लद्धूण वि किं न जाइ मिच्छत्तं ।
अह पत्ते वि निहाणे किविणाण पुणो वि दारिद्दं ॥ २५ ॥

व्याख्या—जिनस्य गुणा ज्ञानदर्शनचारित्रादयो जिनगुणास्त एव रत्नानीव रत्नानि सर्वदोषोपशमनेन दुःखदौर्गत्यनाशनेन च तेषां जिनगुणरत्नानां महानिधिरिव महानिधिः द्वादशाङ्गादिरूपः सिद्धान्तः । तस्यैवागमे गणिपिटकत्वाभिधानात् ॥ तदुक्तम्--" नमो तेसिं खमासमणाणं जेहिं इमं वाइयं दुवालसंगं गणिपिडगमित्यादि । ततस्तं जिनगुणरत्नमहानिधिं सिद्धान्तं लब्ध्वापि श्रवणादिद्वारोपलभ्यापि किमिति प्रश्ने न याति न नश्यति । मिथ्यात्वश्रद्धानादिकं अभिनिवेशादिदोषवतामिति शेषः । अथवेत्यर्थान्तरोपन्यासे प्राप्तेऽपि लब्धेऽपि निधाने रत्नसुवर्णादिनिधौ कृपणानां कदर्याणां पुनरपि निधानप्राप्त्यनन्तरमपि दारिद्र्यं दरिद्रभावो न यातीति सम्बध्यते । तेषां हि तादृग्निधिप्राप्तावपि भोगदानयोरसम्भवेन दारिद्र्यमेव, यतः--" न कुणंति कुसुमभोगं, तंबोलं सोयमवि न याणंति । लज्जन्तुज्जलचेलेहिं, हा धणं मूढ किविणाण ॥ ११४॥ विरसारसरुक्खाहार–भोयणोसीय तावकट्ठसहा । न्हवणविलेवणभूसणरहिया सुमुणिव्व नणु किविणा ॥ ११५ ॥ धम्मविसए बहुविहे तेसिं दव्वं न जाइ उवओगं । जइ परमिह बिडलोयाण धरणि धरणीवईणं च ॥ ११६ ॥ इह चायमुपनयो यथा--कृपणानां निधिप्राप्तावपि तत्फलोपभोगाद्यभावेन दारिद्र्यमेव तथा गुरुकर्मणां जिनगुणरत्नमहानिधिप्राप्तावपि कदाग्र-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हादिना तत्फलसम्यक्त्वाप्राप्त्या मिथ्यात्वं न यात्येवेति तात्पर्यार्थः ॥ २५ ॥ जिनगुणरत्नमहानिधिं प्राप्यापीत्यादिना जिनागमप्राप्तावपि गुरुकर्मणां सम्यक्त्वादिदौर्लभ्यमुक्तं तावता वार्थाज्जिनागमस्य सम्यक्त्वादिधर्मसाधनत्वं प्रतिपादितं प्रागधुना जिनोपदिष्टपर्वणामपि धर्मसाधनत्वमाह—

मूलम्—सो जयइ जेण विहिया संवच्छरचाउमासियसुपव्वा ।
निद्धंधसाण जाइ जेसिं पभावओ धम्ममई ॥ २६ ॥

व्याख्या—स इति प्रक्रमाज्जिनो जयति जययुक्तोस्तु स इति क इति यच्छब्देनाह--येन भगवताऽनुपकृतोपकारिणा विहितानि निर्मितानि । कानीत्याह--सांवत्सरिकचातुर्मासिकसुपर्वाणि प्राकृतत्वात् । पुंस्त्वं निर्देशः सांवत्सरिकं पर्युषणापर्वचतुर्मासिकानि त्रीणि कार्त्तिकफाल्गुनाषाढपूर्णिमादिनानि श्रुतोक्तनीत्या आचरणया तु तच्छुक्लचतुर्दशीदिनानि । उपलक्षणं चैतत्तेन चतुर्दश्यष्टम्यमावासीपूर्णिमाष्टाहिकाकल्याणिकदिनादीनि सुष्ठु शोभनानि पर्वाणि तिथिविशेषाः । एषु हि भगवता सर्वादरेण व्रतनियमदर्शनप्रभावनादौ यत्न उपदिष्टः, तथाहि--" संवत्सरचाउमासिएसु अट्ठाहियासु य तिहीसु । सव्वायरेण लग्गइ जिणवरपूया तव गुणेसु ॥ ११७ ॥ ननु सुपर्वविधानादेव स जयतीत्युक्तं, तत्र को हेतुरित्यादि । ' निद्धंधसाणित्ति ' निद्धंधसति' देशीपदं, येषां सुपर्वणां प्रभावान्निद्धंधसानां निर्दयानामपिरत्र गम्यते । तेनास्तां सदयानां जायते प्रादुर्भवति धर्ममतिर्द्धर्मबुद्धिः, ते हि परलोकनिरपेक्षा अपि पर्यु-

For Private and Personal Use Only

षणादिपर्वसु साधून् विशेषतस्तपः स्वाध्यायसर्वचैत्यवन्दनादिपरान् विलोक्य श्राद्धांश्चामारिघोषणाजिनपूजाचैत्यपरिपाटिदानसाधर्मिकवात्सल्यप्रभावनादिविधानपरान् वीक्ष्य अहो एते मुनयः श्रावकाश्चैवं महर्द्धिका अपि सन्तो यदेवमस्मिन् पर्वणि धर्मरतास्तद्वयमप्यत्र धर्मे लगामः। शोभनत्वादस्य धर्मस्येति केऽपि भगवच्छासनं प्रपद्यन्ते केऽपि भव्यमिदं शासनमिति बीजमात्रं लभन्ते। तदुक्तं--" तत्तथा शोभनं दृष्ट्वा, साधु शासनमित्यदः। प्रपद्यन्ते तदैवैके बीजमन्यस्य शोभनम् ॥ ११८ ॥ केऽपि भद्रकतामाश्रयन्ति। केऽपि सदयत्वं प्रपद्यन्ते । दृश्यते चाऽधुनाऽपि ये धर्मनामापि न जानन्ति तेऽपि पर्युषणादिषु प्रायो दानशीलतपोभावोद्युक्ता भवन्ति । ततो येषां प्रभावान्निर्द्धंधसानामपि धर्ममतिर्जायते । तानि सुपर्वाणि येन विहितानि स जयवान् भवत्वित्यर्थः ॥ २६ ॥

अस्यैवार्थस्य व्यतिरेकमाह—

मूलम्—नामं पि तस्स असुहं जेण निदिट्ठाइं मिच्छपव्वाइं ।
जेसिं अणुसंगाओ धम्मीण वि होइ पावमई ॥ २७ ॥

व्याख्या--नामापि अभिधानमपि आस्तां वन्दनपूजनसंसर्गादि। तस्य कुतीर्थिकादेरशुभहेतुत्वात्पापमित्यर्थः, तस्येति कस्यात आह—येन निर्दिष्टानि कथितानि मिथ्यात्वपर्वाणि रजोत्सवादीनि कुतोऽशुभमित्याह--येषां रजोत्सवदीपोत्सवादिपर्वणामनुषङ्गात् प्रसङ्गात् धर्मिणामपि धर्मवतामप्यास्तां धर्मपराङ्मुखाणां भवति पापमतिरकल्याणबु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्धिः । तत्पर्वोपदेष्टृभिर्ह्येवमुपदिष्टं किल रजोत्सवेऽसभ्यवचनभाषणमस्तकधूलिक्षेपणकाष्ठछगणकचौर्यादिकं कार्यम्। दीपोत्सवे द्यूतक्रीडा कर्त्तव्या । विजयदशम्यादिषु वाह्यालीप्रदेशे महिषं मुक्त्वा तत्पृष्टे विजययात्रार्थं प्रोद्यतप्रहरणैस्तद्वधाय धावनीयमित्यादि ततस्तेषु पर्वसु प्रभूतमज्ञानजनं तथा तथा प्रवर्तमानं दृष्ट्वा धार्मिका अपि केऽपि लोकानुवृत्त्या राजाद्यभियोगेन केऽपि कौतुकेन केऽप्यपरिणतधर्मत्वेन तत्र प्रवर्त्तन्ते। तथा प्रवृत्तानां च तेषामप्यसभ्यभाषणेन द्यूतरमणान्वेषणाभ्यां जीवहिंसानुमत्या च भवति पापमतिरिति यैरुपदिष्टानि मिथ्यापर्वाणि तेषां नामाप्यशुभमिति युक्तमेवेत्यर्थः ॥ २७ ॥ नन्वेवं तर्हि सुपर्वसु सर्वे मिथ्यादृशः सम्यक्त्वं प्रतिपत्स्यन्ते । कुपर्वसु च सम्यग्दृशोऽपि मिथ्यात्वमित्याशङ्कयाह—

मूलम्—मज्झठिई पुण एसा अणुसंगेणं हवंति गुणदोसा ॥
उक्किट्ठपुन्नपावा अणुसंगेणं न घिप्पंति ॥ २८ ॥

व्याख्या–मध्या मध्यस्था उत्कृष्टपुण्यपापरहिताः । तेषां स्थितिर्मर्यादा, सा मध्यस्थितिः पुनर्विशेषेण एषा वक्ष्यमाणा न सर्वेषां केत्याह–अनुषंगेण संसर्गेण भवन्ति, जायन्ते गुणदोषाः गुणवत्संसर्गेण गुणा जायन्ते दुष्ट संसर्गेण च दोषा जायन्ते । यतः–जो जारिसेणमित्तिं करेइ अचिरेण तारिसो होइ । कुसुमेहिं सह वसंता तिला वि तग्गंधिया जाया ॥११९॥ अंबस्स य निंबस्स य दुन्हंपि समागयाणि मूलाणि । संसग्गेण विणट्ठो अंबो-निंबत्तणं पत्तो ।१२०॥ तथा–गुणा गुणज्ञेषु गुणी भवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः । सुस्वादुतोयं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवहाहि नद्यः, समुद्रमासाद्य भवन्त्यपेयाः॥१२१॥ अमध्यस्थानां का स्थितिरित्याह--उत्कृष्टपुण्यपापा उत्कर्षप्राप्तसुकृद्दुःकृता अनुषङ्गेण संसर्गेण न गृह्यन्ते। संसर्गात्तेषां गुणदोषौ न भवत इत्यर्थः॥ यतः--[1]सुचिरंपि अच्छमाणो वेरुलिओ कायमणियउम्मीसो। नउवेइ कायभावं पाहन्नगुणेण नियएण॥१२२॥ तथा-[2]सुचिरंपि अच्छमाणो नलथंबो उच्छुवाडमज्झम्मि। कीस न जायइ महुरो जइ संसग्गी पमाणं ते॥ १२३ ॥ ततो मध्य-

---

१. सुचिरमपि प्रभूतकालं तिष्ठन् वैडूर्यो मणिविशेषः काचाश्चते मणयश्च काचमणयः कुत्सिता काचमणयः-काचमणिकास्तैरुत्प्राबल्येन मिश्रः नोपेति न याति काचभावं काचधर्मं प्राधान्यगुणेन वैमल्येन निजेनात्मीयेन एवं सुसाधुरपि पार्श्वस्थादिभिः सार्द्धं संवसन्नपि शीलगुणेनात्मीयेन न पार्श्वस्थादिभावमुपेत्ययं भावार्थ इति ॥

२. सुचिरमपि प्रभूतकालं तिष्ठन् नलस्तम्बः वृक्षविशेषः इक्षुवाटमध्ये इक्षुसंसर्ग्या किमिति न जायते मधुरः। यदि संसर्गिः प्रमाणं ते तवेति गाथार्थः

३. गाथा-भावुग अभावुगाणिय लोए दुविहाणि होंति दव्वाणि। वेरुलिओ तत्थ मणी अभावुगो अन्नदव्वेहिं ॥ १ ॥ भाव्यन्ते प्रतियोगिना स्वगुणैरात्मभावमापद्यन्त इति भाव्यानि केपेल्लुकादीनि प्राकृतशैल्या भावुकान्युच्यन्ते अथवा प्रतियोगिनि सति तद्गुणापेक्षया तथा भवनशीलानि भावुकानि लषपतपदस्था भूवृषेत्यादावुकञ् तस्य ताच्छीलिकत्वादिति तद्विपरीतानि अभव्यानि चलादीनि लोके द्विविधानि द्विप्रकाराणि भवन्ति द्रव्याणि वस्तूनि वेडूर्यस्तत्र मणिः अभाव्यः ॥ अन्यद्रव्यैःकाचादिभिरिति गाथार्थः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानामेव संसर्गाद्गुणदोषौ भवतो भावुकद्रव्योपमत्वात्तेषां उत्कृष्टपुण्यपापानां त्वभावुकत्वेन न संसर्गात्कोऽपि विशेष इत्यर्थः ॥ २८ ॥ ततः किमित्याह—

मूलम्—अइसयपावियपावा धम्मियपव्वेसु तो वि पावरया ।
न चलंति सुद्धधम्मा धन्ना किविपावपव्वेसु ॥ २९ ॥

व्याख्या--इह द्वितीयपदमध्योपन्यस्तः तो शब्दश्च सम्बध्यते, तेन यस्मादुत्कृष्टपुण्यपापाः संसर्गेण न गृह्यन्ते। तो तस्मादतिशयमाधिक्यं प्रापितं नीतं पापमशुभं कर्म यैस्तेऽतिशयप्रापितपापाः । धार्मिकाणां पर्वाणि पर्युषणादीनि धार्मिकपर्वाणि तेषु अपिशब्दोऽत्र योज्यते, ततो धार्मिकपर्वस्वपि पापरता हिंसाद्यशुभारम्भासक्ता भवन्तीति शेषः। आस्तामन्यदा तेषां हि तथा स्वाभाव्यात्पाप एव सर्वदा रतिरुत्पद्यते, न शुभकर्मणि । यतः--कणकुंडगं जहित्ताणं विट्टं भुंजइ सूयरो। एवं सीलं चइत्ताणं दुस्सीले रमएमिए ॥ १२४ ॥ तथा न चलन्ति न स्पन्दन्ते शुद्धधर्मात् जिनप्रणीतधर्माद्धन्याः पुण्यवन्तः केऽप्यतिशयप्रापितधर्माणः पापपर्वस्वपीति गम्यम्। धर्मधीराणां हि स्वभाव एवायं यन्न्यायमार्गान्न चलन्ति यतः--निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्। अद्यैव वा मरणमस्तु युगान्तरे वा, न्यायात्पथः प्रविचलन्ति पदं न धीराः ॥१२५॥ ततोऽयमभिप्रायो यद्यपि धर्मे स्थिराणां पापपर्वस्वपि न चलति धर्माच्चित्तं तथापि सर्वथा तदनुवृत्त्यादि परिहर्त्तव्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मेवान्यथा तस्य तथा च दर्शनेनान्येषामभिनवधर्मादीनां तेषु प्रवृत्तिः स्यादित्यर्थः ॥ २९ ॥ एवं सुपर्वकुपर्वभेदेन पर्व-द्वैविध्यं प्रतिपाद्याधुना लक्ष्म्या द्वैविध्यमाह-

मूलम्—लच्छी वि हवइ दुविहा एगा पुरिसाण खवइ गुणरिद्धी ।
एगा य उल्हसंति अपुन्नपुन्नाणुभावाओ ॥ ३० ॥

व्याख्या-न केवलं पर्व द्विविधं लक्ष्मीरपि द्विविधा भवतीत्यपि शब्दार्थः द्वैविध्यमेवाह-एकाऽज्ञानकष्टादिकारणलब्धानां मनुष्याणां क्षपयति निरस्यति गुणा ज्ञानादयस्तेषां ऋद्धिः समृद्धिर्गुणर्द्धिस्तां।यतः-निद्रा मुद्रां विनैव स्फुटमपरमचैतन्यबीजं जनानाम्,लक्ष्मीरक्ष्णोंधभावः प्रकटमपटलः सन्निपातोऽत्रिदोषः।किं च क्षीराब्धिवासिन्यभजदियमपां सर्पणान्नीचगत्वं कल्लोलेभ्यश्चलत्वं स्मृतिमतिहरणं कालकूटच्छटाभ्यः॥१२६॥परैरालिङ्गिता यान्ति प्रस्खलन्ति पदे पदे ।अश्लिष्टानि च भाषन्ते धनिनो मद्यपा इव॥१२७॥तथा वरं विभवबन्ध्यन्ता सुजनभावभाजां, नृणामसाधुचरितार्जिता न पुनरूर्जिताः सम्पदः । कृशत्वमपि शोभते सहजमायतौ सुन्दरं, विपाकविरसा नतु स्वयथुसम्भवा स्थूलता॥१२८॥ तथा-एका पुनः सुपात्रवितीर्णशुद्धदानादिकारणेभ्यो जाता लक्ष्मीः उल्लसन्ती उत्तरोत्तरवृद्ध्या प्रकर्षं गच्छन्ती पुरुषाणां इति सम्बध्यते । गुणर्द्धिधनसार्थवाहशालिभद्रादीनामिव पुष्णातीति सामर्थ्याद् गम्यते, यदुक्तं-" मणिकणगरयणघणपूरियम्मि भवणम्मि सालिभद्दो



For Private and Personal Use Only

वि । अन्नो किर मज्झवि सामियत्ति जाओ विगयकामो ॥ १२९ ॥ कुत एतदेवमित्याह– अपुण्यं पापं पुण्यं धर्मस्तयोरनुभावः प्रभावस्तस्मात् अत्रायमर्थो बालतपः प्रभृतिकं पापहेतुत्वात् पापं तदनुभावजा लक्ष्मीर्गुणान्निरस्यति पुण्यानुबन्धिपुण्यप्रभवा तु सा गुणान् पुष्णाति । तत मिथ्यात्वनिबन्धने पुण्येऽपि न प्रवर्त्तनीयमित्यर्थः ॥ ३० ॥ एवं लक्ष्म्या द्वैविध्यं प्रतिपाद्याधुना गृहीतृदात्रोस्तस्या यथा पापनिबन्धनत्वेन गुणक्षपकत्वं स्यात्, तथाह–

मूलम्—गुरुणो भट्टा जाया सड्ढे थुणिऊण लिंति दाणाइं ।
दुन्निय अमुणियसारा दूसमसमयम्मि बुडंड्ति ॥ ३१ ॥

व्याख्या–गुरवो लिङ्गमात्रोपजीविनो भट्टा इव भट्टा बन्दिनः कीर्त्तिपाठका इत्यर्थः, त इव जाता जज्ञिरे । यतः- श्राद्धान् प्रवाहमात्रेणैव श्रावकत्वेन रुढान् स्तुत्वा–" यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । तथा गृहस्थमाश्रित्य सर्वे जीवन्ति ( साधवः ) चाश्रमाः॥ १३० ॥ तथा–हिमाचलः कीर्त्तिसुपरापगाया विवेकतिग्मद्युतिपूर्वशैलः । औचित्यचिन्तामणिरोहणाद्रि--गुणामराणां कनकाचलो यः ॥ १३१ ॥ इत्यादि कवित्वगीतपद्यादिभिः स्तुतिं कृत्वा, अथवा चाटुना वचनमात्रेण त्वं त्यागी भोगी त्वत्पूर्वजा अपि परोपकारिणो दानशौण्डा इत्यादिना स्तुत्वा लान्ति गृण्हन्ति दानानि देयद्रव्याणि पिण्डशय्या वस्त्रपात्रादीनि । भट्टा इति स्तुत्वेति चोपलक्षणं तेन नैमित्तिका इव निमित्तमन्त्रतन्त्रौषधस्वप्नविचारज्योतिः शास्त्रादिप्रयुज्य दानानि लान्ति ददाना अपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमेव चिन्तयन्ति, अहो एतेऽस्मत्कीर्त्तिं कुर्वते निमित्तकथनादिना चोपकुर्वते, अत एभ्यो यथेप्सितं दीयते । नतु मुधिकया ददति । सुगतये च मुधादानग्रहणे भवतः । यतः–" दुल्लहा हु मुहा दाई मुहा जीवीवि दुल्लहा । मुहा दाई मुहा जीवी दोवि गच्छंति सुग्गइ ॥ १३२ ॥ त्ति, ततः किमित्याह–द्वावपि दायकग्राहकौ श्रावकगुरू न केवलो गुरुरेवेत्यपि शब्दार्थः। प्राग् गुरव इत्यत्र श्राद्धानित्यत्र च बहुवचनं बहवो गुरवो बहवश्च श्राद्धा एवंविधा अधुनेति ज्ञापनार्थं इह च द्वाविति द्विवचनं तत्समुदायद्वयापेक्षयेति न दोषः । अमुणितसाराववज्ञातपरमार्थौ परमार्थश्चात्रायं "गिहिणो वेयावडियं न कुज्जा अभिवायणवंदणपूयणं चेति" । तथा--नक्खत्तं सुमिणं जोगं निमित्तं मंतभेसज्जं । गिहिणो तं न आइक्खे भूयाहिगरणं पयं ॥ १३३ ॥ एतत्कुर्वाणाश्च कुशीलाः स्युस्तादृशाश्च श्रावकस्यापि वन्दनानर्हा एव । यतः–" पासत्थो ओसन्नो होइ कुसीलो तहेव संसत्तो । अह च्छंदो वि य एए अवंदणिज्जा जिणमयंम्मि ॥ १३४ ॥ तद्वन्दने च प्रत्युतानर्थसम्भवात् । तदुक्तं--पासत्थाई वंदमाणस्स नेय कित्ती न निज्जरा होइ । कायकिलेसं एमेव कुणइ तह कम्मबंधं च ॥ १३५ ॥ एवंविधं परमार्थमजानानौ दुष्षमायां समायां प्रायो दुष्षमायामेवैवंविधगुरुश्रावकयोर्बाहुल्यमिति दुःषमाग्रहणम् । ब्रुडतो मज्जतो भवाम्बुधाविति शेषः । अयं भावो भट्टादिवत् श्राद्धान् स्तुत्वा तदग्रे च निमित्तादि प्रकाश्य ये दानं लान्ति ये च तादृशं दानं ददति । ते भवाम्बुधौ मज्जन्तीति । धर्मे स्थैर्यार्थं तु धन्यस्त्वं महाकुलप्रसूत इत्यादिकां स्तुतिमपि कुर्यात् शासनप्रभावनादिभिः कारणैर्निमित्तमपि प्रकाशयेदित्यर्थः ॥ ३१ ॥ प्रागुक्तमज्ञातपरमार्था ब्रुडन्ति सम्प्रति च तेषामेव बाहुल्यं पश्य-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न परमार्थज्ञस्तोकतां सकारणामाह—

मूलम्—मिच्छपवाहे रत्तो लोओ परमत्थजाणओ थोवो ।
गुरुणो गारवरसिया सुद्धं मग्गं निगूहंति ॥ ३२ ॥

व्याख्या-मिथ्याऽलीकः प्रवाहोऽविचारपूर्विका प्रवृत्तिर्मिथ्या प्रवाहस्तस्मिन् रक्त आसक्तो लोकः प्राणिलोको यतस्ततः परमार्थो देवगुरुधर्माणां सदसद्विचारस्तस्य ज्ञायको वेदिता स्तोकोऽल्पः मिथ्यात्विभ्यः सम्यक्त्वादि प्रतिपतितेभ्यश्च सम्यक्त्वादिसामायिकवतां स्वभावेनापि स्तोकत्वात् । यतः–" सम्मत्तदेसविरया पडिवन्ना संपई असंखिज्जा । संखेज्जा य चरित्ते तीसुवि पडिया अणंतगुणा॥१३६॥विशेषतो दुःषमायां द्रव्यक्षेत्रकालभावाद्यपेक्षयाऽतिस्तोको लोकः परमार्थज्ञायकः सम्यक्त्वादिमान् । ननु सन्त्येव तदुपदेष्टारो गुरवो, ये सर्वत्र परमार्थं ज्ञापयिष्यन्ति तथा च तज्ज्ञातारो बहवोऽपि भविष्यन्तीत्याशङ्क्याह--गुरवो दशमाश्चर्यमहिम्ना तादृशमुग्धजनविप्रतारकानामाचार्या गौरवरसिकाः ऋद्धिरससातलक्षणगौरवत्रयलम्पटाः शुद्धं मार्गमुत्सूत्रमलकलङ्करहिततपः संयमलक्षणं निगूहन्ति । ते हि ऋद्ध्यादिगौरवरसिका आत्मानं सुविहितत्वेन ख्यापयन्तः परमार्थपृच्छकलोकाग्रे शुद्धमार्गं निगूहन्ति । शुद्धमार्गकथने हि लोको माऽस्मत्तो विरंक्षीदिति । येन तादृशा एवंविधा एव भवन्ति, यतः–" परिभवइ उग्गकारी सुद्धं मग्गं निगूहए बालो । विहरइ साधागरुओ संजमविगलेसु खित्तेसु ॥१३७॥ ततश्च मिथ्या-

For Private and Personal Use Only

प्रवाहरतत्वेन परमार्थज्ञायको लोकः स्वभावत एव स्तोकः, तत्रापि गौरवरसिका गुरवः शुद्धं मार्गं निगूहन्ति, तेन विशेषतः परमार्थज्ञा स्तोकतेत्यर्थः ॥ ३२ ॥ अथ पुनः परमार्थज्ञा स्तोकतायां हेत्वन्तरमाह—

मूलम्----सव्वो वि अरिहं देवो सुगुरू गुरू भणइ नाममित्तेण ।
तेसिं सरूवं सुहयं पुण्णविहूणा न याणंति ॥ ३३ ॥

व्याख्या–सर्वोऽपि पारम्पर्यागतश्राद्धकुलोत्पन्नः समस्तोऽपि नैकः कश्चिदित्यपि शब्दार्थः । पृष्टः सन्निति गम्यं अर्हन् देवः सुगुरुश्च गुरुरुपलक्षणत्वादर्हदुक्तो धर्मश्च ममेति सामर्थ्यगम्यं इति नाममात्रेणाभिधानमात्रेण भणति कथयति विशेषमाह-- तेषां देवगुरुधर्माणां स्वरूपं परमार्थभूतः सद्भावः, तच्च--" यस्य सङ्क्लेशजननो रागो नास्त्येव सर्वथा । न च द्वेषोऽपि सत्त्वेषु शमेन्धनदवानलः ॥ १३८ ॥" इत्यादिरूपं स्वरूपमेव विशिनष्टि शुभदं कल्याणदं सुखदं वा मोक्षसुखदायकं पुण्यविहीनाः प्राक्कृतसुकृतरहिता न जानन्ति न विदन्ति यतः–सुद्धो बोहो सुगुरुहिं संगमो उवसमो दयालुत्तं । दक्खिन्नं करुणजउ लब्भंति न थोवपुन्नेहिं ॥ १३९ ॥ अर्थादधिकपुण्या जानन्ति इदमत्र हृदयम् । सर्वोऽपि नामश्रावकः पृष्टो ममार्हन्नेव देवो गुरवः सुसाधवो धर्मः केवलिप्रज्ञप्त एवेति नाममात्रेण कथयति, किलास्मद्वंशेऽयं च गुरुरयं धर्म इति कुलक्रमाभिमानमात्रग्रस्तो । न तु तत्स्वरूपं भगवद्गुणचिन्तनात्मकं कदाग्रहत्यागेन सुगुरुसेवारूपं च मिथ्यात्वपरिहारेण शुद्धधर्मसेवास्वभावं च पुण्यहीना न जानन्ति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुण्ययुक्ता एव केऽप्यल्पे जानन्तीत्यर्थः ॥ ३३॥ ननु तत्स्वरूपं पुण्यहीना न जानन्तीति किमुच्यते यावत्सन्त्येवाधुनापि शुद्धमार्गोपदेष्टारो यदुपदेशतो ज्ञास्यन्ति तत्स्वरूपमित्याशङ्क्याभिनिविष्टानामपुण्यभाजां मुग्धबुद्धीनां शुद्धमार्गप्ररूपकद्वेषिषु गुरुबुद्ध्या तत्स्वरूपापरिज्ञानमाह—

मूलम्—सुद्धा जिणआणरया केसिं पावाण हुंति सिरसूलं ।
जेसिं ते सिरसूलं केसिं मूढाण ते गुरुणो ॥३४ ॥

व्याख्या–शुद्धा निर्मलचित्ताः शुद्धत्वे कारणमाह–जिनाज्ञारतां भगवद्वचनासक्ता भगवद्वचनतो हि चित्तशुद्धिसम्भवादुक्तं च-"रागादयो मलाः खल्वागमसद्योगतो विगम एषां । तदयं क्रि(ये)यात एव हि पुष्टिः शुद्धिश्च चित्तस्य॥ १४०॥ केषाञ्चित्पापानां पापयुक्तानां भवन्ति जायन्ते शिरःशूलं मस्तकशूलमिव,शुद्धा हि शुद्धदेशनया पापानां त्रासकारिणो भवन्ति । यतः- "खुद्दमियाणं पुण सुद्धदेसणा सीहनायसमा " ततस्तेषां ते शिरः शूलमिति युक्तमेव । येषां च पापानां ते शुद्धाः शिरः शूलं केषांचिन्मूढानां निर्विवेकानां ते तादृशाः पापाः पापगुरवः सन्तीति वर्त्तते । मूढ ! त्वं चैवंविधगुर्वङ्गीकारे स्फुटमेव तेषां, ततः शुद्धा जिनाज्ञारता येषां शिरः शूलं तेऽपि केषांचिद् गुरवस्तेभ्यश्च शुद्धस्वरूपद्वेषिभ्यः कथं देवगुर्वादिस्वरूपज्ञानं भवतीत्यर्थः ॥३४॥ तर्हि तादृशानपि गुरुत्वेनाङ्गीकृतानवलोक्य तदनुकम्पया सविषादमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—हा हा गरु अकज्जं सामी नहु अत्थि कस्स पुक्करिमो ।
कह जिणवयणं कह सुगुरु सावया कहइ य अकज्जं ॥३५ ॥

व्याख्या--हाहा इति खेदातिरेके, गुरुकमतिगुरु अकार्यमकर्त्तव्यं यदेवंविधानामपि दुष्टानां गुरुत्वेनाङ्गीकारः । ननु तर्हि पूत्कारः क्रियतां यथा अकार्या पूत्कारभीता निवर्त्तन्ते । इत्यत आह--स्वामी सौराज्यसम्पादितसर्वलोकहितोदुर्नीतिनिवारणक्षमो राजा नहु नैवास्ति विद्यतेऽतः कस्याग्रे इति शेषः, पूत्कुर्म्महे अकार्यमित्याद्युच्चैः स्वरेण व्याहरणं विदध्महे । स्वामिनो ह्यग्रे पूत्कारे कृते तद्भिया स्वयमकार्यान्निवर्त्तन्ते , अकृत्यकारिणः स वा हठादपि निवर्त्तयति, तदभावे हि तदनर्थकमेव कुत एवमुच्यत इत्याह--' कहेति ' देशीभाषया कुत्र जिनवचनं सर्वज्ञवाक्यं सर्वनयसमूहमयं निखिलदोषकलंकमुक्तं कुत्र सुगुरुश्रावकाः सुगुरवश्च श्रावकाश्चेति द्वन्द्वः कुत्र चैदमकार्यं कुगुर्वंगीकारलक्षणं तदिदमत्र हृदयं जिनवचनं ह्येवं यत्सुगुरूक्तयुक्त्या व्यवहरन्नगर्हितो भवति । यथा--" धम्मज्जियं च ववहारं [बुद्धे] वुइढिहायरियं सया । तमायरंतो ववहारं गरिहं नाभिगच्छई ॥ १४१ ॥ सुगुरवश्च भावभिक्षवो यथा--" असिप्पजीवी अगिहे अमित्ते, जे इंदिए सव्वउ विप्पमुक्के । अणुक्कसाई लहु अप्पभक्खी, चेच्चागिहे एगचरे स भिक्खू ॥ १४२ ॥ " सुश्रावकाश्च सुविनिश्चितमतित्वादिगुणगणोपेता एव यथा--" सुविणिच्छिय एगमई धम्मंमि अणन्नदेवओ य पुणो । न य कुसुमएसु रज्जइ पुव्वावरबाहियत्थेसु ॥ १४३ ॥ " इत्या-



For Private and Personal Use Only

दि, तत एतत्सर्वं सुगतिप्रापकं कुत्र । कुत्र च दुर्गतिनिबन्धनं कुगुर्वङ्गीकारलक्षणमिदमकार्यं यतः--"उत्सूत्रोच्चयमूचुषः सुखजुषः सिद्धान्तपद्यामुषः, प्रोत्सर्पद्भवतापकापथपुषः सम्यग्दृशां विद्विषः ।ये क्षुद्राः प्रति जानते गुरुतया भूरीन् कुसूरीनहो । ते चुम्बन्ति सहस्रशः श्रमभरोदस्राश्चतस्रो गतीः ॥ १४४ ॥" तस्मात् कुगुरवस्त्याज्या एवेत्यर्थः, ॥ ३५ ॥ प्रागुक्तं गुरुकमकार्यं स्वामी नास्तीत्यादि, सम्प्रति तु तदकार्यं कुगुरुसंसर्गलक्षणं लघुकर्मतया मुमुक्षुरपि कोऽपि दुर्विदग्धैर्निन्द्यत इति सखेदमिदमाह—

मूलम्—सप्पे दिठ्ठे नासइ लोओ नहु कोइ किंपि अक्खेइ ।
जो चयइ कुगुरुसप्पं हा मूढा ! भणइ तं दुठ्ठं ॥ ३६ ॥

व्याख्या--सर्पे भुजंगे दृष्टे दर्शनपथमवतीर्णे नश्यति पलायते लोको जनो "नहु" नैव कोऽपि योऽत्यन्तं परपरिवादपरः सोऽपि तिष्ठत्वन्यः, किमपि क्लीबोऽयं कातरोऽयं यः सर्प दृष्ट्वाऽपि नश्यतीत्यादिरूपं किञ्चिदपि स्तोकमपीत्यर्थः आख्याति कथयति तस्येति गम्यते ।प्रत्युत पुण्यवानयं य एवंविधाद् भीमभुजङ्गमाद्(द)वञ्चित इत्यादिकां लोकस्तस्य प्रशंसां करोतीत्यर्थः ।यः कोऽपि लघुकर्मा त्यजति परिहरति सद्गुरूपदेशादिना कुगुरुसर्पं असंविग्नागीतार्थाचार्यभुजङ्गं, हा इति खेदे, मूढास्तादृशकुगुरुमोहमोहिताः कुगुरुमोहो मूढता स्फुटैव । यतः--" आहारार्थिनमुज्झितं गुणलवैरज्ञातशीलान्वयं, तादृग्वंशजतद्विधेन गुरुणा स्वार्थाय मुण्डीकृतम् । यद्विख्यातगुणा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्वया अपि जना लग्नोग्रगच्छग्रहा देवेभ्योऽधिकमर्चयन्ति महतो मोहस्य विजृम्भितम् ॥ १४५ ॥ भणन्ति कथयन्ति तं कुगुरुत्यागिनं दुष्टं दोषवन्तं किलानेन स्ववंशपारंपर्यागता अपि गुरवो मुक्ता इतिनिन्दन्ति । खेदश्चात्र अहो धन्योऽयं येनान्वया गता अपि कुगुरवो मुक्ताः, सुगुरुसेवया (चा) वाऽभिनिवेशित्यागेन सन्मार्गमधिश्रियदित्यादिस्तुतिस्थाने निन्दाकरणात् । ततोऽयमर्थः स्तोकभयहेतोः सर्पान्नश्यन्तं न कोऽपि निन्दति । अनन्तभयहेतुं कुगुरुं त्यजन्तं मूढा निन्दन्तीति भाव इति गाथार्थः ॥ ३६ ॥ अथ सर्प्पकुगुर्वोरन्तरदर्शनेन कुगुरुत्यागिनिन्दकस्य मूढत्वं द्रढयन् सर्वथा कुगुरुसेवानिवारणायाह—

मूलम्—सप्पो इक्कं मरणं कुगुरु अणंताइं देइ मरणाइं ।
तो वरिसप्पं गहिउं मा कुगुरुसेवणं भद्द ॥ ३७ ॥

व्याख्या- सर्प्पोऽतिदुष्टोऽपि तक्षकवासुकिनागादिः स्पृष्टो विराद्धो वा एकमित्येकवारमरणं वेद्यमानभवायुर्दलिकसर्वथाशाटलक्षणं ददातीति सम्बध्यते । तथा कुगुरुरगीतार्थासंविग्नाचार्यश्चाराधितोऽनन्तानि पर्यवसानरहितानि मरणानि प्रागुक्तस्वरूपाणि ददाति प्रयच्छति । यतः--केवलागीतार्थनिश्राया अप्यनन्तजन्ममरणहेतुत्वमुक्तम्, किं पुनः सर्वदोषदुष्टगुरुनिश्रायाः । तदुक्तं--" जं जयइ अगीयत्थो जं च अगीयत्थनिस्सिओ जयइ । वट्टावेइ य गच्छं अणंतसंसारिओ होइ ॥ १४६ ॥ " यस्मात्सर्प्पः स्पृष्टः सन् सकृन्मरणं ददाति कुगुरुस्त्वाश्रितोऽनन्तानि मर-



For Private and Personal Use Only

णानि ददातीति सर्प्पकुगुर्वोरन्तरं, अन्यच्च सर्प्पस्तु विराधितोऽपि यदि कदापि मारयति तदा सकृन्मारयति नाधिकं, कुगुरुश्चाराधितोऽपि अनन्तशो मारयति इति तयोर्विशेषः । तस्माद्वरं प्रधानं सर्प्पं गृहीतुमादातुमुद्यम इति वर्त्तते । मा निषेधे, कुगुरुसेवनं कुत्सितकृताचार्याराधनं कार्षीरित्यपि गम्यम् । भद्रेति श्रोतुरामन्त्रणं एतेन भद्रस्यैव शास्त्ररहस्यमाख्येयं न कुटिलस्य । यतो वेदेऽप्युक्तम्-" विद्याह वै ब्राह्मणमाजगाम गोपाय मामेव धिष्टेहमस्मि असूयकायातृजवेयतायनमां बूया वीर्यवती यथा स्यामिति । तदयमर्थः यस्मात्सर्पकुगुर्वोरेतावान्विशेषस्तस्मात् वरं सर्पशीर्षमणिग्रहणायोद्यमः नतु कुगुरुसेवनोद्यम इति । भो भद्र ? त्वमुच्यस इति भाव इति गाथार्थः ॥ ३७ ॥ प्राक् सर्पतोऽपि कुगुरुं दुष्टं भणता तत्त्याग उक्तोऽधुना पुनस्तद्दोषदर्शनेऽपि ये तान् गुरुबुद्धया नमन्ति तच्छलिता इति सनिर्वेदं वदन्नाह—

मूलम्—जिण आणा वि चयंता गुरुणो भणिऊण जं नमिज्जंति ।

ता किं कीरइ लोओ छलिओ गडरिपवाहेण ॥ ३८ ॥

व्याख्या-'जिण आणाविन्ति ',जिनो रागद्वेषजेता तस्य आज्ञा, " समिईकसायगारव इंदियमयबंभचेर-गुत्तीसु । सज्झायविणयतवसत्तिउयजयणासु विहियाणं ॥ १४७ ॥ " इत्यादिरूपा आदेशास्तां त्यजन्तोऽपि तद्भङ्गकरणद्वारेण मुञ्चन्तोऽपि पश्चान्निर्दिष्टोऽपि शब्दोऽत्र योज्यते स च योजित एव, ततस्तेऽपि गुरवो भणित्वा एतेऽस्मदीया धर्म्माचार्या इत्युक्त्वा एतेन तेषामौपचारिकमेव गुरुत्वं न वास्तवं, वास्तवं हि गुरुत्वं गुणेषु सत्सु भवति,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आज्ञाविराधकानां च सर्वगुणविराधकत्वेन निर्गुणत्वात् । यतः-" ' आणाइच्चिय चरणं तब्भंगे जाण किं न भग्गंति । आणं च अइक्कंतो कस्सा एसा कुणइ सेसं ॥ १४८ ॥ तेनागुरवोऽपि गुरव इति भणित्वा यन्नम्यन्ते मस्तकेन वंद इत्यादिप्रकारैः नमस्क्रियन्ते लोकैः ' ता ' तत्किं क्रियते किं विधीयते इति प्रतीकारासामर्थ्यसूचकं, यतो लोकश्छलितो वञ्चितो गड्डर्य ऊरण्यस्तासां प्रवाहो व्यवहारः स्थितिरिति यावत् गड्डरीप्रवाहो गड्डरीस्थितिः, यत्र क्वापि गर्त्तादावेका पतति तत्र सकलमपि यूथं स्वलाभानपेक्षितदनुमार्गेण पततीति । अत्र चगर्त्तापातोपमे कुत्रापि कार्ये कश्चित् केनापि कदाशयेन प्रवृत्तः तत्प्रत्ययात्तत्रान्यतरेषामविचारपूर्विका प्रवृत्तिर्लक्षणया गड्डरीप्रवाहशब्देन उच्यते तेन गड्डरीप्रवाहेण,इदमुक्तं भवति - यथा किल कश्चित् दुष्टप्रेतादिनाच्छलितो दुश्चिकित्स्यो भवति । एवं गड्डरीप्रवाहेण छलितो दुश्चिकित्स्योऽतः किं क्रियते प्रतीकाराभावेन प्रतीकाराभावश्चाज्ञाविराधकानामपि गुरव इति भणित्वा नमनेनात्यन्तताऽहितत्वात् । एवमेव संघपट्टकेऽपि प्रत्यपादि, यथा-" किं दिग्मोहमिताः किमन्धबधिराः किं योगचूर्णीकृताः, किं दैवोपहताः किमङ्गठगिता किं वा ग्रहावेशिताः । कृत्वा मूर्ध्नि पदं

---

१. उपदेशमालायां-आणाइ इति चिय इति निश्चयेन आणा इति आज्ञयैव चरणं चारित्रं जिनाज्ञापालनमेव चारित्रमित्यर्थः, तद्भङ्गे आज्ञाभङ्गे कृते सति हे शिष्य ! जानिहि किं न भग्नमित्यर्थः, आज्ञां जिनाज्ञामतिक्रान्तो यदि जिनाज्ञोल्लङ्घिता तर्हि कस्यादेशात् शेषमनुष्ठानादि करोति, आज्ञां विनानुष्ठानाचरणं विडम्बनैवेत्यर्थः ॥



For Private and Personal Use Only

श्रुतस्य यदमीदृष्टोरुदोषा अपि, व्यावृत्तिं कुपथाज्जडा न दधते सूर्यन्ति चैतत्कृते ॥ १४९ ॥ "[व्याख्या- किंशब्दाः सर्वेऽपि विकल्पार्थाः, किममी जडा दिग्मोहाः कुतश्चिद्दृष्टादिनिमित्तात् प्राच्यादिदिक्षु प्रतीच्यादिभ्रमस्त- मिताः प्राप्ताः अयमर्थः, यथा दिग्मूढाः प्राचीं प्रतीचीत्वेनाध्यवस्यन्तो लोकेन युक्त्या ज्ञापिततत्त्वा अपि तदध्यवसा- यान्न निवर्त्तन्ते,एवमेतेऽपि विदितकुपथदोषा अपि कुतोऽपि हेतोस्ततोऽनिवर्त्तमानास्तत्साम्यात्तथोच्यन्ते । किमन्धा न- यनहीना बधिरा उपहतश्रवणा अन्धाश्च बधिराश्चेति द्वन्द्वः, ते किमन्धाः किं बधिरा इत्यर्थः । यथाऽन्धा दृग्विकलत्वात् सम्यक्पन्थानमजानाना अपथमपि सत्पथतयाऽवगम्य तत्र गच्छन्तो हितैषिणा तत्त्वं ज्ञाप्यमाना अपि स्वग्रहान्न नि वर्त्तन्ते, यथा च बधिराः श्रुतिविकलत्वादनाकर्णयन्तो दुष्ट वैतालिकादिवचो निन्दार्थमपि स्तुत्यर्थतयाऽवगम्य तद्दानादौ प्रवर्त्तमानास्तत्त्वं बोधिता अपि स्वनिर्बन्धान्न निवर्त्तन्ते, एवमिमेऽपि सदोषमपि कुपथं स्वगच्छादिग्रहाभिर्दोषतयाऽवबु- ध्य ततोऽनिवर्त्तमानास्तथोच्यन्ते एवमुत्तरपदेष्वपि भावनीयम् । तथा किं वशीकरणादिहेतुरनेकद्रव्यमेलकः पादप्रलेपा- दिर्योगः तादृगेव नयनाञ्जनादिश्चूर्णं योगश्च चूर्णं च ते विद्येते येषामिति विग्रहे तदस्यास्तीति तान् अयोगचूर्णिनो यो- गचूर्णिनः कृता योगचूर्णिकृता अभूत् तद्भावे च्विः मस्तकादिषु योगचूर्णक्षेपेण वशीकृता इत्यर्थः । यथा केनापि धूर्त्तेन क्षिप्तयोगचूर्णाः पुमांस आत्मनोऽहितैषिणमपि तं हितैषितया मन्यमानाः केनापि तत्त्वं प्रतिपाद्यमाना अपि यो- गादिप्रभावेन तद्वचनकरणान्न निवर्त्तन्ते तथैतेऽपि कुपथादिति पूर्ववत् । किं दैवेन प्रतिकूलविधिनोपहताः सद्बुद्धि- भ्रंशं मापिताः । ते हि विधिवशेन विपर्यस्तमतित्वादकृत्यमपि स्तेयादिकं कृत्यतया मन्वानास्तत्त्वं प्रतिपाद्यमाना अपि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुर्दैवमहिम्ना ततो न निवर्त्तन्ते । तथैतेऽपि किं ' अंगेति ' पार्श्ववर्त्त्यामन्त्रणं किं ठगिता मन्त्रादिप्रयोगेण स्वायत्ती-कृताः । यथाहि-केचन केनापि दुर्मान्त्रिकेण वशीकरणमन्त्रेण तथाकृतास्तद्वचनमसमीचीनमप्यत्यन्तसमीचीनतयाऽभ्युपगच्छन्तस्तत्त्वमवगमिता अपि मन्त्रमहिम्ना न ततो निवर्त्तन्ते, एवमेतेऽपि किञ्चेति पक्षान्तरे ग्रहैर्भूतादिभिरावेशिताः कृतावेशा विहितशरीराधिष्ठाना इति यावत् । यथा भूताद्यधिष्ठितास्तदावेशाद्विधेया परिज्ञानेनाविधेयमपि पितृप्रहारादिकं विदधानास्ततो निवर्त्यमाना अपि न निवर्त्तन्ते, एवमेतेऽपि सदसद्विवेकविकलतया कुपथान्न निवर्त्तन्त । इति अत्र च दिग्मूढादि बहुविकल्पप्रदर्शनमाधुनिकश्राद्धलोकानामत्यन्तानिवर्त्यस्वगच्छग्रहग्रस्तत्त्वज्ञापनार्थं कृत्वा विधाय मूर्ध्नि शिरसि पदं पादं श्रुतस्य सिद्धान्तस्य सिद्धान्तोक्तातिक्रमेण निःशङ्कतया स्वगुरुलिङ्गिप्रवर्त्तिता सन्मार्गपोषणमेव श्रुतमूर्ध्नि पादकरणं श्रुतमूर्ध्नि पादन्यासे च तेषामिदं बीजं भगवत्सिद्धान्तो हि नैकान्तेनैव विहितानुष्ठानविधिनिष्ठ इत्यादि विवेकिनां निःश्रेयसाय भविष्यति, किं श्रुतेनेत्यन्तं लिङ्गिभिर्यदुक्तं–मूलपूर्वपक्षे तस्योपदेशस्य सततं तत् सकाशे श्रवणमिति एतच्चायुक्तम् । यतः–" नवि किञ्चि " ' इत्याद्यागमशकलस्येदमुत्तरार्द्धं, एसा तेसिं आणाकज्जे सच्चेण होयव्व'मिति अस्य चायमर्थः, एषा भगवतामाज्ञा यत्कार्ये सत्येन भवितव्यम्, कोऽर्थः कार्यं ज्ञानादित्रयं सत्यं च संयमः यथा यथा ज्ञानादिकं संयमश्चोत्सर्पतस्तथा तथा यतिना निर्मायं यतितव्यम्, यदाह–कज्जं नाणाईयं सच्चं पुण संजमो मुणेयव्वो । जह जह सो होइ थिरो तह २ कायव्वयं कुणसु ॥ १५० ॥ दोसा जेण निरुज्झंति जेण खिज्जंति पुव्वकम्माइं । सो सो मुक्खो वाओ रोगावत्थासु समणं व ॥ १५१ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न चागमे सुखलिप्सया किञ्चित्सूत्रितं, किं तर्हि यावता विना संयमज्ञानादियात्रा नोत्सर्प्पति, तावन्मात्रस्यैव विहितनिवारणस्य निवारितविधानस्य च भगवद्भिः पुष्टालम्बनेन कादाचित्कतया तत्रानुज्ञानात्।एवं च कथं श्रुतस्याव्यवस्थाभवन्मार्गस्य चौद्देशिकभोजनादेः सर्वस्यापि सार्वदिकतया निरङ्कुशत्वेन केवलसुखानुभवोद्देशेनैव प्रवृत्तेः । तथा च–तस्य महासावद्यत्वेन ज्ञानादियात्राहीयमाणत्वात् कथं प्रामाण्यमित्यहो अकलितगुणदोषविभागः स्वपक्षानुरागः खलानां यद्भगवन्मतस्याव्यवस्थापादनेन स्वमतस्योत्कर्षप्रदर्शनं । नहि तेजसः सकाशात् कदाचित्तमस उत्कर्षसम्भव इति । किञ्च तीर्थकरगणधरपूर्वधरादि सातिशयमहापुरुषविरहे सम्प्रति तत्सिद्धान्त एव नः प्रमाणम् । यदुक्तम्-"तो[नो] पिच्छामो सव्वन्नुणो सेयं न मणपज्जवजिणाई । नय चउदसदसपुव्वि--प्पमुहे विस्सुयसुयहरे वि ॥ १५२ ॥ एवं पि अम्हसरणं ताणं चक्खूगईपईवो य । भयवं ? सिद्धंतोच्चिय अविरुद्धो इट्ठदिट्ठेहिं ॥ १५३ ॥ तस्य च प्रामाण्यानभ्युपगमे तत्प्रणेतुर्भगवतोऽप्यप्रामाण्याभ्युपगमप्रसङ्गेन भवतस्तन्मूलरजोहरणादि वेषपरित्यागापत्तिः । यदुक्तं–" आणाएच्चिय चरणं तब्भंगे जाण किन्न भग्गंति । आणं च अइक्कंतो कस्साएसा कुणइ सेसं ॥ १५४ ॥ तथा चायं सुखाशया भवत्कल्पितः पन्था सकलोऽपि विशरारुतामापद्येतेत्यहो लाभमिच्छोर्नीत्या अपिव्ययः संवृत्तः । यदपि रुग्विणः कल्पतां यान्तीत्यादिश्लोकबलेन स्वप्रकल्पितक्रियायाः सुकुमाराया मोक्षाङ्गत्वसमर्थनं तदप्यसुन्दरं । तत एतच्छ्लोकार्थ एवमागमे विधीयते-' मउईए वि किरियाए कालेणारोगयं जह उवेंति । तह चेव उ निव्वाणं जीवा सिद्धंत किरियाए ॥ १ ॥ त्ति ', अत्र हि सिद्धान्तक्रियाया एव चिरन्तनमुनिक्रियापेक्षया कोमलाया

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपि निर्वाणाङ्गत्वं प्रतिपादितम् । ननु त्वदभिप्रेतोत्सूत्रक्रियाभासस्य अतो भवदभिमतक्रियाया उपदर्शितन्यायेन तद्विपर्ययप्रसाधनान्नैतत् श्लोकबलेन भवत्प्रकल्पितश्रुताप्रामाण्यसिद्धिः । एवं च लिङ्गिदेशनया श्रुतस्य मूर्ध्नि पदकरणमसाम्प्रतमपि कृत्वा यदमी प्रत्यक्षगोचराः श्रावकजनाः सुदृढगच्छग्रहग्रन्थयो दृष्टोरुदोषा अपि साक्षात्कृतगुरुतरपूर्वोदितकुपथापराधा अपि अदृष्टदोषा हि विवेकिनोऽपि कुपथादपि न निवर्त्तितुमीशते किं पुनरन्य इत्यपि शब्दार्थः । व्यावृत्तिमपसरणं कुपथात् अधिकृतात् कुमार्गात् जडाः स्वहिताहितविवेकशून्याः न दधते न चेतसि धारयन्ति न कुर्वन्तीत्यर्थः । न केवलं व्यावृत्तिं स्वयं न दधते, असूयन्ति च ईर्ष्यन्ति सगुणेऽपि दोषमारोपयन्तीति यावत्, चः समुच्चये, एतां कुपथव्यावृत्तिं करोति एतत्कृत् तस्मै 'क्रुधद्रुहेर्ष्येत्यादिना चतुर्थी महासत्त्वाय कस्मैचित् कुपथव्यावृत्तिविधायिने अत्र चोत्तरवाक्यार्थगतत्वेन प्रयुज्यमानो यच्छब्दोपादानं विनापि तदर्थं गमयति, यथा–'साधु चन्द्रमसि पुष्करैः कृतं मीलितं यदभिरामताधिकं इति' तेनायमर्थः, तेषां हि दृष्टदोषत्वात् कुपथात्तावत्स्वयं व्यावृत्तिः कर्त्तुं युक्ता । अथ कुतोऽपि हेतोः स्वयं न व्यावर्त्तन्ते तदा तद्व्यावृत्तिकारिणि प्रमोदो विधातुं सङ्गतः । यत्पुनरमीद्वयमध्यादेकमपि कर्त्तुं नोत्सहन्ते । प्रत्युत कुपथनिवृत्तिविधायिनि कस्मिन्नपि क्षुद्रोपद्रवाय यतन्ते, तत्किममी दिग्मोहमिता इत्यादि योज्यम् । तेनैतदुक्तं भवति--दिग्मूढादयो हि हितैषिणा व्यावर्त्तमाना अपि दिग्मोहादेर्व्यावृत्तिमात्रमेव न कुर्वन्ति, एते नूनं केवलं कुपथान्न व्यावर्त्तन्ते, यावता कुपथव्यावृत्तिकारिणेऽसूयंत्यपीति तेभ्योऽप्यमी कुत्सिता इति वृत्तार्थः] ॥ इति गाथार्थः ॥ ३८ ॥ ननु न वयं छलिताः किन्तु दाक्षिण्याज्जानाना अपि न तानाज्ञाविराधकान् मोक्तुं क्षमामहे । निर्दाक्षिण्यो



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हि बन्धुभिरपि त्यज्यते। यदुक्तं-" निर्दाक्षिण्यो मुच्यते बन्धुभृत्यै, स्तन्मुक्तस्य क्षीयतेऽस्य त्रिवर्गः। क्षीणे चाऽस्मिन् मेदिनी भारकारी, कारीषा भो जीवति व्यर्थमेव ॥१५५॥ इति " एवं परवचनमाकर्ण्य तेषां निर्दाक्षिण्यहेतुं प्रकटयन् कुगुरुत्यागदाक्षिण्यस्य मूढतामावेदयन्नाह—

मूलम्—निद्दक्खिन्नो लोओ जइ कुविमग्गेइ रुट्टिया खंडं।

कुगुरूण संग चयणे दक्खिन्नं ही महामोहो ॥ ३९ ॥

व्याख्या 'निद्दक्खिन्नेत्यादि' दाक्षिण्यमनुकूलता, जनचित्तानुवृत्तित्वमिति यावत् ततो निर्गतं दाक्षिण्यमनुकूलता यस्य स निर्दाक्षिण्यो लोको जनोऽस्तीति गम्यते। कथमित्याह-यदि कोऽपि रङ्कादिरतिक्षुत्मपीडितो दीनवदनो मार्गयति याचतेति चाटुवचनैरौहिका देशीभाषया पूपलिका तस्याः खण्डमेकदेशं निर्दाक्षिण्यतया तथापि न ददातीति शेषः आस्तां बहुदानदाक्षिण्यमिति। अथ च कुगुरूणामाज्ञाबाह्याचार्याणां सङ्गत्यजने संसर्गपरिहारे दाक्षिण्यं अहो अस्मद्वंश्यैरेत एव गुरुत्वेनाङ्गीकृता वयं चैतेषां गच्छे स्तम्भभूता अनेकाचार्योपाध्यायादिपदस्थापनाद्युत्सवकारिण एतैश्चास्मद्विम्बप्रतिष्ठादिविहितं तदमून् स्वगच्छमर्यादामुल्लङ्घ्य कथं त्यजाम इत्यादिरूपानुकूलत्वं, ही इति खेदे महामोहो महदज्ञानं इदमुवर्तं भवति, यत्पूपलिकाखण्डदानेऽपि न दाक्षिण्यं दुर्गदुर्गतिनिबन्धनकुगुरुत्यागे च दाक्षिण्यमिति। तन्नूनं भवाम्भोधिमज्जने मूढानां गच्छमुद्रा शिलायते। यदुक्तं-" जीवाः प्रमादमदिरा हृतहृद्यविद्या, अप्यन्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



था मुपथि सम्प्रति नोत्सहन्ते । हा मज्जनाय तु भवाम्भसि लिङ्गिभिः किं, गच्छस्थितिर्विनिहितेव गले शिलैषाम् ॥ १५६ ॥ अन्यथा तु विवेकोत्पन्नौ " जइ पुव्वपुरिसपरियागयं कालियं च दारिद्दं । ता तं नहु मोत्तव्वं इंतीए विउलरिद्धीए ॥ १५७ ॥ इति सञ्चिन्त्य क्रमायातदारिद्र्यतुल्यान् कुगुरून् मुञ्चन्न दाक्षिण्यं कुर्यादित्यर्थः ॥ ३९ ॥ प्राक् कुगुरुप्रतिपत्तॄणां मूढता उक्ता । सम्प्रति कुगुरूणां मूढतामाख्यातुं तद्दुष्टत्वस्य दुर्निवार्यतामुद्भावयन्नाह—

मूलम्—किं भणिमो किं करिमो ताण हयासाण धिट्ठदुट्ठाणं ।
जे दंसिऊण लिंगं खिवंति नरयम्मि मुद्धजणं ॥ ४० ॥

व्याख्या–' किं भणिमोत्यादि ' किं भणामः किं ब्रूमः प्रज्ञापनानर्हत्वात् । यतः–" को दाहि उवएसं चरणालसयाण दुव्वियड्ढाणं । इंदस्स देवलोगो न कहिज्जइ जाणमाणस्स ॥ १५८ ॥ अपि तु न किञ्चिदित्यर्थः । तथा किं कुर्म्मः उपकारापकारयोर्म्मध्ये किं विदध्महे अपि तु न किञ्चिदित्यर्थः । यतः–" सीहंधलोयणुग्घाडयव्वसो आवयं लहइ " इत्यादि दृष्टान्तेन तदुपकारस्यानर्थहेतुत्वात् अपकारस्य च पुण्यवतामकर्त्तव्यत्वात् केषामित्याह- तेषामनन्तरमेव निर्दिश्यमानस्वरूपाणां कीदृशानां तेषां हताशानां हता निरस्ता आशोत्तरोत्तरकल्याणाभिलाषरूपा येषां यैर्वा ते तथा तेषां तथा धृष्टास्तत्तदकृत्यकरणे प्रगल्भा दुष्टा दोषवन्तः ततो द्वन्द्वः तेषां । तेषां केषा-



For Private and Personal Use Only

मित्याह- ये निर्दिष्टनामानो दर्शयित्वा प्रदर्श्य लिङ्गं रजोहरणमुखानन्तकादिकं "सुविहियदुव्विहियं वा नाहं जाणामि-खु छउमत्थो । लिंगं तु पूययामि तिगरणसुद्धेण भावेण ॥१॥ इत्यादि" केवलव्यवहारनयाश्रितदेशनया 'लिङ्गमात्रमेव पूज्यमिति कथयित्वा क्षिपन्ति नयन्ति नरके श्वभ्रे मुग्धजनं विवेकविकलं लोकं स्ववन्दापनादिजनितदोषेण दोषश्च तन्नमने स्फुट एव, श्रुते- यथा " जह वेलं बगलिंगं जाणंतस्स नमओ धुवं दोसो । निद्धंधसत्ति नाऊण वंदमाणे धुवं दोसो ॥ १५९ ॥ इह च नरकग्रहणं सर्वदुर्गतिदुःखोपलक्षणं ततो ये दुष्टा मुग्धजनं चातुर्गतिकसंसारदोषे क्षिपन्ति तेषां किं भणामः किं कुर्म्म इत्यादिगाथार्थः ॥४०॥ एवं कुगुरूणां दुष्टत्वनिर्वायत्वकथनेन मूढतामुद्भाव्येदानीं मूढानां चरित्रदर्शनादमूढेषु भक्तिर्दृढा भवतीति विवक्षुः स्तुतिव्याजेन तेषां निन्दामाह—

मूलम्—कुगुरू वि संसिमोहं जेसिं मोहाइ चंडिमा दट्ठुं ।
सुगुरूण मुवरि भत्ती अइनिबिडा होइ भव्वाणं ॥ ४१ ॥

व्याख्या—' कुगुरूवित्यादि' कुगुरूनपि न केवलं सुगुरूनित्यपेरर्थः, प्रशंसामि स्तवीमि प्राकृतत्वादेकत्वेऽपि बहुत्वनिर्देशः यथा"थुणिमो दीणमणोऽहमित्यत्र अहमित्यात्मनिर्देशे येषां कुगुरूणां मोहोऽज्ञानं स आदिर्येषां रागद्वेषादीनां ते मोहोदयस्तैश्चण्डिमा रौद्रत्वं भूरिभयहेतुत्वमित्यर्थः ।तं मोहादिचण्डिमानं दृष्ट्वा विलोक्य सुगुरूणामुपरि-सुविहितगीतार्थगुरुविषये भक्तिर्गौरवविशेषोऽनितिबिडा सान्द्रतरा भवति, भव्यानां मोक्षगमनार्हाणां । कोऽर्थः कुगुरू-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णामस्मदीयामी श्राद्धाः किमस्मान् विहायान्यत्र भक्तिं कुर्वन्तीत्यादि मोहवशगा द्वेषेण वयममीषामुपरि शिर उदर-स्फोटनं करिष्यामः । तान् वा सुविहितान् लकुटादिभिस्ताडयिष्यामो येऽस्मदीयान् श्राद्धान् विप्रतारयन्ति, इत्यादिभिः प्रकारैश्चण्डिमानं दृष्ट्वा भव्यानां तेष्वनादरेणाहो धन्या अमी सुविहिता ये एवंविधेऽपि विषमकाले ममताद्युज्झिता निरपेक्षमेव धर्मोपदेशं ददति । द्रव्यलिङ्गिकृतोपसर्गेभ्यश्च न बिभ्यतीति, सुगुरुषु निबिडा भक्तिर्भवति । अन्यथा यदि ते प्रतिपक्षभूता न स्युस्तदा सर्वेष्वपि सुविहितेषु समानेष्वादरानादरकृतो विशेषो न स्यात् । यथा दुर्जनान्विना सुजनेषु नादरः स्यात् । यदुक्तं–नापकारीखलश्चेत्त स्यात्सज्जनं कः स्मरेदपि । उपकारः कृते किं स्या–न्नीरोगाणां भिषक् स्मृतिः ॥ १६० ॥ ततस्तान् प्रशंसामि सुगुरुषु दृढानुरागोत्पादकतामात्रेण न तु तद्गुणवर्णनेनेति गाथार्थः ॥ ४१ ॥ ननु गुरुचण्डिम्ना सर्वेऽप्येते एवंविधा एव व्रतिन इत्यादिरूपानास्थैवोत्पद्यते । ननु सुगुरुषु दृढा भक्तिस्तत्कथमुच्यते--निबिडा भक्तिर्भवतीत्याशङ्क्य सम्यग्दृशामेवं भवतीति प्रतिपादयन्नाह—

मूलम्—जह जह तुट्टइ धम्मो जह जह दुट्ठाण होइ इह उदओ ।
सम्मदिट्ठिजियाणं तह तह उल्हसइ सम्मत्तं ॥ ४२ ॥

व्याख्या– ' जह जह इत्यादि ' यथा यथा त्रुटयति अल्पीभवति दुर्लभः स्यादिति यावत् धर्मः श्रुतचारित्रलक्षणः कालादिदोषात् । यतः–' संघपट्टके '--सैषा हुण्डावसर्पिण्यनुसमयहसद्भव्यभावानुभावा, त्रि-



For Private and Personal Use Only

शश्चोग्रग्रहोऽयं खखनखमितवर्षस्थितिर्भस्मराशिः । अन्त्यं चाश्चर्यमेतज्जिनमतहतये तत्समा दुःषमा चे-त्येवं दुष्टेषु पुष्टेष्वनुकलमधुना दुर्लभो जैनमार्गः ॥ १६१ ॥ [व्याख्या–या आगमग्रन्थेष्वागामितया-लिखिताकर्ण्यते सा एषा सम्प्रति प्रत्यक्षकालस्याप्रत्यक्ष्यत्वेऽपि तदुद्भवकार्याणां प्रत्यक्षोपलम्भेनोपचारादे-षेत्युक्तं अवसर्प्पन्ति प्रतिक्षणमायुःशरीरप्रमाणादयो भावा हानिं गच्छन्ति प्राणिनामस्यामित्यवसर्प्पि-णी सिद्धान्तप्रसिद्धः कालविशेषः । हुण्डं सकलाङ्गोपाङ्गानां यथोक्तमानवैकल्यहेतुः षष्ठं संस्थानं तेनोपल-क्षिता अवसर्पिणी हुण्डावसर्पिणी व्युत्पत्तिमात्रं चेदं. तत्त्वतस्त्वनन्ततमकालभाव्यसंयतपूजानिबन्धनं चैत्यवा-स्युत्पादहेतुः, शुभभावहानिकारणं कालभेदो हुण्डावसर्प्पिणी सा च भगवति मोक्षं गते जातेति, समयः प-रमसूक्ष्मः कालस्ततश्चानुसमयं प्रति भव्यानां मुक्तिगामिनां अथवा भव्याः शुभा भावाः परिणामा अनुभावाश्च प्रभावा मतिनिश्चया वा ततश्च ह्रसन्तो हीयमाना भव्यभावानुभावा यस्यां सा तथा । हुण्डावसर्पिण्यां हि कालस्वाभा-व्याद् धर्मार्थिनामपि प्रायेण भावा यादृशा वर्त्तमानक्षणे, न तादृशा क्षणान्तर इत्यादि क्रमेण प्रति क्षणं सङ्क्लेशता-रतम्याध्राततयोपजायमाना उपलभ्यन्ते । तथा च प्रकरणकारेणैव प्रकरणान्तरे प्रदर्शितं, " कालस्स अइकिलिट्ठत्त-णेण अइसेसिपुरिसविरहेण । पायमजुगत्तेण य गुरुकम्मत्तेण य जियाण ॥ १६२ ॥ किर मुणिय जि-णमया वि हु अंगीकय सरिसधम्ममग्गा वि । पायमइसंकिलिट्ठा धम्मत्थी वित्थ दीसंति ॥ १६३ ॥ अत्र च ह्रसदित्यनेन संयोगपरत्वेऽपि पूर्ववर्णस्य न गुरुत्वं, च्छंदःशास्त्रे व्यवस्थितयानुवृत्त्या क्वचित्तन्निषेधात् । तथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिंशः जिनसिद्धान्तोक्ताष्टाशीतिग्रहमध्यात्रिंशतः पूरणः,चः समुच्चये उग्रग्रहो जिनप्रवचनस्योदग्रोपसर्गवर्गकारित्वाद्दारुणो ग्रहः,अयमेष प्रत्यक्षोपलभ्यमानकार्यो भस्मराशिनामा खमाकाशं तस्य च शून्यत्वात्खमिति गणितव्यवहारे शून्यस्य बिन्दोः संज्ञा नखा इति च विंशतेः संज्ञा, नखानां विंशतिसंख्यत्वात् ततश्च खं च नखाश्चेति द्वन्द्वः तैः पश्चानुपूर्व्या अङ्करचनया स्थापितितैर्मितानि परिसंख्यातानि वर्षाणि संवत्सराः स्थितिरेकस्मिन् रासाववस्थानं यस्य स तथा,एकराशौ वर्षसहस्रद्वयस्थितिक इत्यर्थः ।स हि ग्रहो भगवन्निर्वाणकालानन्तरं वर्षसहस्रद्वयं यावत् क्रूरत्वाद् भगवज्जन्मराशौ सङ्क्रान्तत्वाद् भगवन्तं च मुक्तत्वेन दुःखीकर्त्तुमशक्तत्वात् तत्पक्षतयैव प्रवचनस्य बाधां करिष्यति । दृश्यते च लोकेऽपि कश्चित् कस्यचित्स्वप्रतिपक्षस्य किञ्चिदपकर्त्तुमपारयन्नेतदपकारेणापि तस्यापकृतं भविष्यतीति मूढतया मनसि निधाय तत्पक्षं तत्सदृशं चापकुर्वाणः । यदुक्तं-" त्वं विनिर्जितमनोभवरूपः सा तु सुन्दर ! भवत्यनुरक्ता । पंचभिर्युगपदे च शरैस्तां, ताडयत्यनुशयादिव कामः ॥ १६४ ॥ तथा- [1] यस्य किञ्चिदपकर्त्तुमक्षमः, कायनिग्रहगृहीतविग्रहः । [2] कान्तवक्त्रसदृशाकृतिं कृती, राहुरिन्दुमधुनापि बाधते ॥ १६५ ॥ तथाऽन्त्यं दशमं षः पूर्ववत् आश्चर्यं अनन्ततमकालभावित्वादद्भुतमसंयतपूजाख्यं एतदिदानीं प्रत्यक्षं जिनमतहतये आर्हन्तप्रवचनापभ्राजनापादनाय ।तत्समानैः प्रागुक्तैस्त्रिभिः समा तुल्यबला दुष्षमा दुष्टा लोकदुःखकारिण्य समा वर्षाणि यस्यां सा तथा कालचक्रस्य षडरकस्य पञ्चमोऽरकः यथा प्राक्तनास्त्रयः समुदिता जिनमतं निघ्नन्ति । तथा चतुर्थी दुष्षमापि । यदुक्तं—

१. हरः, २. हरिः इन्द्रः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्कर्षवत्पुरुषसिंहवियोगतोऽमी, भस्मग्रहप्रभृतयोऽहितवारणा ही । जैनं मतं भुवि महावनमस्तशङ्का, भङ्क्तुं कथं सपदि सम्प्रति सम्प्रवृत्ताः ॥ १६६ ॥ चः पूर्ववत्, इति प्रकरणे एषु प्रकृतेषु हुण्डावसर्प्पिण्यादिषु एवं प्रदर्शितप्रकारेण प्रतिपदं सुविहितलाघवासंयतगौरवापादनलक्षणादुष्टकार्यदर्शनाद्दुष्टेष्विव दुष्टेषु क्रूरेषु पुष्टेषु प्रकर्षकोटिं प्राप्तेषु हुण्डावसर्प्पिण्यादिषु चतुर्षु अनुकलं प्रतिसमयं अधुना साम्प्रतं दुर्लभो दुरापो जैनमार्गप्रतिपत्तिविघ्नकारिणां हुण्डावसर्प्पिण्यादीनां पुष्टत्वात् तन्महिम्ना च भूयोलोकस्य भवाभिनन्दित्वात् कतिपयसात्त्विकजनोपादेय इति यावत् । जैनमार्गः प्रतिश्रोतोरूपभगवत्पथ एतन्मध्यादेकोऽपि दुष्टपुष्टः स्वकार्यकरणसमर्थः,किं पुनः सम्प्रति सर्वेऽपि मिलिताः । ततो यथा दुष्टेषु चरटादिषु प्रभविष्णुषु पुरादिमार्गो जिगमिषतां दुर्गमो भवति । तथा भगवन्मार्गोऽप्यधुनैतेषु सत्स्वपि, आगमेऽप्युक्तं-- दूसमहुंडावसप्पिणि भसमग्गहपीडियं इमं तित्थं । तेण कसाया जाया कूरा इह संजयाणंपि॥१६७॥अनुश्रोतोरूपस्तु जैनमार्ग इदानीमपि सुलभः,येषामेव हुण्डावसर्प्पिण्यादीनां सन्मार्गप्रवृत्तिं प्रति प्रातिकूल्यं तेषामेवासन्मार्गप्रवृत्तिं प्रत्यानुकूल्यादिति "इत्थं यद्यपि लिङ्गिभिः प्रकटिता भूपृष्ठकृत्स्नावनी, रुद्यत्र प्रमितावतः श्रुतपथावज्ञानसंज्ञान्वितैः । कल्पेनापि कलावता कलयितुं साकल्यतो दुःशकाः, सम्बोधाय तथापि मूढमनसामेषा दिगादर्शिता ॥ १ ॥ इति वृत्तार्थः] ॥ यथा यथा च दुष्टानां दुर्जनानां धर्मद्वेषिणामित्यर्थो भवति स्यात् इह काले उदय उन्नतिः कालमाहात्म्यादेव ।यतः-"धर्मःप्रव्रजितस्तपः कपटितं सत्यं च दूरे गतं,पृथ्वी मन्दफला नृपाश्च कुटिला लौल्यार्थिनो लिङ्गिनः । देशाश्च प्रलयं गता करभरैर्लोभं गताः पार्थिवा,साधुः

For Private and Personal Use Only

सीदति दुर्जनः प्रभवति प्रायः प्रविष्टः कलिः॥१६८॥ क्वचित् 'उदओत्ति' पाठः,स च स्पष्ट एव, ततः सम्यग्दृष्टिजीवानां सम्यक्त्ववतां प्राणिनां तथा तथोल्लसति प्रकर्षं प्राप्नोति सम्यक्त्वं दर्शनं, अयमाशयः ते हि सम्यग्दृष्टयो यथा यथा कालमहिम्ना धर्म्महानिं दुष्टोदयं च पश्यति । तथा तथा तेषां " उवगरणवत्थपत्ताइयाण वसहीण सड्ढयाणं च । जुज्झिसंतिकएणं जह नरवइणो कुडुंबीणं ॥ १ ॥ कलहकरा डमरकरा असमाहिकरा अनिव्वुइकरा य होहिंति । इत्थ समणा दससु वि खित्तेसु सयराहं ॥ २ ॥ " इत्यादि भगवदुक्तमनागतवचनमविसंवादि दृष्ट्वा अहो भगवतां सर्वज्ञानां वचनं कालत्रयेऽपि न विसंवदतीति भगवत्यास्थातिरेकात्क्रियतां च साधूनामेवंविधेऽपि विषमकाले संयमदार्ढ्यदर्शनात् सम्यक्त्वमुल्लसतीत्यर्थः ॥ ४२ ॥ ननु यथा दुष्टानामुदयोऽस्ति तथा ' धर्म्मेजयः पापे क्षय इति लोकोक्तेः सम्प्रत्यपि धर्म्मस्यात्युदयः, किं न स्यादित्याशंक्याह—

मूलम्—जय जंतु जणणितुल्ले अइउदओ जं न जिणमए होइ ।
तं किठकालसंभव-जियाण अइपावमाहप्पं ॥ ४३ ॥

व्याख्या-' जय जंतु इत्यादि ' जगज्जन्तुजननीतुल्ये त्रिभुवनप्राणिमातृकल्पे इति षष्ठीसप्तम्योरर्थं प्रत्यभेदाज्जगज्जन्तुजननीकल्पस्येत्यर्थः । एवमन्यत्रापि जननीतुल्यत्वं च हितत्वात् हितत्वं च " सव्वे जीवा वि इच्छंति जीविउ न मरिज्जिउं । तम्हा पाणिवहं घोरं जावज्जीवाइ वज्जए ॥ १ ॥ " इत्यादि समर्थनात् अत्युदयस्तीर्थंकरकाल-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावी यन्न जिनमतस्यार्हच्छासनस्य भवति तत् विलष्टकालसम्भवजीवानामतिपापमाहात्म्यं, तत्र रागद्वेषाभिनिवेशाः क्लेशहेतुत्वात्कालोऽपि विलष्टः स चासौ कालश्च विलष्टकालस्तत्र सम्भव उत्पत्तिर्येषां ते तथा ते च ते जीवाश्च विलष्टकालसम्भवजीवास्तेषामतिपापमुत्कर्षवत् दुरितं तस्य माहात्म्यं महिमा ते हि विलष्टकालोत्पन्नाः स्वयं नष्टाः परानपि नाशयन्ति । तदुक्तं-" कालाइदोसवसओ घणकम्मकिट्ठ, चित्ततणेण य जणा बहुसंकिलेसा । तो लिंगिणो य गिहिणो य दढं विमूढा, किं किं न जं अणुचियं चिरमायरंति ॥ १६९ ॥ नट्ठा य ते संयमसंगकुहेउज्जुत्ती, अन्नेसि नासणकए बहुहा वयंति । पायंजणासयमईय अभाविभद्दा; तं चेव तत्तमिव लिंति चयंति मग्गं॥१७०॥ततस्तत्कृतकुदेशनादि पापमाहात्म्याज्जगज्जन्तुजननीकल्पस्यापि जिनमतस्य नात्युदयो भवति उदयमात्रं तु दुष्प्रसहं यावदस्त्येवेति गाथार्थः ॥ ४३ ॥ अथ येषां पापमाहात्म्याज्जिनमतस्य नात्युदयस्तेषामेव पापपूर्णत्वं यथा स्यात्तथाहि—

मूलम्—धम्ममि जस्स माया मिच्छत्तगहो उस्सुत्त नो संका ।
कुगुरुवि करइ सुगुरू विउसो वि स पावपुन्नत्ति ॥ ४४ ॥

व्याख्या-' धम्मम्मीत्यादि' विद्वानपि केवलमविद्वान् पापपूर्णो भवतीत्यध्याहारेणान्वयः विद्वत्त्वं चेह शास्त्रज्ञतामात्रेण न, परमार्थतः पारमार्थिकं हि विद्वत्त्वं विवेकिन एव भवति । "कः पण्डितो ? विवेकी"ति वचनात् विवेके

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च सति पापपूर्णत्वाभाव इति स इत्यादौ चैकवचनं जात्यपेक्षया तादृशव्यक्तीनां सम्प्रत्यनेकत्वात् स क इत्याह-यस्य ध-र्म्मे प्रागुक्तस्वरूपे माया वञ्चनात्मिका लाभपूजाख्यात्यर्थं धर्म्मं करोति न मोक्षाय । एते लोका मां सुविहितमवगच्छ-न्तु इति लोकदृष्ट्या सामाचारीं करोत्यन्यथा त्वन्यथैवेति माया इयं च निषिद्धा ॥ यतः- उपदेशमालायां " धम्मम्मि नत्थि माया न य कवडं आणुवित्ति भणियं वा । फुडपागडमकुडिल्लं धम्मवयणमुज्जयं जाण ॥ १७१ ॥ न वि धम्मस्स भडक्का उक्कोडा वंचणा य कवडं वा । निच्छम्मो किर धम्मो सदेव मणुया सुरे लोए ॥ १७२ ॥ [ व्याख्या-धर्मे सत्ये साधुधर्मविषये माया नास्ति मायाधर्मयोरत्यन्तवैरित्वादित्यर्थः । न च कपटं परवञ्चनं धर्मे वर्त्तते आणुवित्ति परावर्ज(र्ज)नार्थं मायाकारि(अ)नुवृत्तिवञ्चनं तस्य भणितं भाषणं,'फुडत्ति स्पष्टा क्षरं प्रकटं लज्जाभावेन अकुटिलं निर्मायित्वेन एतादृशं धर्मवचनं 'उज्जूयं' इति ऋजु सरलं मोक्षकारणं अहो उत्तम! एवं जानीहि ॥ १७३ ' नविति ' नविति न भवति ' धम्मस्सति' धर्मस्य साधनं कस्मात् ' भडक्का ' इति अत्याडम्बरद-र्शनात् 'उक्कोडा' इदं यदि मह्यं ददाति तदा मदीयं करोमीति तृष्णया'वञ्चणा'इति परवञ्चनं तेन वा धर्मस्य सा-धनं नास्ति । वाऽथवा " कवड " इति मायाचेष्टया किर इति निश्चयेन धर्म्मो निश्छद्मो निष्कपटो वर्त्तते देवा विमा-नवासिनो मनुजा मृत्युलोकवासिनो असुरा पातालवासिनस्तैः सह वर्त्तमाने एतादृशे लोके तीर्थंकरैर्निष्कपटो धर्म उक्तइत्यर्थः ॥ १६२ ॥ तथा मिथ्यात्वग्रहोऽतत्त्वाभिनिवेशः किलास्मद्गुरुभिरिदमुपदिष्टं तर्हि वयं युक्तमयुक्तं चेदमेव कुर्म्मो नान्यदिति । मिथ्याग्रहो नत्वेवं चिन्तयन्ति युक्तियुक्तं वचो ग्राह्यं नायुक्तं,गुरुगौरवादिति तथोत्सूत्रस्यागमविरु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ङ्कस्य नो शङ्का नो भयं उच्छृङ्खलतयोत्सूत्रं जल्पति, ननु अल्पादपि मृषावादाद् गौरवादिषु सम्भवः। अन्यथा वदतां जैनीं वाचं त्वहह का गतिरित्यादि विचिन्त्य बिभेति। तथा कुगुरूनपि करोति सुगुरून् य इति गम्यते कुगुरून् पूर्वोक्तलक्षणानपि तत्पक्षपातितया सुगुरुत्वेन प्रतिपादयतीत्यर्थः। तादृशानां च साधुत्ववादे मृषावाददोषप्रसङ्गादाह-दशवैकालिके "बहवे इमे असाहू लोए वुच्चंति साहूणो न लवे। असाहुं साहुत्ति साहुसाहुत्ति आलवे॥ १॥ तस्माद्येषां धर्म्मे माया मिथ्यात्वग्रह उत्सूत्रे न शङ्का ये च कुगुरून् सुगुरून् कुर्वन्ति। ते विद्वांसोऽपि पापपूर्णा इति गाथार्थः॥ ४४॥ निषिद्धाचरणेन पापपूर्णतोक्ता प्राक् तावता चानिषिद्धाचरणमादिष्टं तदप्याज्ञयैव फलदमन्यथा त्वन्यथेत्येतदधुनाह—

मूलम्—किच्चंपि धम्मकिच्चं पूयापमुहं जिणिंदआणाए।
भूयमणुग्गहरहियं आणाभंगाओ दुहदायं॥ ४५॥

व्याख्या-'किच्चंपीत्यादि' कृत्यं करणीयं अपिशब्दो भिन्नक्रमः स चाग्रे योक्ष्यते किं तदित्याह-धर्मकृत्यं धर्मकार्यं तदेव नामग्राहमाह—पूजाप्रमुखमपि-देवपूजाप्रमुखमपि प्रमुखशब्देन सामायिकवन्दनप्रतिक्रमणपौषधजिनभवनविधापनप्रत्याख्यानादिग्रहः, कयेत्याह—जिनेन्द्राज्ञया जिनोक्तानुसारेण पूजाप्रमुखमपि धर्मकृत्यं जिनाज्ञयैव कृत्यं करणीयं यथा सुखदं स्यादिति शेषः, आज्ञा च पूजाविषयैवं। तद्यथा-" काले सुइ भूइएणं विसिट्ठपुप्फाइहिं विहिणाओ। सा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रथुइं थुत्तगरुई जिणपूया होइ कायव्वा ॥१॥ " आज्ञया पूजा विधेयेत्यस्मिन्नर्थे ' श्रीसंघपट्टकवृत्तौ ' श्रीजिनपतिसूरिभिर्बहु प्रपञ्चितमस्ति तत्तत एवावसेयम् । सामायिकादिविषयाश्चाज्ञा आवश्यकादिशास्त्रेभ्योऽवसेयाः, तदेव पूजाप्रमुखं भूतानुग्रहरहितं मकारोऽत्रालाक्षणिकः जीवानुकम्पोज्झितमाज्ञाभङ्गात् दुःखदायिदुःखदानस्वभावं, अयमाशयः—देवपूजादिकं हि सर्वं भगवद्भिर्जीवरक्षार्थमेवादिष्टं तेनैव भावपूजाधिकारिणां पुष्पाद्यपि निवारितं ' तो कसिणसंयमविऊ पुप्फाईयं न इच्छती'ति वचनात् येऽपि च द्रव्यपूजाधिकारिणः ते तु स्वत एव कायवधे प्रवृत्ताः सन्ति । ततो द्रव्यपूजार्थं सापेक्षाः सानुकम्पा यतनया " भूमीपेहणजलछाणणाइ जयणाउ होइ ण्हाणादीत्यादि " रूपया तथा प्रतिमाङ्गलग्नं कुन्थ्वादि निरीक्ष्य तदपसारणाद्यर्थं ' घरपडिमाउ जिणाणं पमज्जए वयणकयकोसो ' इत्यादिरूपया च प्रवर्त्तमाना द्रव्यतः कमपि कायवधं, कुर्वन्तोऽपि भावतो रागद्वेषरहितत्वात्ते भूतानुग्रहवन्त एव । यतः—" यतनातोन च हिंसा, यस्मादेषैव तन्निवृत्तिफला । तदधिकनिवृत्तिभावाद्विहितमतोऽदुष्टमेतदिति ॥ १७३ ॥ तथा--एयाहिं तो वुड्ढा विरया रक्खंति जेण पुढवाई । इत्तो निव्वाणगया अबाहया आभवमिमाणं ॥ ॥ १७४ ॥ या तु भूप्रेक्षणजलगालनकुन्थुप्रमार्जनादियतनारहिता भूतकातिसन्धानादिरूपा च पूजा सा भूतानुग्रहरहितैवाज्ञाभङ्गरूपत्वात्तस्यास्ततश्च पापसिद्धिः तदुक्तं--"शास्त्रबहुमानतः खलु सच्चेष्टातश्च धर्मनिष्पत्तिः । परपीडात्यागेन च विपर्ययात्पापसिद्धिरिति ॥ १७५ ॥ तथा—वचनाराधनया खलु धर्मस्तद्बाधया त्वधर्म इति । इदमत्र धर्मगुह्यं सर्वस्वं चैतदेवास्य ॥ १७६ ॥ तस्माद्यथा भगवदाज्ञा तथैव यतनापूर्वकं धर्मकृत्यं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृत्यं भगवदाज्ञां विना तु कृतमप्यन्यथा फलं स्यादिति भावः ॥ ४५ ॥ धर्मकृत्यमप्याज्ञाकृतं सुखदं स्यादन्यथा कृतं त्वन्यथा स्यादित्युक्तमथ पुनः सर्वमनुष्ठानं कुर्वतामप्याज्ञाविराधकानां मूढतां दर्शयन् तदेवाह—

मूलम्—कट्ठं करंति अप्पं दमंति दव्वं चयंति धम्मत्थी ।
इक्कं न चयइ उस्सुत्त-विसलवं जेण बुड्डंति ॥ ४६ ॥

व्याख्या–' कट्ठं करं ' इत्यादि, कष्टं पीडासहनात्मकं सम्यक् लोचविधानं ह्यनुपानकत्वमथ धरा शय्या महद्वयं रजन्याः स्वापः शीतोष्णसहनं च ? षष्ठाष्टमादिरूपं चित्रं बाह्यतपो महाकष्टं अल्पोपकरणसन्धारणं च तत् शुद्धता चैवेत्यादिरूपं कुर्वन्ति विदधति । तथात्मानं दमयंति इन्द्रियनोइन्द्रियदमेन तथा द्रव्यं धनं, यदुक्तं ' उपदेशमालायां '-" छेओ भेओ वसणं आयासलेसं किं भयविवागो यं । मरणं धम्मब्भंसो अरइं अत्थाओ सव्वाइं ॥ [ व्याख्या--' छेओ ' इति छेदः कर्णादीनां कर्त्तनं, भेदः क्रकचादिना पाटनं स्वजनादिभिः सह चित्तविश्लेषो वा व्यसनमापत् आयासो द्रव्योपार्जनार्थं स्वयं कृतशरीरक्लेशः, क्लेशो विबाधा पीडेति यावत्, भयं त्रासः परिग्रहाज्जायते, विवादः कलहः, चशब्दः समुच्चयार्थे मरणं प्राणत्यागः, धर्मभ्रंशः श्रुतचारित्रलक्षणधर्मात् च्यवनं सदाचारविलोपो वा अरतिश्चित्तोद्वेगः, एतानि च सर्वाण्यपि अर्थाद्भवन्ति अतोऽनर्थमूलोऽयमर्थ इत्यर्थः, अर्थ्यते विवेकविकलैः प्रार्थ्यते इत्यर्थो हिरण्यादिरिति व्युत्पत्तिः इत्यादि ज्ञात्वा त्यजति जहति धर्मार्थिनः सुकृतेप्सवः,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परमेकं न त्यजन्ति अज्ञानाद् गुरुनियोगाद्वा ॥ यतः--" सम्मद्दिट्ठी जीवो उवइट्ठए वयणंपि सद्दहइ । सद्दहइ असब्भावं अणाभोगा गुरुनिओगा वा ॥ १७८ ॥ किं तदित्याह--उत्सूत्रविषलवं सूत्रातिक्रान्तमुत्सूत्रं तदेव विषलव इवानर्थहेतुत्वात् विषलवस्तं येनोत्सूत्रविषलवेन हेतुभूतेन ब्रुडन्ति दुःखसागर इति गम्यम् । यथा--कश्चिद्विषलवभक्षणेन मधुरादिद्रव्यं भक्षयन्नपि तत्कृतश्वासरोधादिदुःखसागरे मज्जति । तथा मूर्खाः शेषकष्टानि कुर्वाणा अपि विषलवतुल्येनोत्सूत्रेणानन्तदुःखसागरे संसारे ब्रुडन्ति । यतः--" उस्सुत्तमायरंतो बंधइ कम्मं सुचिक्कणं जीवो । संसारं च पवड्ढइ मायामोसं च कुव्वइ य ॥ १७८ ॥ ततो बालाः कदाग्रहग्रस्ता उत्सूत्रं न त्यजन्ति । शेषं कष्टानि कुर्वन्तोऽपीति हा कष्टमित्यर्थः ॥ ४६ ॥ एवमुत्सूत्रभाषिणां मूढतां प्रतिपाद्याधुना शुद्धा शुद्धसङ्गफलप्रतिपादनेन तत्सङ्गत्यागोपदेशमाह—

मूलम्—सुद्धविहिधम्मरागो वड्ढइ सुद्धाण संगमे सुयणु ।
सोविय असुद्ध संगे निउणाण विगलइ अणुदियहं ॥ ४७ ॥

'सुद्धवित्यादि' शुद्धविधिधर्मरागः शुद्धो विधिरागमोक्तः करणप्रकारः शुद्धविधिः स चासौ धर्मश्च तत्र रागः-प्रीतिर्वर्द्धते स्फीतिर्भवति । शुद्धानां निर्मलाचारवतां सुसाधुनामिति यावत् सङ्गमे संसर्गे भोः सुजना एतेन च सम्बोधनपदेनात्र योग्येभ्य एवोपदेशो देय इत्युक्तं ॥ यतः--" योग्येभ्यस्तु प्रयत्नेन, देयोऽयं विधिनान्वितैः । मात्स- ॥ ५० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

र्यविरहेणोच्चैः, श्रेयो विघ्नप्रशान्तये ॥ १७९ ॥ साधवो विशुद्धत्वात् शुद्धमेव विधिधर्म्मविषयं प्रयुञ्जते । अतस्तत्सङ्गमात्त्त्रैव रागो भवति सोऽपि च अपिशब्द एव शब्दार्थस्ततश्च स एव शुद्धविधिधर्म्मरागोऽशुद्धानामुत्सूत्रभापकपार्श्वस्थादीनां सङ्गे निपुणानामपि विधिविदुराणामपि किं पुनरनिपुणानां नश्यति गलति अनुदिनं अनुदिवसं प्रतिदिनं । यतः, उपदेशमालायां–आलावो संवासो वीसंभो संथवोपसंगो य । हीणायारेहिं समं सव्वजिणिंदेहिं पडिकुट्ठो ॥ १८० ॥ अन्नुन्न जंपिएहिं हसिउद्धसिएहिं खिप्पमाणो य । पासत्थ मज्झयारे बला जइ वाउली होइ ॥१८१॥ [ व्याख्या--'आलावो' इति, आलापः पार्श्वस्थेन सार्द्धं जल्पनं, संवासः तेन सार्द्धमेकत्र वासः,विस्रम्भो विश्वासः,संस्तवः परिचयः,प्रसङ्गो वस्त्रादिग्रहणार्पणादिव्यवहारो हीनाचारैः पार्श्वस्थादिभिः समं सार्द्धं एते पदार्थाः सर्वजिनेन्द्रैः सर्वतीर्थङ्करैः ऋषभादिभिः'पडिकुट्ठो' इति निषिद्धाः एकैकापेक्षया एकवचनं ॥ ' अन्नुन्न इति ' अन्योन्यं परस्परं जल्पितैर्भाषितैः विकथादिकथनैरित्यर्थः, हसितैर्हास्यै उद्धसितै रोमोद्गमैः कृत्वा 'खिप्पमाणो अ' इति पार्श्वस्थादिभिः प्रेर्यमाणः पार्श्वस्थानां मध्ये बलादपि हठादपि यतिर्व्याकुलो भवति स्वधर्माद् भ्रष्टो भवतीत्यर्थः, अतस्तत्सङ्गमस्त्याज्य एवेत्यर्थः ॥ ] इदमुक्तं भवति साधून् विधौ प्रवर्त्तमानान् दृष्ट्वा तत्सङ्गाद्विधिसेवायामनुरागो जायतेऽसाधूंश्चोच्छृङ्खलत्वेन प्रवर्त्तमानान् दृष्ट्वा विधिरागो गलति तद्दाक्षिण्यादिना तस्मादुत्सूत्रभाषकाशुद्धसङ्गतिस्त्याज्या । यतः–" यदि त्वं मत्सङ्गरतो भविष्यसि भविष्यसि । उतासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ १८२ ॥ इत्यर्थः । प्राक् शुद्धाशुद्धयोः सङ्गस्येष्टानिष्टफलत्वाख्यानेना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





साधुसङ्गत्याग उक्तः, अधुना तादृशबलविकलस्य तत्सकाशे वासमपि निषेधयन्नाह—

मूलम्—जो सेवइ सुद्धगुरू असुद्धलोयाण सो महासन्नू ।
तम्हा ताण सया से बलरहिओ मा वसिज्जासु ॥ ४८ ॥

व्याख्या–' जो सेवईत्यादि ' यः कोऽपि मिथ्याभिनिवेशक्षयोपशमवान् सेवते आश्रयति शुद्धगुरून् संविग्नगीतार्थसुविहिताचार्यान् अशुद्धलोकानां मिथ्यात्ववासितमतीनां अर्थाल्लिङ्गिनां स महाशत्रुरिव महाशत्रुर्म्महावैरी ते हि तावत्साधूनेव न क्षमन्ते । यतः संघपट्टके--" सम्यग्मार्गपुषः प्रशान्तवपुषः प्रीत्युल्लसच्चक्षुषः, श्रामण्यर्द्धिमुपेयुषः स्मयमुषः कन्दर्प्पकक्षप्लुषः । सिद्धान्ताध्वनि तस्थुषः शमजुषः सत्पूज्यतां जग्मुषः, सत्साधून् विदुषः खलाः कृतदुषः क्षाम्यन्ति नोद्यद्द्रुषः ॥ १८३ ॥ [ व्याख्या-' सम्यक्मार्ग ' इत्यादि, खलाः सत्साधून् न क्षाम्यन्तीति सम्बन्धः । तत्र खला गुणिमत्सरिणः प्रकरणाल्लिङ्गिनः कृतदुष इति, दुषधातुः क्विबन्तोऽत्र दोषपर्यायस्ततश्च कृता विहिता दुषो दोषाः स्वयमनेकेऽनर्था यैस्ते तथा तत्स्वभावत्वात्तेषां अथवा कृता आरोपिता दुषो दोषा यैस्ते तथा निर्मलेष्वपि सन्मुनिगुणेषु लोकमध्ये लाघवापादनाय स्वधिया विहितदोषारोपा इत्यर्थः। गुणवत्स्वसद्दोषारोपणस्य तेषां कुलव्रतत्वात्, ते हि तद्गुणानसहमानास्तान्निन्दन्ति, उद्यद्द्रुषः निर्निमित्तं सुविहितदर्शनमात्रेणैव प्रकटितललाटतटभ्रुकुट्यादिक्रोधविकाराः न क्षाम्यन्ति न सहन्ते द्वीषन्तीत्यर्थः। अत्र देशेऽमीषां प्रचारेण वयं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोकस्याऽगौरवा भविष्याम इत्यादिबुद्ध्या मात्सर्यात्तत्रावस्थातुमेव तेषां न ददतीत्यर्थः । सत्साधून् सुविहितयतीन् सत्साधुत्वमेवानुगुणविशेषणैस्तेषां भावयति–सम्यग्मार्गपुषः-भगवत्प्रणीतज्ञानादित्रयरूपमोक्षपथस्य भव्यानां शुद्धोपदेशप्रतिबोधद्वारेण विस्तारकान्, एतेन तेषामुत्सूत्रभाषणप्रतिषेधमाह–प्रशान्तवपुषः–बहिरलक्षितरागादिविकारशरीरभाजः एतेनान्तरमपि प्रबलरागाद्यभावं प्रकाशयति ।अन्तस्तदभावे बहिः सर्वदा प्रशान्तत्वानुपपत्तेः ।प्रीतोल्लसच्चक्षुषः–द्विष्टानपि प्रतीत्य प्रसन्नोत्फुल्ललोचनाः एतेन बहिः कोपविकारपरिहारमाविष्करोति श्रामण्यर्द्धि–प्राणातिपातविरमणादिपञ्चमहाव्रतविभूतिमुपेयुष आसेदुषः,एतेन दीक्षामूलं सर्वविरतिसम्पदं दर्शयति-स्मयमुषः–अहङ्कारतिरस्कारिणः एतेन वाग्मित्वविद्वत्वादावभिमानहेतौ सत्यपि तदभावं प्रकटयति-सत्सूत्रक्रियाभिः कन्दर्प्पकक्षप्लुषः–मन्मथशुष्कतृणदाहिनः एतेन सर्वव्रतमध्ये निरपवादब्रह्मव्रतदाढर्यं द्रढयति । सिद्धान्ताध्वनि–शुद्धागममार्गे तस्थुषः स्थितवतस्तत्परानित्यर्थः।एतेन स्वयमुत्सूत्रक्रियानिषेधं प्रतिपादयति । शमजुषः–क्षमाभाजः एतेनान्तरपि क्रोधनिरासं ज्ञापयति।सत्पूज्यतां–विवेकिजनसेव्यतां जग्मुषः प्राप्तुषः एतेन सकलश्रमणगुणसम्पत्तिमाविर्भावयति-निर्गुणानां -विवेकिलोकपूजनाऽसम्भवात्।विदुषः विचक्षणान् एतेन स्वसमयपरसमयसारविदुरतां विस्फारयति । न चैवं गुणशालिषु यतिषु द्वेषः कर्त्तुं युक्तः, अणीयसोऽपि तद्द्वेषस्य सकलगुणिगतगुणद्वेषरूपत्वेनानन्तभवभ्रमणनिबन्धत्वात् । यदुक्तम्—सम्यक्त्वज्ञानशीलस्पृश इह गुणिनः साधवोऽगाधमेधा, स्तेषु द्वेषो गुणानां गुणिभिरभिदया वस्तुतः स्याद् गुणेषु । सर्वस्थानां गुणानामवगमनमतोऽन्हाय मिथ्यात्वमस्मात्त-स्माद् भूयोभवाब्धिभ्रमणमिति गुणिद्वेषधीर्व्वर्ज्जनीया ॥१८४॥सिद्धा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्तेऽप्यभिहितम्—।' भरहेरवयविदेहे पन्नरस वि कम्मभूमिया साहू। एक्कंमि हीलियम्मि सव्वे ते हीलिया हुंति ॥१८५॥ संतगुणच्छायणा खलु परपरिवाओ य होइ अलियं च। धम्मे वि अबहुमाणो साहु पओसे य संसारो ॥१८६॥'' ततः प्रेक्षावता गुणिषु बहुमान एव कर्त्तव्यो न द्वेष इति वृत्तार्थः ]॥ कुतस्तरां तदाश्रितान् ये हि यदाराध्यं ते न क्षमन्ते। तदाराधकान् सुतरां न क्षमन्ते। प्रत्युत तेषां गुणानेव दूषयन्ति, तल्लाघवापादनायासन्तमपि दोषमारोप्य। यथा-" लाभार्थं मलिनांशुके कितवतां कष्टक्रियाधायिनि, प्राहुर्दाम्भिकतामभिग्रहरुचौ पंक्त्यर्थतां[1] क्षन्तरि। गुप्ताङ्गे बकवृत्तितां च तपसा शंस्ये[2] नमस्येच्छुता मित्थं हन्त न दूषयन्ति यतिनां हि लिङ्गिनः कान् गुणान् ॥ १८७ ॥ अथवा— तद्गुणानसहिष्णवस्तान्निन्दन्ति। तदुक्तं·बाणानिव गुणान् कर्णमागतानसहिष्णवः। पीडापादनतोऽव्रीडा निन्दन्ति गुणिनः खलाः ॥ १८८ ॥ यस्मात्ते सुगुरुसेवकाः गुणवत्त्वात्। शुद्धानां वैरिणः तस्मात्कारणात्तेषामशुद्धानामशुद्धता च परगुणध्वंसकत्वात् तेषां, यतः-विध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वं। अन्तरितशशिरुचामपि सलिलमुचां मलिनिमाभ्याधिकः ॥ १८९ ॥ सका समीपे बलरहितः सामर्थ्यविकलः सामर्थ्यं च द्विविधमान्तरं बाह्यं च तत्रान्तरं बलं धर्म्मं कुर्वन्निर्भीकः, यदुक्तं–होइ समत्थो धम्मं कुणमाणो जो न बीहइ परेसिं। माइपिइसामिगुरुमाइयाण धम्माण भिन्नाण ॥ १९० ॥ बाह्यं तु स्वामिस्वजनविभवशरीरादिकसा-

१ कीर्त्यर्थतां २ प्राधान्ये



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मर्थ्यं ताभ्यां द्विविधाभ्यां बलाभ्यां रहितो मा वसेः मा निवासं कुर्याः । ते ह्यशुद्धा निर्बलं तं सुगुरुसेवकं परिभवेयुरतिविषमत्वात् तेषां । यतः—विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः । यदयं न कुलद्वेषी सकुलद्वेषी पुनः पिशुनः ॥१९१॥ तस्मात् स्वबलमपेक्ष्यैव तत्र वस्तव्यं, अन्यथा तत्र वासे तदुत्पादितभयाद्धर्म्मभ्रंशः स्यादित्यर्थः ॥ ४८ ॥ तत्रावसने कारणमाह—

मूलम्—समयविऊ असमत्था सुसमत्था जत्थ जिणमए अविऊ ।
तत्थ न वड्ढइ धम्मो पराभवं लहइ गुणरागी ॥ ४९ ॥

व्याख्या—'समयविऊत्ति' समयविदः सिद्धान्तसूत्रार्थज्ञायका असमर्थाः सामर्थ्यरहिताः सामर्थ्यराहित्यं च समयविदां क्वचित् क्षेत्रकालमहिम्नैव भवति यथोक्तमन्योक्त्या—" भेकेन क्वणता सरोषपरुषं यत्कृष्णसर्प्पानने, दातुं कर्णचपेटमुद्धतधिया हस्तः समुल्लासितः । यच्चाधोमुखमक्षिणी विदधता तेनापि तन्मर्षितं, तन्मन्ये विषमन्त्रिणो बलवतः कस्यापि लीलायितम् ॥ १९२ ॥ अन्यथा तूत्सर्गापवादादिसकलनयस्वरूपविदां तेषां सर्वत्र सामर्थ्यमेव सुसमर्थाः, सामर्थ्यवतो यत्र क्षेत्रे काले वा जिनमतस्य सर्वज्ञशासनस्याविदो ज्ञायकाः तेषामपि सामर्थ्यं कालादिदोषादेवान्यथा तु जिनसमयाऽवेदिनां निश्चयव्यवहाराकुशलानां कुतः सामर्थ्यावकाशः। अत एव तादृशानामपि महत्त्वमवलोक्य केनचित् सनिर्वेदमन्योक्तिरभाणि,तद्यथा-"प्रातः पूष्णा भवति महते नोपतापाय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्मात्कालेनास्तं क इव न गता यान्ति यास्यन्ति चान्ये । एतावत्तु व्यथयति यदा, लोकबाह्यैस्तमोभि-स्तस्मिन्नैव प्रकृतिमहति व्योम्नि लब्धोऽवकाशः ॥ १९३ ॥ ततश्च यत्र जिनमतविदोऽसमर्थाः सुसमर्थाश्च जिनमताविदः तत्र तस्मिन् क्षेत्रे वा न वर्द्धते न वृद्धिं प्राप्नोति धर्म्मः श्रुतचारित्ररूपः, किन्तु पराभवमभिभवं लभते प्राप्नोति गुणरागी गुणा ज्ञानादयस्तेषु रागवान् तिष्ठन्निति गम्यते । जिनमताविदिनां खलानां तत्परिभवननिपुणत्वात् यतः–अतिमलिने कर्त्तव्ये भवति खलानां विशेषनिपुणा धीः । तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः ॥ १९४ ॥ तस्मात्तत्र न वस्तव्यमित्यर्थः ॥ ४९ ॥ प्रागशुद्धानां सहवासो निषिद्धः, अधुना पुनस्तेषां धर्म्मकरणेऽपि दोषमाह—

मूलम्—जं न करइ अइभावं उम्मग्गसेवी समत्थओ धम्मे ।
ता लट्ठं अह कुज्जा ता पीडइ सुद्धधम्मत्थी ॥ ५० ॥

व्याख्या--'जं न करेत्ति' यत् न करोति न विधत्ते किमित्याहातिभावमतिश्रद्धां क इत्याह--उन्मार्ग्गसेवी अ-सन्मार्गप्ररूपकादिरभिनिविष्ट इत्यर्थः, किं विशिष्टः समर्थकः कप्रत्ययोऽत्र कुत्सार्थस्तेन कुत्सितशरीरादिसामर्थ्ययुक्तः कुत्सितत्वं चोन्मार्गसेवित्वादेव,क्वातिभावं न करोतीत्याह–धर्म्मे प्रागुक्तरूपे तल्लष्टं शोभनं लष्टत्वं चायोग्यत्वात्तस्य । यतः--वज्र इवाभेद्यमनाः परिकथने चालनीव यो रिक्तः । कलुषयति यथा महिषः पूनकवद्दोषमादत्ते ॥



For Private and Personal Use Only

१९५ ॥ अयोग्यस्य च धर्म्मक्रिया निषेधात् । यदुक्तं--" अहिगारिणा खु धम्मो कायव्वो अणहिगारिणो दोसो । आणाभंगाओ च्चिय धम्मो आणाए पडिबंधो ॥ १९६ ॥ तेनोन्मार्गसेवी यद्धर्म्मेऽतिभावं न करोति तल्लष्टं उक्तदोषाभावादिति भावः । अथ कुर्याच्छिदध्यात् सोऽपि यद्यतिभावं धर्म्मे इति सम्बध्यते तर्हि पीडयति व्यथयति शुद्धधर्म्मार्थिनो निर्मलपुण्याभिलाषिणः,सहि धर्म्मे भावं कुर्वन्नपि स्वाग्रहमत्यजन् स्वसाम्यापादनाय शुद्ध-धर्म्मार्थिनोऽपि हीलया पीडयति, यदुक्तं- दुःषमासमयभाविजिनशासनाशुभभावसूचकस्वप्नाष्टकान्तस्थवानरस्वप्न फलं विवृण्वता श्रीहरिभद्रसूरिणा--" बहुवानरमज्झगया तव्वसहा असुइणा विलिंपंति । अप्पाणं अन्ने वि य तहाविहे लोगहसणं च ॥ १९७ ॥ " विरलाणमलिंपणया तदन्नखिसा न एय मसुइत्ति । सुमिणोयं एयस्स उ विवागमो नवरमायरिया ॥ १९८ ॥ किल कस्यचित्पार्थिवस्य स्वदृष्टस्वप्नफलं पर्यनुयुञ्जानस्य भगवान् श्रीमहावीरः समादिदेश, मयि मुक्तिमुपेयुषि सूरय एवंविधा भविष्यन्ति यथा चापलादिना वानरयूथाविपकल्पा आचार्या बहवः पुरीषतुल्योत्सूत्रप्ररूपणेनात्मानं पार्श्ववर्त्तिनश्च धेक्ष्यन्ति, विरलतराश्च तन्मध्यान्नात्मानं नाप्यन्यान् लेप्स्यन्ति । तथा-चात्मानमुत्सूत्रेणाऽऽदिहानांस्तानवलोक्य ते हसिष्यन्ति। अहो एते बालिशाः शुद्धसिद्धान्तदेशनामलयजरसेन सुरभिणाऽनेन नात्मानं चर्च्चयन्तीति हीलनेन पीडयन्ति । अयं भावः-- यद्युन्मार्गसेवी धर्मे भावं कुर्यात् तदा महिषो जलमिव स्वस्यान्यस्य च चेतः कलुषयन स्वोत्प्रेक्षिताभिनिवेशवशाच्छुद्धधर्मार्थिनः पीडयेत् तस्माद्यस्तत्र स भावं न कुर्यात्तल्लष्टमित्यर्थः ॥९० ॥ अथ यथा शुद्धधर्मार्थिनां पीडा न स्यात्तथाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—जइ सव्वसावयाणं एगत्त जंतुमिच्छवायम्मि ।
धम्मट्ठियाण सुंदर ता कहणु पराभवं कुज्जा ॥ ५१ ॥

व्याख्या--' जइ सव्वेत्ति ' यदीत्यभ्युपगमे स चाग्रे योक्ष्यते सर्वश्रावकाणां निखिलनाममात्रधारकश्रमणोपासकानां एकत्वमेकीभावो यत्तु यत्पुनर्मिथ्यावादे मिथ्यात्ववादविषये वर्त्तत इति गम्यम्, मिथ्यावादश्चैवं--मुग्धश्रावकाणां अत्र चैत्ये वयमेव स्नात्रारात्रिकमङ्गलदीपाद्यधिकारिणो, नास्मान् विनाऽन्येनात्रैतत्कर्त्तव्यम्, तथा सत्या चण्डिकादिगोत्रदेवतापूजायां निषिद्धाः सर्वेऽप्येकमुखेनैव वदन्ति । किलास्मत्पूर्वजैः सर्वैरियमर्चिता तत्कथमस्माभिस्तेभ्यो लष्टतरैर्भूत्वाऽधुना भवद्वाक्यान् मुच्यते। तथा--अस्मासु सत्सु कथमभूतपूर्वः सुविहितानां प्रवेशकोत्सवो भवतीत्याद्यनेकविधः यत्तदोर्नित्याभिसम्बन्धात्तदेकत्वं यदि धर्मार्थिनां निर्मलसुकृताभिलाषुकाणां धर्मविधिवादे भवतीति वाक्यशेषः । तत्र चैत्यविधिरेवम्, श्रीचित्रकूटस्थवीरचैत्यप्रशस्तौ श्रीजिनवल्लभसूरिभिः प्रत्यपादि—अत्रोत्सूत्रजनक्रमो न च न च स्नात्रं रजन्यां सदा, साधूनां ममताश्रयो न च न च स्त्रीणां प्रवेशो निशि । जातिज्ञातिकदाग्रहो न च न च श्राद्धेषु ताम्बूलमित्याज्ञात्रेयमनिश्रिते विधिकृते श्रीजैनचैत्यालये ॥ १९९ ॥ इह न खलु निषेधः कस्यचिद्वन्दनादौ, श्रुतविधिबहुमानी त्वत्र सर्वोऽधिकारी । त्रिचतुरजनदृष्ट्या चात्र चैत्यार्थवृद्धि-- व्ययविनिमयरक्षा चैत्यकृत्यादिकार्यम् ॥ २०० ॥ व्याख्या— अत्रेति विधिचैत्ये, उत्सूत्रजना-



For Private and Personal Use Only

नामुत्सूत्रभाषिणां यत्यादीनां क्रमो व्याख्याननन्द्यादिकरणाधिकारो नास्ति । किं तदुत्सूत्रमिति चेत्, उच्यते– स्वमतिकल्पितमागमोत्तीर्णं तद्विसंवादि चानुष्ठानं, यदाह–'उस्सुत्तमणुवइट्ठं सच्छंदविगप्पियं अणणुवाइत्ति'कथं पुनरेतदुत्सूत्रं जिनसदने जायते । इति चेत् उच्यते–गृहिणा स्ववित्तेन देववित्तेन वा भाटकादिहेतुकदेवद्रव्यवृद्धये यद्देवनिमित्तं स्थावरादिनिष्पादनं तथा महार्घानेहसि विक्रयेण बहुदेवद्रविणोत्पादनाय गृहिणा यद्देवधनेन समर्घधान्यसङ्ग्रहणं तथा यद्देवहेतवे कूपवाटिकाक्षेत्रादिविधानं तथा शुल्कादिषु भाण्डमुद्दिश्य राजग्राह्यभागाधिककरोत्पादनादुत्पन्नेन द्रविणेन यद्गृहिणा देवपूजनविधानमित्थमेवमादीन्युत्सूत्रपदानि यतिदेशनया देवगृहेऽपि सम्भवन्ति । यदुक्तं— " उस्सुत्तं पुण इत्थं थावरपाओगकूवकरणाइ । उब्भूयगकरणाउप्पायणाइ धम्माहिगारम्मि ॥ २०१ ॥ अत्र चादिशब्दान्निशि बलिनन्द्यादिग्रहः, तत्र स्थावरादिनिर्मापणादीनां षट्कायादिरम्भाऽसंयतवासादिना महासावद्यत्वेन देवनिमित्तं सिद्धान्तनिवारितत्वादुत्सूत्रं एतान्यन्तरेणापि च भक्तिमद्भिः स्वद्रव्यव्ययेन भगवत्सपर्यापर्यापणात् उद्भूतककरोत्पादनस्य च व्यवहारिणामत्यन्ताप्रीतिजननादुत्सूत्रत्वं पराप्रीतिमात्रस्यापि जैनमते भगवच्छ्रीमहावीरोदाहरणेन बहुधा निषेधात् । यदुक्तं– "धम्मत्थमुज्जएणं सव्वस्सापत्तियं न कायव्वं । इय संजमो विसेओ इत्थ य भयवं उदाहरणं ॥ २०२ ॥ सो ताव सा समाओ, तेसिं अप्पत्तियं मुणेऊणं । परमं अबोहिबीयं, तओगओहंतकाले वि ॥ २०३ ॥ निशि बलिनन्द्यादिकस्य चोत्सूत्रत्वं प्रागेव भावितम्, तथा चैवमाद्युत्सूत्रभाषिणाम् । तत्र व्याख्यानाद्यधिकारेण यावदुत्सूत्रभाषिसन्तानं यावज्जिनगृहं च तद्देशनया तत्र प्रवर्त्तमानानां सन्तानक्रमेण प्रजायमाना-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नां च श्राद्धानां भवकूपप्रपातप्रसङ्ग इति । अत एव कथञ्चिदगत्या तदुपाश्रये गतानां सुविहितानां माभूत्तद्देशनाकर्णनात् संशयादिना सत्पथविप्रत्तिपत्तिरिति तदनाकर्णनाय तत्प्रतिघातश्रवणस्थगनादयः प्रकाराः सिद्धान्ते प्रदर्शिताः । यदाह—"एमेव अहाच्छंदे पडिहणणाज्झाण अज्झयणकन्ना । ठाणठिओ निसामे सुवणाहरणाय गहिएण ॥२०४॥ तस्मान्न विधिचैत्ये तेषां क्रम इति । तथा न च स्नात्रं रजन्यां सदा प्राग्प्रदर्शितदोषसन्दोहात् सदेति सर्वकालमित्यर्थः । तेन कादाचित्कस्य श्रीमहावीरमोक्षकल्याणकस्नात्रस्याप्याधुनिकरूढ्या रात्रौ कैश्चिद् विधीयमानस्य निषेधो ज्ञापितः । एतेन प्रतिष्ठाया अपि रात्रौ निषेधः सूचितः, तस्याः स्नात्रपुरस्सरत्वात् । तथा साधूनां ममता मदीयमेतज्जिनगृहप्रतिमादिका नास्ति । गृहस्थस्यैव तन्निर्मापणचिन्तादावधिकारात्, तथा च कथं जिनगृहादेर्यतिममकारविषयता । आश्रयश्च तेषां नास्ति प्रागभिहितदोषकलापात् । तथा– स्त्रीणां प्रवेशो निशि नास्ति अकालचारित्वदोषप्रसङ्गात् ।तदुक्तं–"अज्जाण सावियाण य अकालचारित्तदोसभावाओ । ओसरणंमि न गमणं दिवसति जामे निसि कहं ता॥२०५॥लोकेऽपि कुलवधूनां यामिन्यां स्वगृहाद्बहिर्निर्गच्छन्तीनां महापवादाभिधानात्। तदुक्तं–"स्वगेहदेहलीं त्यक्त्वा निशि स्त्री याति या बहिः ।ज्ञेया कुलस्थितेर्लोपा-कुलटा कुलजापि सा ॥ २०६॥दण्डनीतावपि कुलबालिकानां निशि स्वसद्मबहिर्निर्गमे दण्डप्रतिपादनाच्च अत एव यतिवसत्यादौ योषितामेकाकिनीनां दिवसेऽप्यनेकावर्णशङ्काकलङ्कानुषङ्गास्कंदितत्वेन प्रवेशस्य प्रतिषेधः,एवं च यदा लोकेऽपि रात्रौ स्त्रीणां गृहनिर्गमो विरुद्धस्तदा का वार्त्ता जिनशासने,तस्मात्सर्वथा जिनवेश्मनि निशायां योषित्प्रवेशोऽनुचितत्वान्नास्तीति । जातिज्ञाति-



For Private and Personal Use Only

कदाग्रहश्च नास्ति तत्र जातिकदाग्रह एतज्जातीया एव श्रावका अत्र भगवद्बिम्बस्य दक्षिणादिस्नात्राधिकारिणो, नान्यजातीया इत्यादिकः,ज्ञातिकदाग्रह अस्माभिरस्मत्पूर्वजैर्वा कारितमिदं जिनमन्दिरं ततोऽस्मत् सगोत्रा एवात्र सर्वस्यामपि देववित्तसमुद्गकादिचिन्तायामधिकारिणो नेतर इत्यादिकः स च विधिचैत्ये न सङ्गतः, सर्वेषामेव धार्मिकश्राद्धानां गुणवतां तत्र सर्वाधिकारित्वाभिधानादन्यथा जात्यादिनिश्रयाप्यनिश्राकृतत्वानुपपत्तेरिति । न च श्राद्धलोकस्य ताम्बूलभक्षणमस्ति भगवदाशातनापत्तेः ताम्बूलमिति च 'तम्बोलपाणे'त्यादि गाथोक्तानां पानभोजनादीनामुपलक्षणं तथा गद्दिकाद्यासनमप्याशातनाविशेषत्वादुपलक्ष्यते इत्येवं प्रकारा आज्ञाविधिः–अत्रैषा निश्रितैकस्यापि यत्यादेर्निश्रया अधीनतया विना कृते विधिकृते श्रुतोक्तविधिनिष्पादिते श्रीजिनचैत्यालये जिनभवन इति । तथा इह न खलु नैव निषेधो निवारणं कस्यापि वन्दनपूजनादावुत्सूत्रभाषिणां तद्भक्तानां चापि वन्दनादिकं विदधतां न निषेधः क्रियते । श्रद्धाभङ्गमात्सर्यादिदोषप्रसङ्गात् श्रुतविधिबहुमानी सिद्धान्तक्रमादरवान् तु पुनरर्थे, अत्र सर्वो यतिः श्राद्धो वा यथाक्रमं व्याख्यानादौ चैत्यचिन्तायां चाधिकारी योग्यः सिद्धान्तविधिविधुरस्य साध्वादेर्व्याख्यानादौ न तत्राधिकार इत्यर्थः । त्रिचतुरजनदृष्ट्या विधिपरश्राद्धत्रयचतुष्टयदृशाऽत्र चैत्यद्रव्यवृद्ध्यादिकं चैत्यचिन्तनं कार्यं विधेयं न त्वेकाकिना निःस्पृहेणापि लोकापवादादिदोषापत्तिरिति प्रासङ्गिकवृत्तश्लोकार्थः ] एवं दानप्रमुखविषयोऽपि विधिवादः श्रुतानुसारेण ज्ञेयः, ततो यदि धर्मार्थिनामेकत्वं तत्र विधौ भवति, भो सुन्दर कल्याणिन् ? इदं च विशेषणं प्रतिबोध्यस्य मधुरवचनैरेवोपदेशो देय इत्यपि ख्यापकम् । उक्तं च-"धम्ममइएहिं अइसुंदरेहिं कारणगुणोवणीएहिं ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पल्हायंतोऽवमणं सीसं चोएइ आयरिओ ॥ २०७ ॥ " 'ता' तर्हि कथं केन प्रकारेण तु इति वितर्के पराभवमभिभवं धर्मार्थिना मिथ्यात्ववासितो लोक इति गम्यते कुर्याद्विदध्यादपि तु न कथञ्चित्पराभवं कुर्यात्। अयमभिप्रायो यदेकत्वं श्रावकनामधारकाणां मिथ्यात्ववादेऽस्ति तद्यदि धर्मार्थिनां स्यात्तदा कथं तु तेषां कोऽपि पराभवं कुर्यात्, अपि तु न कथमपि,परं कालस्य वैषम्यात् धर्मार्थिनामपि परस्परमत्सरः। यदुक्तं--" किर मुणिय जिणमया वि हु अंगीकयसरसजिणवरमया वि। पापमइसंकिलिट्ठा धम्मत्थी वित्थ दीसंति ॥ २०८ ॥ ते किंचि कहं वि कसाय विसलवं धरियनियमणे गूढं। दरिसंति तव्वियारे अप्परिणय समय अमयरसा ॥२०९॥ केइ अपुट्ठा पुट्ठा पुरओ तव्विहजणस्स पयडंति । अन्नप्पसंगेणं चिय परपरिभवमत्तउक्करिसं ॥ २१० ॥ गुरुमवि गुणमगणिंता परस्स दोसं लहुंपि पयडंति। अन्नुन्नममन्नंता जणयंति बहुणमइमोहं ॥ २११ ॥ यदि च तं त्यक्त्वा एकत्वमङ्गीकुर्वन्ति तर्हि न तान् कोऽप्यभिभवतीत्यर्थः ॥ ५१ ॥ उक्तो धर्मार्थिनामेकत्वे पराभवाभावोऽथवा च कालादिदोषतस्तथात्वाभावे पराभवसम्भवेऽपि सति यो धर्मं कुर्वतां साहाय्यादिकरणेन धर्मार्थिनामाधारभूतः स्यात्। सम्प्रति तमभिष्टुवन्नाह—

मूलम्—तं जयइ पुरिसरयणं सुगुणड्ढं हेमगिरिवरमहग्घं ।
जस्सासयंमि सेवइ सुविहिरओ सुद्धजिणधम्मं ॥ ५२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या–' तं जयेत्ति ' तत् जयत्युत्कर्षेण वर्त्ततां पुरुषरत्नं पुरुषेषु मनुष्येषु रत्नमिव रत्नं तत् रत्नत्वं च प्रधानत्वात् जातौ जातौ प्रधानं यत्तत्द्रत्नमिति कथ्यत इति वाक्यात् पुरुषरत्नस्य विशेषणद्वारेण प्राधान्यमेवाह--सुष्ठु शोभना गुणा सुगुणा औदार्यधैर्यगाम्भीर्यदाक्ष्यदाक्षिण्यविनयादयस्तैराढ्यं समृद्धं सुगुणाढ्यं ॥ यदुक्तं–" वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता, विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् । भक्तिश्चार्हति शक्तिरात्मदमने संसर्गमुक्तिः खले,एते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥२१२ । यत एव गुणाढ्यमत एव हेमगिरिवरमहार्थं हेमगिरिवरो मेरुस्तद्वन्महामूल्यं मेरुवन्महत्त्वान्मूल्यरहितमित्यर्थः । यथा मेरोर्लक्षयोजनमयस्य कनकगिरिनं केनापि मूल्यं कर्त्तुं शक्यते । तथा तस्यापि गुणाढ्यत्वादिति भावः । ' तदिति ' किमित्याह–यस्य पुरुषरत्नस्याश्रये आधारे सेवते आश्रयति सुविधिरतो विधिना धर्मकरणनिष्ठो जन इति प्रक्रमः । शुद्धजिनधर्मं कदाग्रहादिमलकलङ्करहितं सर्वज्ञधर्ममिति यस्य चाश्रये शुद्धधर्मार्थिनस्तं सेवन्ते तादृशस्य विरतत्वान्महार्थता । यदुक्तं–" मनसि वचसि काये पुण्यपीयूषपूर्णा--स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः । परगुणपरमाणून् पर्वतीकृत्य नित्यं निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥२१३॥ इति गाथार्थः ॥५२॥ पूर्वोक्तमेव पुनः समर्थयितुमाह—

मूलम्— सुरतरुचिंतामणिणो अग्घं न लहंति तस्स पुरिसस्स ।
जो सुविहिरयजणाणं धम्माधारं सया देइ ॥ ५३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या-' सुर ' इत्यादि, सुरतरवः कल्पद्रुमास्ते च चिन्तामणयो देवरत्नानि च सुरतरुचिन्तामणय उपलक्षणमेते कामधेनुकामकुम्भानां ते च अर्थमिवार्थं मूल्यं साम्यमिति यावद् न लभन्ति न प्राप्नुवन्ति । तस्य पुरुषस्य मानवस्य तस्येति कस्येत्याह--यः पुरुषः सुविधिरतजनानां सुविहितसाधुश्रावकाणां धर्माधारं सुकृतावष्टम्भं सदा ददाति प्रयच्छति, तद्विद्विष्टानुशासनतदुपद्रववारणतदिष्टवस्तुसम्पादनादिना एवं च तेन शासनमालिन्यं परिहरतोन्नतिः कृता भवति । शासनोन्नतिं च कुर्वन् सम्यक्त्वमपहस्तितचिन्तामण्यादिकं लभते, यदुक्तं--" यस्तून्नतौ यथाशक्ति सोऽपि सम्यक्त्वहेतु तां । अन्येषां प्रतिपद्येह--तदेवाप्नोत्यनुत्तरम् ॥२१४॥ प्रक्षीणतीव्रसंक्लेशं प्रशमादिगुणान्वितम् । निमित्तं सर्वसौख्यानां तथा सिद्धिसुखावहम्॥२१५॥ तस्मात् स सुरतर्वादिभ्योऽधिको यो धर्माधारदानेन शासनोन्नतिं करोतीत्यर्थः ॥ ५३॥ ननु सत्यमेव विधिरतोपष्टम्भदातॄणां स्तुतिः कृता भवता, ते च प्रत्युत तया लज्जन्ते इति को गुणस्तत्करणे भवत इत्याशंक्याह—

मूलम्—लज्जंति जाणिमोहं सप्पुरिसा निययनामगहणेण ।
पुण तेसिं कित्तणाओ अम्हाण गलंति कम्माइं ॥ ५४ ॥

व्याख्या--' लज्जन्तीत्यादि ' लज्जन्ते त्रपन्ते जानामि वद्म्यहं के इत्याह--सत्पुरुषाः परकार्यकरणैकव्यसनिनो निजकनामग्रहणेन स्वाभिधानमात्रश्रवणेन,सत्पुरुषाणां हि सोऽयं दातोपकर्त्तेत्यादिगुणप्रशंसापूर्वकस्वनामश्रवणात्



For Private and Personal Use Only

भवति लज्जा । तदुक्तं--स्वगुणश्रवणे लज्जान्यगुणाकर्णने रतिः । परोपकारव्यसनं स्वभावोऽयं महात्मनाम् ॥ २१६ ॥ तथा केनापि कमपि राजानं वर्णयताऽयमेवार्थः प्रत्यपादि, यथा--आबाल्याधिगमान्मयैव गमितः कोटिं परामुन्नते-रस्मत्सङ्कथयैव पार्थिवसुतः सम्प्रत्यसौ लज्जते । इत्यालोच्य निजात्मजेन यशसा दत्तावलम्बोऽम्बुधे-र्यातस्तीरतपोवनानि भवतो वृद्धो गुणानां गणः ॥२१७॥ ततश्च जानाम्यहं यद्यपि सन्तः स्वनामग्रहणेन लज्जन्ते । तथापि पुनर्विशेषे स चाग्रे योक्ष्यते तेषां सज्जनानां कीर्त्तनात् गुणकथनात् पुनरस्माकं गलन्ति नश्यन्ति कर्माणि ज्ञानावरणादीनि । गुणवत्प्रशंसायां हि क्रियमाणायां कर्मनिर्जरा स्फुटैव । यदुक्तमागमे--किइ कम्मं च पसंसा संविग्गजणम्मि निज्जरट्ठाए । जे जे विरइठाणा ते ते उववूहिया होंति ॥ २१८ ॥ तथाऽन्यैरपि गुणवद्गुणकीर्त्तनादेव वाचां साफल्यमभ्यधायि । तदुक्तं--वाग्जन्मवैफल्यमसह्यशल्यं, गुणाधिके वस्तुनि मौनिता चेत् । खलस्त्वमल्पीयसि जल्पिते तु, तदस्तु बंदिभ्रमभूमितैव ॥ २१९ ॥ इति तेषां कीर्त्तनं कुर्म इति स्वोपदेशेनान्येषामपि सत्कीर्त्तनोपदेश उक्त इत्यर्थः ॥ ५४ ॥ उक्तप्रसङ्गतः सद्गुणकीर्त्तनं निर्जराहेतुतया धर्मकारणम् । अथाज्ञयैव क्रोधादिरहितेनात्मप्रशंसामनिच्छता धर्मः कर्त्तव्य इत्यभिधित्सुरस्यैव व्यतिरेकमाह—

मूलम्—आणारहियं कोहाइसंजुयं अप्पसंसणत्थं च ।
धम्मं सेवंताणं नय कित्ती नेव धम्मो य ॥ ५५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





व्याख्या—'आणारहियन्ति' आज्ञारहितं स्वमतिकल्पनामात्रप्रवृत्तं तस्य परलोकहितासाधकत्वाद्यदाह-- नियगमइविगप्पिए चिंतिएण सच्छंदबुद्धिचरिएण। कत्तो पारत्तहियं कीरइ गुरु अणुवएसेणं ॥ २२० ॥ [व्याख्या-'निगमइ इति' निजकमत्या स्वकीयबुद्धया विकल्पितं स्थूलावलोकनं चिन्तनं सूक्ष्मावलोकनं तेन स्वकीयमतिकल्पनयेत्यर्थः, स्वच्छन्दं बुद्धिचरितेन स्वतन्त्रमतिचेष्टितेनेत्यर्थः। 'कत्तो इति' कुतः पारत इति परत्र परलोके हितं आत्मनो हितं कीरइ इति क्रियते गुरुं 'अनुवएसेणं' उपदेशायोग्येन गुरुकर्मणेति भावः। स्वेच्छाचारिणः परत्र हितं न प्राप्नुवन्तीत्यर्थः] तथा क्रोधादिसंयुतं क्रोधमानमायालोभैः सहितं क्रोधेन तपःप्रभृतिकरोति स्कन्दकाचार्यवद्वा चारित्रं पालयन्नपि क्रोधं करोतीति क्रोधयुतं। एवं मानेन प्रासादप्रतिमापुस्तकलेखनादि कारयति यथा--अमुकेनाल्पधनेन प्रासादादि कारितं तदहं किं ततोऽपि न्यूनं इत्यादि बुद्धया।मायया मुग्धजनविप्रलिप्सया बाह्यकष्टानुष्ठानं लोकदृष्टया करोति,लोभेन किमपीष्टं वस्तु लभेयाहमिति बुद्धया धर्मं विधत्ते तत् क्रोधादिसंयुतं। तथा आत्मशंसनार्थं चात्मप्रशंसानिमित्तं किलामुना तपः संयमदानशीलादिना मम लोके ख्यातिरस्तु इत्यनया धिया यो धर्मः स आत्मप्रशंसार्थः, तस्यापि निषिद्धत्वात्। तदुक्तं--" नो कित्तिवन्न सद्दसिलोगट्ठयाए आयारमहिट्ठिज्जेत्यादि, एवंविधं धर्मं दुर्गतिपातधारणात्मकं सेवमानानां पुरुषाणामिति प्रक्रमः न च कीर्त्तिः श्लाघालक्षणा तादृशधर्मकर्तृणां क्लिष्टचित्तत्वात्, " आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च। नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः ॥ १ ॥ " इति युक्त्या च क्लिष्टत्वपरिज्ञानाद्दाम्भिकोऽयमित्यादिरूपा प्रत्युतापकीर्त्तिरेव पोस्फुरीति न च कीर्त्तिः न च धर्मः प्रागु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्तलक्षणः तादृशधर्मसेवाया असमञ्जसत्वात् । असमञ्जसतायां च न फलप्राप्तिः, तदुक्तं-पाएणणंतदेउलं जिणपडिमा कारियाओ जीवेण । असमंजसवित्तीए नयलद्धो दंसणलवो वि ॥ २२१ ॥ ततो यस्मादाज्ञारहितं क्रोधादिसंयुतमात्मप्रशंसार्थं धर्मं सेवमानानां न धर्मो नकीर्त्तिस्तस्मादाज्ञयाक्रोधादिरहितेनात्मप्रशंसाद्यनभिलषता धर्मो विधेय इतिगाथार्थः ॥५५॥ नन्वाज्ञारहितादिधर्मकरणे यद्यपि न सर्वे कीर्त्तिं करिष्यन्ति । तथापि कियन्तोऽपि करिष्यन्ति तावतैव चास्माकं समाधिः । तथा यद्यपि चोत्कृष्टो धर्मो न भवति । तथापि कष्टफलसद्भावात्कियानपि धर्मोऽपि भविष्यतीत्याशंक्य मुग्धजनश्लाघाहृष्टस्यालीकधर्मरतेः सखेदमनर्थं दर्शयन्नाह—

मूलम्—इयरजणसंसणाए हिठा उस्सुत्तभासिए न भयं ।
ही ही ताण नराणं दुहाइं जइ मुणइ जिणनाहो ॥५६॥

व्याख्या-' इयरजेत्ति ' इतरजनशंसनया हृष्टा ये इतरजना धर्मबाह्या लोका भट्टादयो वा तेषां शंसनया प्रशंसया हृष्टा हर्षवन्तः धर्मबाह्या हि यादृशं तादृशमपि प्रशंसन्ति । भट्टादयश्च रूपकमात्रदायकमपि चक्रवर्त्तिनं कुर्व्वन्ति तत एव तत्प्रशंसया गर्वनिषेधः । तदुक्तं-" न गर्वः सर्वथा कार्यो भट्टादीनां प्रशंसया । व्युत्पन्नश्लाघया कार्यःस्वगुणानां तु निश्चयः ॥२२२ ॥ मूढानां तु तादृशप्रशंसयाऽव्युत्तानता भवति । यतः--जह उंदरस्स एक्केण वीहिणा दोवि वायडा हत्था । तह अमुणियपरमत्था थेवेण विउत्तणा हुंति ॥ २२३ ॥ तथा उत्सूत्रभा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षितेन भयं येषां ही ही इति खेदाधिक्ये तेषां नराणां मनुजानां दुःखान्यसातरूपाणि यदि मुणति यदि जानाति तर्हि जिननाथः सर्वज्ञो नान्यः तद्दुःखानामनन्तत्वात् अनन्तं वाऽनन्तज्ञानिन एव जानन्ति नेतर इतिगाथार्थः ॥५६॥ अथेतरजनप्रशंसाहृष्टानां उत्सूत्रभाषणाभीरूणां दुःखकारणमुपदर्श्य तस्यागोपदेशमाह—

मूलम्—उस्सुत्तभासगाणं बोहीनासो अणंतसंसारो ।
पाणच्चए वि धीरा उस्सुत्तं ता न भासंति ॥ ५७ ॥

व्याख्या—' उस्सुत्त इत्यादि ' उत्सूत्रभाषकाणां बोधिनाशः प्रेत्य जिनधर्मप्राप्त्यभावः । तदुक्तं, उपदेशमालायां "फुडपागडमकहिंतो जहट्ठियं बोहिलाभमुवहणइ । जह भगवओ विसालो जरमरणमहोयही आसि ॥ २२४ ॥ [व्याख्या--'फुडेत्ति' स्फुटं प्रकटं सत्यार्थं अकथयन् अभाषमाणः सन् यथास्थितं सत्यं बोधिलाभं आगामिनि भवे धर्मप्राप्तिं उपहन्ति नाशयति--यथा भगवतः श्रीमहावीरस्य मरीचिभवे विशालो विस्तीर्णः जरामरणरूपो यो महोदधिमहासमुद्रो विस्तर्णः, आसीद् बभूव कोटाकोटी प्रमाणसंसारोऽवर्द्धत इत्यर्थः "] बोधिनाशे वाऽनन्तसंसारः सकलनरकादिदुर्गतिदुःखदायी भवोऽनन्तो भवतीति प्रक्रमः, यस्मादेवमुत्सूत्रं दारुणविपाकं चतुर्थपदोपात्तः ता शब्दोऽत्र सम्बध्यते--ततः ' ता ' तस्मात्प्राणात्ययेऽपि मरणेऽपि प्राप्ते धीरा बुद्धिमन्त उत्सूत्रं भगवद्वचनविरुद्धं न भाषन्ते न वदन्ति श्रीकालिकाचार्यवत् । यदुक्तं उपदेशमालायां--" जीयं काऊण पणं तुरमणिदत्तस्स का- ॥ ५९ ॥

For Private and Personal Use Only

लियज्जेण । अविय सरीरं चत्तं न य भणियमहम्मसंजुत्तं ॥ २२५ ॥ [ व्याख्या-- 'जीयंइ' ति स्वकीयं जीवितं पणं कृत्वा 'तुरमणिंत्ति' तुरमणिनाम्निनगरे 'दत्तस्सत्ति' दत्तनाम्नो राज्ञः 'कालियज्जेणत्ति' कालिकाचार्येण च पुनः स्वशरीरमपि त्यक्तं मनसा स्वदेहोऽपि त्यक्तः, परं अधर्मसंयुक्तं असत्यं वचनं न भणितं न भाषितं ॥ ] तदुत्सूत्रं न वक्तव्यमेवेतिगाथार्थः ॥५७॥ पुनरुत्सूत्रत्यागविषयमेवोपदेशमाह—

मूलम्—मुद्धाण रंजणत्थं अविहिपसंसं कयाइ न करिज्जा ।
किं कुलवहुणो कत्थइ थुणंति वेसाए चरियाइं ॥५८॥

व्याख्या--'मुद्धाणेत्ति' मुग्धानां निर्विवेकानां रञ्जनार्थं प्रीत्युत्पादनार्थं अविधिप्रशंसां निष्कारणं तच्चिकीर्षिताऽविधिश्लाघारूपां निष्कारणविधेराज्ञाभङ्गरूपत्वात् । तदुक्तं निशीथचूर्णौ--निक्कारणअविहि पडिसेवा नियमा आणाभंगो अणवत्थामिच्छत्तं च न जहा वादी तहा कारित्ति', कदापि कस्मिन्नपि काले न कुर्यात् विवेकवानिति गम्यम्,एते ह्येव रञ्जिता भवन्त्विति तद्रञ्जनार्थं स्वमतिविकल्पितां तत्प्रवृत्तिं प्रशंसन्ति ॥ यथा--भिक्षा सूतकमन्दिरे भगवतां पूजा मलिन्याः स्त्रिया, हीनानां परमेष्ठिसंस्तवविधेर्यच्छिक्षणं दीक्षणं । जैनेन्द्रप्रतिमा विधापनमहो तल्लोकलोकोत्तर, व्यावृत्तेरघहेतुमप्यधिषणाः श्रेयस्तया चक्षते ॥ १ ॥ तथा--गृही नियतगच्छभाग् जिनगृहेऽधिकारो यतेः प्रदेयमशना-दिसाधुषु यथा तथारम्भिभिः व्रतादिविधिवारणं सुविहितान्तिकेऽगारिणां गतानुगतिकैरदः कथमसंस्तुतं, एवं प्रपास-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रादिकं केनापि क्रियमाणं दृष्ट्वा कर्त्तव्यमेतल्लक्ष्मीवतां गृहिणां। आवश्यके च प्रतिक्रमाणादौ निरपेक्षतया यथा कथञ्चित् क्रियमाणे कथयत्येवमपि कुर्वतां लाभ एवेत्यादि तथा कुर्वंश्च तदुन्मार्गसेवादाढर्योत्पादनेन 'कविला इत्थं पि इहयंपी'-त्यादिवचनेनैव मरीचिवन्मिथ्यात्वं प्राप्नुयात् । तस्मादविधिप्रशंसा न कुर्यात् अस्मिन्नर्थे काक्वा दृष्टान्तमाह—किमित्याक्षेपे कुलवध्वः कुलाङ्गनाः कुत्रापि देशकालादौ वेश्याचरितानि वारविलासिन्याश्चरितानि, यथा सर्वत्रास्खलितप्रचाराः स्वैरविहारिण्यः विविधविटोपभोगप्राप्तयौवनफला वैधव्यभयोज्झिताः स्वच्छनेपथ्यधारिण्यः सर्वाभरणविभूषिताः वेश्याः सुलब्धजन्मजीवितव्या इत्यादि स्तुवन्ति अपि तु न स्तुवन्ति । तत्स्तुतौ हि तासां सकलंकत्वप्रसङ्गात् ततो यथा कुलवध्वो वेश्याचरितानि न स्तुवन्ति तथा विवेकिनोऽप्यविधिप्रशंसां न कुर्युरिति गाथार्थः ॥५८॥ न न्वविधिप्रशंसा न कार्येति किमित्युक्तं जिनाज्ञाभंगरूपत्वात् तस्यास्तां च स्वयं जिनाज्ञाभङ्गभीरवो न विधास्यन्तीत्यत आह—

मूलम्—जिण आणाभंगभयं भवसयभीयाण होइ जावाणं ।
भवसय अभीरुयाणं जिणआणाभंजणं कीला ॥ ५९ ॥

व्याख्या—' जिणआणाइत्यादि ' जिनाज्ञाभङ्गभयं सर्वज्ञादेशभङ्गातङ्कः भवशतभीतानां त्रातशब्दोऽत्रोपलक्षणं तेनानन्तजन्मभीरूणां भवति जायते जीवानां प्राणिनां भवभीरवो हि " जह नरवइणो आण अइक्कमंता पमायदोसेण । पावंति बंधवहरोहच्छिज्ज मरणावसाणाणि ॥ १ ॥ तह जिणवराण आणं अइक्कमंता पमायदोसेणं । पावंति दु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्गइपहे विणिवायसहस्सकोडीओ ॥ २ ॥ " इत्यादि ज्ञात्वा आज्ञाभङ्गाद्बिभ्यति । भवभीताऽभीरूणां भवाभिनन्दिनां पुनर्जिनाज्ञाभञ्जनं क्रीडेव क्रीडाकेलिरिति । यथा–मल्लादीनां मुष्टिप्रहारात्मकं सम्प्रहारादिकं दुःखदमपि क्रीडा भवति । सुकुमारशरीराणां तु पीडायै भवति एवं भवाभीरूणां जिनाज्ञाभञ्जनं क्रीडा परेषां च भयहेतुरिति गाथार्थः ॥ ५९ ॥ननु जिनाज्ञाभञ्जनं क्रीडेत्युक्तं तदश्रुतानां भविष्यति न सश्रुतानामित्याशंक्याह––

मूलम्––को असुयाणं दोसो जं सुयसहियाणं चेयणा नट्ठा ।
धिद्धी कम्माण जओ जिणो वि लद्धो अलद्धत्ति ॥ ६० ॥

व्याख्या–' कोअसुया ' इत्यादि, कोऽश्रुतानां श्रुतरहितानां जिनसमयरहस्यावेदिनामिति यावत् दोषो दूषणं प्रस्तुते जिनाज्ञाभङ्गे अज्ञानावृतत्वेन तेषां हिताहितार्थानभिज्ञत्वात् । तदुक्तं–अज्ञानं खलु कष्टं क्रोधादिभ्योऽपि सर्वपापेभ्यः । अर्थं हितमहितं वा न वेत्ति येनावृतो मूढः ॥२२६॥ यदित्युपक्षेपे श्रुतसहितानां विदितजिनागमानामपि चेतनाबुद्धिर्नष्टा जिनाज्ञाश्रद्धानाऽभावेन मिथ्यात्वोदयादन्यथाभावं गता तच्छ्रद्धानस्यातिदुर्लभत्वात्, यदुक्तं--आहच्च सवणं लध्धुं सद्धा परमदुल्लहा । बहवे रोयमाणा वि नो इणं पडिवज्जए ॥ २२७ ॥ सर्वं चैतत्कर्मणां माहात्म्यमिति, तानि निन्दन्ति धिक् धिक् कर्मणामिति द्वितीयार्थे षष्ठी तेन कर्माणि धिग् धिगिति वीप्सा कर्मणामतिदुष्टत्वख्यापनाय । यतः—" कम्माइं नूण घणचिक्कणाइं अइनिविडवज्जसाराइं । ना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णाड्ढियं पुरिसं पंथाओ उप्पहं निंति ॥ २२८ ॥ किमिति कर्म्माणि धिगित्याह--यतो यस्मात्कर्म्ममाहात्म्याद्विदितजिनागमानामपि जमाल्यादीनामिवोत्सूत्रभाषणतो जिनोऽर्हन्नपि शब्द उत्तरपदेन योज्यते--ततो लब्धोऽपि प्राप्तोऽप्यलब्धइति अप्राप्तप्रकारो भवतीति प्रक्रमः। जिनलाभप्राप्तस्य धर्मस्योत्सूत्राभिनिवेशेन नाशात् ॥ यतः--अहह भवन्नवपारं चरित्तपोएण केऽवि पत्ताावि। तम्मज्झमिति पुण अहणिवेसपडिकूलपवणेण ॥ २२९ ॥ ततो जिनो लब्धोऽप्यलब्धो भवतीत्याज्ञाभङ्गो न कर्तव्य इति गाथार्थः ॥ ६० ॥ अथ ये जिनाज्ञापालकान् धार्मिकान् हसन्ति। तदनुशासनायाह—

मूलम्—इयराणं विउवहासं तमजुत्तं भायकुलपसूयाण।
एस पुण कोवि अग्गि जं हासं सुद्धधम्मंमि ॥ ६१ ॥

व्याख्या--'इयराणमित्यादि' इतरेषामपि हास्याहीणामपि उपहासं निन्दासूचकं हसनं क्रियत इत्यध्याहारः। तदयुक्तमनुचितं भ्रातः कुलप्रसूतानां कुलजानां, कुलजा हि लघुतापरिहारेणैव प्रवर्त्तन्ते उपहास्ये च क्रियमाणे लघुता भवति। यदुक्तं--बालसखित्वमकारणहास्यं,स्त्रीषु विवादः कुसज्जनसेवा। गर्दभयानमसंस्कृतवक्ता, षड्सु नरो लघुतामुपयाति॥२३०॥ तस्मादयुक्तमितरेषामप्युपहास्यं कुलजानां एष पुनः कोऽप्यग्निरिवाग्निः कुलीनतादिगुणगणतृणज्वालकत्वात् स्त्रीनिर्देशः प्राकृतत्वात्। यत् हास्यं शुद्धधर्मेऽपि निःकलङ्केऽपि सर्वज्ञधर्मे क्रियमाणे इति



For Private and Personal Use Only

शेषः । यथा--केनापि सम्यक्त्वं गृह्यमाणं दृष्ट्वा वदत्यहो अयमनेनोपायेन जन्ममुण्डनोत्सवमृतककर्त्तव्यगोत्रदेवतापूजा-द्विजाऽतिथिस्वजनादिदानव्ययेभ्यो मुक्तः । तथा-"झाडइ झा[झो]डइ पडिकमइ बइसइ मुहगुरुपासि । सा तेवीसे सउकर-इ मूढाइणिवेसासि ॥१॥" इत्याद्युल्लण्ठवचनं भणित्वा धर्मप्रतिपद्यमानं श्राद्धं श्राविकामेव साधून् साध्वींश्चोपहसति । तांश्चोपहसन् धर्मे लाघवमुत्पादयति धर्मलाघवाच्च शासनमालिन्यं ततश्चानर्थपरम्परां प्राप्नोति । यदुक्तम्-"अतः सर्वप्रयत्नेन मालिन्यं शासनस्य तु । प्रेक्षावता न कर्त्तव्यं प्रधानं पापसाधनम् ॥ २३१ ॥ अस्माच्छासन-मालिन्या--ज्जातौ जातौ विगर्हितम् । प्रधानभावादात्मनं सदा दूरीकरोत्यलम् ॥ २३२ ॥ यत एवं त-स्माद्युक्तमेव धर्महास्यस्याग्निकल्पत्वमिति तन्न कर्त्तव्यमिति गाथार्थः॥६१॥ ननु ये धार्मिकानुपहसन्ति तान् प्रति कोऽप्युपदेशोऽयोग्यत्वेनेत्याशङ्क्याह—

मूलम्--दोसो जिणिंदवयणे संतोसो जाण मिच्छपावम्मि ।
ताणंपि सुद्धहियया परमहियं दाउमिच्छंति ॥ ६२ ॥

व्याख्या--' दोसो जिणिंदेत्ति ' द्वेषो जिनेन्द्रवचने प्रीत्यभावः सर्वजगज्जन्तुहिते भगवदर्हद्वाक्ये तदुक्तधर्मा-सेविनामुपहसनात् सन्तोषस्तुष्टिर्येषां मिथ्यात्वपापे तत्कारिषु प्रीतिदर्शनात् । तेषामपि शुद्धहृदया निर्मलचित्ताः सत्त्वा-नुकम्पावन्त इत्यर्थः, परमहितं मोक्षं तन्मार्गं वा ज्ञानदर्शनचारित्रात्मकं दर्शयितुं दातुं वा इच्छन्ति वाञ्छन्ति । शुद्धा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शया हि चिन्तयन्ति कथमप्येतेऽपि वराका धर्मोपहासकारिणोऽन्ये वा पापकारिणः परमहित पश्यन्तु गृण्हन्तु चेति गाथार्थः॥ ६२ एतदेव शुद्धाशयानां स्वभावप्रकटनेनाह—

मूलम्—अहवा सरलसहावा सुयणा सव्वत्थ हुंति अवियप्पा ।
छड्डंतविसभराण वि कुणंति करुणं दुजीहाणं ॥ ६३ ॥

व्याख्या—' अहवासेत्ति ' अथवा जिनवचनद्विष्टमिथ्यात्वरतीनामपि परमहितं दातुमिच्छन्तीति किं वाच्यम्, यतः—सरलस्वभावा निष्कपटस्वरूपाः सुजनाः सन्तः सर्वत्र सर्वेषु प्राणिषु भवन्त्यविकल्पा विकल्परहिताः समानमतयो हितकरणे शत्रुमित्रादिभावनिरपेक्षत्वेन । यतः " अयं निजः परो वेति गणना लघुचेतसाम् । उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ २३३ ॥ " यत एवं विकल्परहिताः सज्जना अत एव ते छर्द्दद्विषभराणां उद्गिरद्गरलभाराणामपि कुर्वन्ति विदधति करुणां दयां द्विजिह्वानां सर्प्पाणां दुर्ज्जनानां चोपरीति गम्यते । दुर्जनपक्षे तु छर्द्दद्विषभराणामिति विशेषणमेवं योज्यते । यथा—छर्द्दद्विषभराणामिव छर्द्दद्विषभराणां मुखविवरविनिर्गच्छद्दुर्वाक्यसमूहानाम् । यथाहि-सर्प्पा विषं छर्द्दन्ति तथा दुर्ज्जना दुर्वाक्यानि छर्द्दन्ति दुर्वाक्यानां च विषतुल्यता लोकप्रतीतैव तथा च लोके वक्तारो भवन्ति एतन्मुखाद्विषमेव निर्गच्छतीति । तथापि तेषां सज्जनानां सर्प्पाणामुपरि दुर्ज्जनानां चोपरि करुणैव भवति । हा वराका एतेऽपि कथमपि सुखिनो भवन्त्विति । अतस्ते सरलत्वाद्धर्मद्विष्टानप्युपदेशेनानुगृण्हन्तीति गा-



For Private and Personal Use Only

यार्थः ॥ ६३ ॥ नन्वयमुपदेशसर्वोऽपि सम्यक्त्वस्थैर्यार्थं तच्च श्रावकाणामेवोत्पाद्यं । साधूनां तस्य स्वयमेव सत्त्वादित्याशङ्क्याह—

मूलम्—गिहवावारविमुक्के बहुमुणिलोए वि नत्थि सम्मत्तं ।
आलंबणनिलयाणं सड्ढाणं भाय किं भणिमो ॥ ६४ ॥

व्याख्या-' गिहवावारेत्ति ' गृहं सद्म तदर्थं व्यापारः कृषिसेवावाणिज्यपाशुपाल्यादिकस्तेन विशेषेण मुक्तो रहितो गृहव्यापारविमुक्तस्तस्मिन् ईदृशे कस्मिन्नित्याह-बहुश्चासौ मुनिलोकश्च यतिजनश्च बहुमुनिलोकस्तत्र कतिपयेषु साधुष्वपीत्यर्थः, आस्तामन्यत्रेत्यपि शब्दार्थः । नास्ति न विद्यते सम्यक्त्वं तत्त्वश्रद्धानरूपं सम्पूर्णसाध्वनुष्ठानकरणेऽपि कतिपयानां श्रद्धानाभावात् । अत एव श्रीजिनवल्लभसूरिभिर्वीतरागविज्ञप्तौ ग्रैवेयकगमनमनन्तशः प्रतिपाद्य श्रद्धानरहितायाः सम्पूर्णसाधुक्रियाया अबीजत्वमभाणि । यथा—पुण सव्वजियाणमणंतसो वि गेविज्जगेसुरुप्पत्ति । तह वि न सम्मदंसणमित्तस्स वि सुणियसंपत्ती ॥ २३४ ॥ संपुन्नसाहुकिरिया करणमबीयंतिकय अणासासो । देवविसायपिसाएण वाउ (लि) लज्जामि अणुसमयं ॥२३५॥ अथवैतत्कालभाविनः प्रभूतमुनिजनस्यापि स्वस्वमतिकल्पितस्वमतस्थापनाभिनिविष्टस्य गुणिगणदूषकस्य सूत्रोत्तीर्णभाषकस्य नास्ति सम्यक्त्वं । यदि चैवं येषां गृहव्यापारादिकं नास्ति तेषामपि न सम्यक्त्वं । तर्हि आलम्बननिलयानां विविधमिषस्थानानां श्रा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्धानां श्रमणोपासकानां भ्रान्तः । सम्यक्त्वनास्तित्वे किं भणामः कथयामः । श्रावका हि भ्रातृपुत्रकलत्रादिपरिवारपोषणरक्षणनिमित्तव्यापारशतव्याकुलतया तथाविधपरिज्ञानाभावेन तथाऽत्यन्तमस्थिरचित्ततया मिथ्यात्विपरिचयेन च विविधभूतप्रेतादिभयेन चानेकान्यसदालम्बनानि गृहीत्वा कुदेवकुगुरुकुधर्माश्रयणेन सम्यक्त्वरहिताः स्युरिति किं वाच्यम्,यदि गृहव्यापारमुक्ते बहुमुनिजनेऽपि सम्यक्त्वं नास्ति ततस्तत्र यत्नः कर्त्तव्य इति गाथार्थः ॥६४॥ बहुमुनिलोकेऽपि सम्यक्त्वं नास्तीत्युक्तं तच्च प्राय उत्सूत्रभाषणादेव तत उत्सूत्रभाषणस्यैव दुष्टतामाह—

मूलम्—न सयं न परं को वा जइ जीव उस्सुत्तभासणं विहियं ।
ता बुड्डसि निब्भंतं निरत्थयं तवफडाडोवं ॥ ६५ ॥

व्याख्या–'नेत्ति' नेति निषेधे स्वयं स्वतः एतदेवं क्रियमानं मुच्यमानं वा सुन्दरं स्यादिति स्वबुद्ध्येत्यर्थः, उत्सूत्रं वाच्यमित्यध्याहारेण सर्वत्र सम्बन्धः कर्त्तव्यः, न परमन्यं गुर्वादिकमपेक्ष्येति गम्यम्, उत्सूत्र वाच्यं किल मद्गुरुभिरिदमुक्तं मयापीदमेव वाच्यमिति को वा इति पदं सूचापदं, तेन को वा जानाति गहनमिदं केऽप्यन्यथा कथयन्ति तदन्ये चान्यथा ततोऽसम्बद्धं जिनशासनमिदमित्यादि चोत्सूत्रं न वाच्यं, पाश्चात्य एव न शब्दोऽत्र योज्यः । अथवा को वेति कोपादुत्सूत्रं न वाच्यम्, मानमायालोभोपलक्षणमिदं यदीत्यभ्युपगमे जीव आत्मन् ? स्वतः परतः संशयादेर्वा उत्सूत्रभाषणं विहितं कृतं 'ता' तर्हि ब्रुडसि मज्जसि निभ्रान्तं भ्रान्तिरहितमिति यावत् भवाम्भोधावि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ति प्रस्तावाज्ज्ञेयम्, उत्सूत्रभाषणेऽपि तपसा निस्तारो भविष्यतीत्याशङ्कयाह--निरर्थकमनर्थकं प्रस्तुतकार्यकरणाक्षमं तप एव दुरनुष्ठेयत्वेन दुर्ग्राह्यत्वात् स्फटाटोप इव फणामण्डलमिव स्फटाटोपः तपः स्फटाटोपस्तं करोषीत्यध्याहार्यम् । अयमाशयः यथा--निर्विषस्य भुजंगस्य स्फटाटोपो निरर्थकः, एवमुत्सूत्रभाषकस्य तपः स्फटाटोपो निरर्थक एव तपः कार्यस्य संसारनिस्तारस्याभावात् । यदुक्तं-" कुणमाणोऽपि हु किरियं परिच्चयंतो वि सयधणभोए । दिंतो वि दुहस्सउरं मिच्छद्दिट्ठी न सिज्झइ य ॥ २३६ ॥ " मिथ्यादृष्टित्वं चोत्सूत्रभाषकस्य प्रागेवोक्तमिति गाथार्थः ॥ ६५ ॥ एवमेषां जिनवचनं न परिणतं तत्स्वरूपमभिधायाधुना येषां तत्परिणतं तत्स्वरूपनिरूपणायाह—

**मूलम्—जह जह जिणिंदवयणं सम्मं परिणमइ सुद्धहिययाणं ।**
**तह तह लोयपवाहे धम्मं पडिहाइ नटचरियं ॥ ६६ ॥**

व्याख्या-' जह जह जिणिंदेत्ति' यथा यथा येन येन प्रकारेण जिनेन्द्रवचनं भगवदागमः सम्यगवैपरीत्येन परिणमति एकात्मीभूयविषयविभागतया चित्तेऽवतिष्ठति शुद्धहृदयानां निर्मलचित्तानां तथा २ लोकप्रवाहे गतानुगतिकारूपेऽविचारज्ञपुरुषप्रवर्त्तिते धर्ममार्गे इति यावत् यं धर्मविधिरूपं कुर्वन्तीति शेषः। स धर्मः शुद्धहृदयानां नटचरितमिवात्रेव शब्दो लुप्तो द्रष्टव्यः, नाटकमिव प्रतिभाति स्फुरति । यथाहि--राधाकृष्णादिनाटके कृष्णादिरूपाण्यतात्त्विकान्येव स्युस्तथा लोकप्रवाहे धर्मोऽप्यतात्त्विक इति । परिणतजिनवचनानां प्रति जिनवचनपरिणतिर्हि भवरोगौ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षधरूपा तस्यां चावश्यसदनुष्ठान एव चिकीर्षा भवति यदाह--आगमवचनपरिणतिर्भवरोगसदौषधं यदनपायं। तदिह परः सद्बोधः सदनुष्ठानस्य हेतुरिति ॥ २३७ ॥ न प्रवाहरूपेऽनुष्ठान इति गाथार्थः ॥ ६६ ॥ पुनरिदमेव प्रकारान्तरेणाह—

मूलम्---जाण जिणिंदो निवसइ सम्मं हिययम्मि सुद्धनाणेण ।
ताण तिणं च विरायइ समिच्छधम्मो जणो सयलो ॥ ६७ ॥

व्याख्या–' जाण जिणिंदेत्ति ' येषां जिनेन्द्रो वीतरागो वसति तिष्ठति सम्यग् यथावस्थितस्वरूपेण क्वेत्याह-हृदये चेतसि केनेत्याह--शुद्धज्ञानेन निर्मलबोधेन शुद्धज्ञानादित्यर्थः। तेषां मनसीति गम्यते तृणमिव विराजते प्रतिभाति। स मिथ्यात्वधर्मा मिथ्यालीकः स चासौ धर्मश्च मिथ्याधर्मः सह मिथ्याधर्मेण वर्त्तते यः स तथा। क ईदृश इत्याह--जनो लोकः सकलः समग्रो येषां हि हृदये जिनेन्द्रः सम्यग् निवसति शुद्धबोधात् तेषां हि समिथ्यात्वधर्मा सर्वो जनः तृणमिवाऽकिञ्चित्करो विराजते तद्धर्मस्यैवाकिञ्चिकारत्वात् यदुक्तं--स्पर्शो मेध्यभुजाङ्गवामघहरो वन्ध्यावि-

१. आगमवचनपरिणतिर्यथावत्तत्प्रकाशरूपा भवरोगसदौषधं भवरोगस्य संसारामयस्य सदौषधं तदुच्छेदकारित्वेन यद्यस्मात्, अन ( निर ) पायमपायरहितं निर्दोषं वर्त्तते। तदिह परः सद्बोधस्तच्च भवरोगसदौषधमागमवचनपरिणत्याख्यं परः प्रधानः सद्बोधः सम्यग्ज्ञानं वर्त्तते सदनुष्ठानस्य सुन्दरानुष्ठानस्य हेतुः कारणमिति कृत्वा। इति गाथार्थः ॥





For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संज्ञाद्रुमाः, स्वर्गश्छागवधाद्धिनोति च पितॄन् विप्रोपभुक्ताशनम् । आप्ताश्छद्मपराः सुराः शिखिहुतं प्रीणाति देवान् हवि–श्चेत्थं वल्गु च फल्गु च श्रुतगिरां को वेत्ति लीलायितम् ॥२३८॥ तथा--" सव्वत्थ अत्थि धम्मो जा मुणियं जिण न सासणं तुम्ह । कणयाउराण कणगुव्वससियपयमलब्भमाणाणं ॥२३९॥ इति गाथार्थः॥६७॥परिणतजिनवचनानां लोकप्रवाहधर्मो नटचरितमिव प्रतिभातीत्युक्तं,प्रागथ,तदितरेषां यल्लोकप्रवाहाद् भवति तदाह— मूलम्----लोयपवाहसमीरण उद्दंडपयंडचंडलहरिए ।

दढसम्मत्तमहाबल--रहिया गुरुया विहल्लंति ॥ ६८ ॥

व्याख्या–'लोयपवाहेत्ति' लोकानां विवेकवैकल्येन गतानुगतिकागतानां प्रवाहोऽनुश्रोतो रूपः स एव समीरणो वायुस्तस्योद्दण्डा उद्गतदण्डेव प्रचण्डा प्रौढा निविडा चण्डा रौद्रा या लहरीव कल्लोल इव लहरी वेगविशेषः, सा लोकप्रवाहसमीरणोद्दण्डप्रचण्डचण्डलहरी तया करणभूतया प्रेरिता इति प्रस्तुतं, दृढं निश्चलं तच्च तत्सम्यक्त्वं च दृढ-सम्यक्त्वं भगवद्वचनपरिणामरूपं तदेव महद्गुरुकं बलं सामर्थ्यं तेन रहिताः, सम्यक्त्वबलेन दृढा हि समीरणलहर्यां पर्वता इव देवैरपि न चाल्यन्ते । यतः--दट्ठूण कुलिंगीणं तसथावरभुयमद्दणं विविहं । धम्माओ न चालिज्जइ देवेहिं सइंदएहिं पि ॥ २४० ॥ गुरवोऽपि महान्तोऽपि कुलऋद्धिस्वभावाद्यपेक्षया महत्त्ववन्तोऽपि आस्तां लघव

१ बोकडा. २. मिथ्या.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यपेरर्थः । हल्लंति चलन्ति वृक्षा इवेतस्ततो दोलायमानानैकत्रास्थां बध्नन्तीति । लोकप्रवाहप्रभञ्जनप्रचण्डलहरीप्रेर्यमाणा हि--" केवलमणोहिचउदसदसनवपुव्वीहि विरहिए इन्हिं । सुद्धमसुद्धं चरणं को जाणइ कस्स भावं वा ॥१॥ तथा-" सुविहियदुव्विहियं वा नाहं जाणामहं खु छउमत्थो । लिंगं तु पुययामी तिगरणसुद्धेण भावेण ॥२॥ इत्यादिप्रकारेण दोलायमानाश्चलन्तीति गाथार्थः ॥ ६८ ॥ अथ ते लोकप्रवाहप्रेरिताः कदापि जिनमतहीलामपि कुर्युरिति तद्दोषमाविर्भावयन्नाह—

मूलम्—जिणमयलवहिलाए जं दुक्खं पाउणंति अन्नाणी ।
नाणीण तं सरित्ता भयेण हिययं थरत्थरइ ॥ ६९ ॥

व्याख्या—' जिणमयेत्ति ' जिनमतं परमेष्ठिशासनं तस्य लवोऽशस्तस्य हीला निन्दा तया यत् दुःखमशर्म प्राप्नुवन्ति लभन्ते अज्ञानिनः सम्यग्ज्ञानरहिता मिथ्यादृष्टय इत्यर्थः । ज्ञानिनां सम्यक्ज्ञानवतां तद्दुःखं स्मृत्वा विचिन्त्य--" न युज्यते प्रतिक्षेपः, सामान्यस्यापि देहिनः । आर्यापवादस्तु सतां, जिह्वाच्छेदाधिको मतः ॥ १ ॥ " इत्याद्यागमवचनात् परिभाव्य भयेन साध्वसेन हृदयं मनः थरथरायते कम्पत इति । अयमाशयोऽन्येषामपि हीला दुरन्तदुःखाय सम्पद्यते ॥ यदुक्तं--"परपरिभवपरिवादादात्मोत्कर्षाच्च बध्यते कर्म्म । नीचैर्गोत्रं प्रतिभवमनन्तसंसारदुर्म्मोच्यम् ॥ २४१ ॥ " विशेषतो जिनधर्मस्य तल्लवहीलाया आशातनासम्भवात् सा चानन्तसंसा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रनिमित्तं, यदाह--आसायणमिच्छत्तं आसायणवज्जणाउ सम्मत्तं । आसायणानिमित्तं कुव्वइ दीहं च संसारं ॥ २४२ ॥ इति ज्ञानिनामज्ञानिकृता च हीला प्राप्तदुःखस्मरणेन हृदयं भयेन कम्पत इति जिनमतहीला न कर्त्तव्येति गाथार्थः॥६९॥ प्रसिद्धाज्ञानिनां जिनमतलवहीलया दोषमुपभाव्याथ पुनर्योऽभिनिवेशग्रहगृहीतोऽनाभोगेन वा स्वं धार्मिकं जिनभक्तं च मन्यमानोऽपि न सद्विधिं वेत्ति तं प्रति बोधयितुमनाः स्वात्मानं व्याजीकृत्याह—

मूलम्—रे जीव ? अन्नाणीणं मिच्छदिट्ठीण नियसि किं दोसे ।
अप्पा वि किं न याणसि नज्जइ कट्ठेण सम्मत्तं ॥ ७० ॥

व्याख्या--' रे जीवेत्ति ' रे जीवात्मन् ? आज्ञानिनां मिथ्यादृष्टीनां मिथ्यात्वरतानां ' नियसित्ति ' पश्यसि किमिति क्षेपे दोषान् दूषणानि यदज्ञानिनो जिनमतहीलया यद्दुःखं प्राप्नुवन्ति तेन ज्ञानिनां हृदयं भयेन कम्पते । इत्येवंरूपान् यतस्तेऽज्ञानत्वाद्विवेकादिरहिततयोन्मार्गमपि यान्तोऽनपराधिन इव भवन्ति, यतः--एकं हि चक्षुरमलं सहजो विवेकः तद्वद्भिरेव सह संवसतिर्द्वितीयम् । एतद्द्वयं भुवि न यस्य सः तत्त्वतोऽन्ध, स्तस्यापमार्गगमने वद कोऽपराधः ॥ २४३ ॥ आत्मानमपीति लुप्तद्वितीयान्तं पदं अपिशब्द एव शब्दार्थः , तत आत्मानमेव त्वं किं न जानासि यत्परदोषान् पश्यसि । यस्त्वमपि जिनशासनं प्रतिपद्य सूत्रोत्तीर्णकरणेन कुदेवार्चनेन कुगुरूपास्त्या कदाग्रहादिभिः परमार्थतो जिनमतमकुर्वन् पूर्वगाथोक्तं दोषं दुःखप्राप्तिलक्षणं प्राप्त एवासि । ततश्च त्वयाऽपि ज्ञायतेऽव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गम्यतेऽत्र च ज्ञानं सम्यक्त्वप्राप्तिपूर्वमेवावगन्तव्यम् । कष्टेन दुःखेनोपदेशसहस्रदानरूपेण सम्यक्त्वं दर्शनं याथातथ्ये-नार्हच्छासनमित्यर्थः । ततोऽयं भावः, रे जीव ? अज्ञानिनां दोषान् किं पश्यसि यदमी सम्यक्त्वं न जानन्ति । जिन-मतहीलनादात्मानमेव प्रतिपन्नजिनमतमपि तदुक्ताकरणेन हीलकं किं न जानासि, यत् सम्यक्त्वं त्वयापि कष्टेन ज्ञा-यते ॥ अथवा "**सर्वस्यात्मा गुणवान् सर्वः परदोषदर्शने कुशलः । सर्वस्य चास्ति वाच्यम्, न चा-त्मदोषान् वदति कश्चित्** ॥ इति गाथार्थः ॥ ७० ॥ ननु किमिदमुक्तं यत्त्वमात्मानं किं न जानासीत्यादि यावदहं शुद्धं जिनधर्ममेव करोमि । परं लोकानुवृत्त्या कदापि गोत्रदेवी पूजा क्रमायातकुगुरुसेवादि करोमि नैतावता मम जिन-मतहीलनादिको दोषः, सम्पत्स्यते इति पराशङ्कामुद्भाव्य तां निराकर्त्तुं सदृष्टान्तं परस्य मूढतामाह—

मूलम्---मिच्छत्तमायरं त वि जे इह वंछंति सुद्धजिणधम्मं ।
ते घत्था वि जरेणं भुत्तुं इच्छंति खीराई ॥ ७१ ॥

व्याख्या--'**मिच्छत्तमायेत्ति**' मिथ्यात्वं गोत्रदेव्यादि कुदेवपूजनपार्श्वस्थादिकुगुरूपासनाऽविधिधर्मसेवालक्षण-माचरन्तोऽपि ये केप्यज्ञाना इह जगति वाञ्छन्ति अभिलषन्ति शुद्धजिनधर्मं निर्मलार्हद्धर्मसम्यक्त्वमित्यर्थः । ते ग्रस्ता अपि कवलीकृता अपि ज्वरेण रोगविशेषेण भोक्तुमिच्छन्ति खादीतुं वाञ्छन्ति खीरादि आदि शब्दात् खण्डघृतपरि-ग्रहः दुग्धखण्डघृतानीत्यर्थः । अयमभिप्रायो यथा ज्वरग्रस्तः क्षीरखण्डादिभोजनेन प्रत्युतापायमेव प्राप्नोति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न तु कमपि गुणं । एवं मिथ्यात्वमाचरन् यः शुद्धमर्हद्धर्मं चिकीर्षति । स प्रत्युताशातनालक्षणमपायमाप्नोतीति दोषस्तदवस्थ एवेति गाथार्थः ॥ ७१ ॥ मिथ्यात्वमाचरन्तोऽपि ये शुद्धं धर्ममिच्छन्ति तद्दोषमेवाह—

मूलम्—जह केइ सुकुलवहुणो सीलं मइलंति लिंति कुलनामं ॥
मिच्छत्तमायरंत वि वहंति तह सुगुरुकेरित्तं ॥ ७२ ॥

व्याख्या—' जह केत्यादि ' यथेत्युपमायां काश्चित् पुंस्त्वनिर्देशोऽत्र प्राकृतत्वात्, सुकुलवध्वः उत्तमकुलनार्यः शीलं सदाचारं गुप्ताङ्गत्वसलज्जत्वपरपुरुषासम्भाषणत्वानुद्भटवेषत्वादिकं मलिनयन्ति दुश्चरितत्वादिना मलिनीकुर्वन्ति खण्डयन्तीत्यर्थः । लान्ति च गृण्हन्ति । पुनः कुलनाम वंशाभिधानं यद्वयममुकक्षत्रियब्राह्मणश्रेष्ठिसार्थवाहादिकुलवध्वः एवं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह—' मिच्छत्त'ति मिथ्यात्वं कुदेवपूजोत्सूत्रभाषणादिकमाचरन्तोऽपि कुर्वतोऽपि वहन्ति । तथा तेन प्रागुपन्यस्तदृष्टान्तप्रकारेण 'सुगुरुकेरित्तंति 'देशीभाषया सगुरुसत्कत्वम् इदमुक्तं भवति ॥ यथा-सुकुलवध्वः शीलं मलिनयन्त्यः कुलनाम च गृण्हन्त्यः कुलं कलङ्कयन्ति ।तथा साधुश्रावका अपि मिथ्यात्वं कुर्वन्तो वयं सुगुरोरमुकस्य शिष्या इति, सुगुरुसत्कत्वं वहन्तो गुरूणामपभ्राजनां कुर्वन्ति । यथा अहो सुगुरुताऽमीषां येषामुपदेशादेवं मिथ्यात्वं प्रवर्त्तते । यदि चैतद्गुरवो निवारयन्ति तर्हि कथममी तदुपासका मिथ्यात्वं कुर्वन्तीति मिथ्यात्वमाचरन्तोऽपि ये जिनधर्ममिच्छन्ति तेषां गुरुतराऽपभ्राजनालक्षणो दोष इति गाथार्थः ॥ तथा—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—उस्सुत्तमायरंत वि ठवंति अप्पं सुसावगत्तंमि ।
ते रुद्दरोरघत्थ वि तुलंति सरिसं धणड्ढेहिं ॥ ७३ ॥

व्याख्या—' उस्सुत्तमायेत्ति उत्सूत्रमाचरन्तोऽपि अविधिना जिनमज्जनपूजाप्रतिक्रमणसामायिकादिकुर्वन्तोऽपि स्थापयन्ति निवेशयन्त्यात्मानं सुश्रावकत्वे शोभनश्रमणोपासकभावे किल वयं सुश्रावका इति, ये ते रौद्ररोरग्रस्ता अपि भावप्रधानत्वान्निर्देशस्येति दारिद्र्यपीडिता अपि तोलयन्ति गणयन्ति सदृशं समानमात्मानमिति गम्यते । कैरित्याह–धनाढ्यैर्धनसमृद्धैः अयं भावो यथा दारिद्र्यपीडिता आत्मानं धनाढ्यैः समं तोलयन्तो हास्याद्यनर्थभाजनं भवेयुः । एवं सूत्रोत्तीर्णं कुर्वाणा अपि वयं सुश्रावका उपलक्षणत्वात् सुयतयो चैत्यादि वन्दतो मिथ्यात्वालापस्याऽनर्थं प्राप्नुयुरिति गाथार्थः ॥ ७३ ॥ पुनर्मूढतामेवाह–

मूलम्—किविकुलकमंमि रत्ता किविरत्ता सुद्धजिणवरमयंमि ।
इय अंतरम्मि पिच्छह मूढा नायं न याणंति ॥ ७४ ॥

व्याख्या–' किविकुलेति ' केऽपि विवेकाभावान्मिथ्याभिनिवेशान्धतमसाच्छादितसन्मार्गाः कुलक्रमे निजनिजान्वयमात्रधर्मे प्रवाहरूपे भूरि भवनिबन्धने रक्ता सक्ताः, केऽपि च लघुकर्माणः प्रोन्मीलद्विवेकलोचना भवभीरवो रक्ता



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रागवन्तः प्रीतिपरा इत्यर्थः । शुद्धजिनवरमते शुद्धमविधिमलकलङ्कापगमाज्जिनवरमतं सर्वज्ञशासनं जिनधर्म इति यावत् तस्मिन् सिद्धिसुखहेतौ इति पूर्वार्द्धोक्ते अन्तरे विशेषे विवेक्यविवेकिनोः सत्यपीति गम्यते पश्यत विलोकयत कौतुकमिति शेषः । श्रोतॄनुद्दिश्य भणति मूढा मूर्खा न्यायं निश्चित आयः परिच्छेदः सर्वे गत्यर्था ज्ञानार्था इति वचनात् न्यायः परिच्छेद्यनिश्चयस्तं न जानन्तीति न बुध्यन्ते । अयं भावः ये कुलक्रमे रक्तास्तेषां धर्माभावो युक्त्या लौकिकानामपि सिद्धिरेवान्यथा तेऽपि स्वकुलक्रमासक्तान् म्लेच्छान् निर्द्धर्मान् वक्तुं न शक्नुयुः । वदन्ति च म्लेच्छादीन् धर्मरहितान् तथा ये च जिनमते रक्तास्तेषां धर्मसिद्धिस्वकृत्यस्याङ्गीकरणाल्लौकिकैरप्यङ्गीकृतैव, । यदाहुस्ते–" पञ्चैतानि पवित्राणि सर्वेषां धर्म्मचारिणाम् । अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् ॥ २४९ ॥ " अतः प्रकटमेवान्तरं कुलक्रमरक्तानां शुद्धजिनमतरक्तानां च सत्यपि चास्मिन् मूढा न्यायं परिच्छेद्य निश्चयं यत्कुलक्रमस्य भवहेतुत्वं जिनमतस्य च मोक्षहेतुत्वं, तस्मात् कुलक्रमाभिमानं विहाय जिनधर्म एव कर्त्तुमुचित इति न जानन्ति नावगच्छन्तीति पश्यत भो श्रोतार इति गाथार्थः ॥७४॥ न्यायमजानानाश्च मूढा यादृशाः स्युस्तदाह—

मूलम्--संगो वि जाण अहिओ तेसिं धम्माइं जे पकुव्वंति ।
मुत्तूण चोरसंगं करंति ते चोरियं पावा ॥ ७५ ॥

व्याख्या--' संगोवित्यादि ' सङ्गः संसर्गमात्रमास्तां सेवनकथितकारित्वादिरित्यपि शब्दार्थः । येषां इति मि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



थ्यात्विनां अहितो दुरन्तदुःखहेतुकः चोरपल्लिनिवासिवणिग्जनज्ञातेन तेषां मिथ्यात्विनामेव धर्म्मान् वक्ष्यमाणान् पापनवम्यां चामुण्डापूजादीन् ये मूर्खाः प्रकुर्वन्ति प्रकर्षेण विदधति। ते किं कुर्व्वन्तीत्याह–मुक्त्वा त्यक्त्वा चोरसङ्गं तस्करसम्बन्धं कुर्वन्ति ते चोरिकां चौर्यं पापाः पापप्रधानाः, अयमाशयो यथा कश्चित् प्राक् चौरसंसर्गवान् तदत्यासङ्गात्सञ्जातदुष्टबुद्धिस्तत्सङ्गमात्रेणासन्तुष्टः केवलं तत्सङ्गं मुक्त्वा चौर्यमपि करोति शूलारोपहस्तनाशाच्छेदादिदुःखान्यगणयन् ततश्च विनश्यति। तथा मूढोऽपि येषां सङ्गोऽप्यहितस्तदुक्तं--धर्मं कुर्व्वन् भाविभयमगणयन् भवावर्त्ते पतितो नश्यति, ततश्च तत्तुल्यो भवतीत्यर्थः॥ ७५ ॥ यथा च तेषां धर्मान् कुर्वन्ति तथा सनिर्वेदमाह--

**मूलम्--जत्थ पसुमहिसलक्खा पव्वे हम्मंति पावनवमीए।**
**पुजंति तं पि सड्ढा हा हीला वीयरागस्स ॥ ७६ ॥**

व्याख्या--'जत्थपसुमेत्ति' यत्र यस्मिन् पर्व्वणि पापनवम्यां चैत्राश्विनयोः शुक्लनवमीदिवसलक्षणे पशवश्छागा महिषा लुलाया उपलक्षणमेतन्मनुष्य शूकरादीनां यतो वङ्गादिषु देशषु मनुष्या अपि देव्यग्रे हन्यन्ते व्यापाद्यन्ते। तदपि पर्वपापनवमीलक्षणं यत्र तथा रुधिरकर्द्दमो भवति आस्तां दीपोत्सवबलिपर्वादिः। श्राद्धाःकुलक्रमायातत्वादिनाङ्गीकृतजिनमताः श्रमणोपासकाः पूजयन्ति अर्चयन्ति। पर्वशब्दस्योपचारात् तत्पूर्वपूज्यं देवताविशेषं पूजयन्ति, हा इति, हीला निन्दा वीतरागस्येयमिति गम्यम्, इदमुक्तं भवति यन्नवरात्रे (त्रौ) तदन्तनवम्यां च छागमहिषमनुष्यादयो यदग्रे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हन्यन्ते । तामपि पिशाचीं गोत्रसुरीयमस्मदीया इति कृत्वा तत्रैव रुधिरकर्दमे स्थितां स्पर्शस्याप्ययोग्यां तस्मिन्नेव दिनेऽन्यत्र गृहादौ वा स्थितां श्रावका नैवेद्यादिभिरर्चयन्ति पूजयन्ति, तदग्रे ढौकितं च तन्निःशूका भुञ्जन्ते । सैषा वीतरागस्य निन्दा तैः कृता भवति । यथा--अहो येऽमी श्रावका रुधिरमात्रदर्शनान्नश्यन्ति तेऽपि भट्टारिकायाश्चामुण्डा
४ सत्यिकादेर्महिम्नाऽऽकृष्टा रुधिरपंकिलां भुवं पादाभ्यामाक्रमन्तः पूजनार्थमायान्ति तत एवं ज्ञायते नैतत्समो वीतराग इत्येवंविधहीलायाः कारणत्वात्त एव हीलकाः तस्मान्न तत्पूजा कर्त्तव्या इति गाथार्थः ॥ ७६ ॥ अथ यः कुटुम्बस्वामी भूत्वेदृशं मिथ्यात्वं प्ररूपयति तस्य दोषमाह—

मूलम्—जो गिहकुटुंबसामी संतो मिच्छत्तरोवणं कुणइ ।
८ तेण सयलो वि वंसो पक्खित्तो भवसमुद्दम्मि ॥ ७७ ॥

व्याख्या–'जो गिहेत्ति' यः कश्चिदनिर्दिष्टनामा गृहं भार्यादिकुटुम्बं तयोः स्वामी सन् योगक्षेमकारकः सन् मिथ्यात्वरोपणं मिथ्यात्वस्थापनं, यथाऽद्य गोत्रदेवताया इदमिदं नैवेद्यं कर्त्तव्यमिदमुपयाचितकं कार्यं विवाहमुण्डनादावेतत्पूजनेऽयं विधिरित्यादि करोति विधत्ते । तेन गृहकुटुम्बस्वामिना सकलः समग्रोऽपि शब्दो भिन्नक्रमः स च वं-
१२ शपदेन योज्यते । ततश्च वंशोऽप्यन्वयोऽपि,न केवलं स्वात्मैव प्रक्षिप्तो निक्षिप्तो भवसमुद्रे संसारार्णवे यतो मिथ्यात्वं त्रिविधम् त्रिविधेन श्रावकोऽपि प्रत्याख्याति । नत्वणुव्रतानीव द्विविधत्रिविधादिना । यदुक्तं--न करेइ सयं मिच्छं न कार-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेई करंतमवि अन्नं । नो अणुजाणइ मणसा एवं वायाइ काएणं ॥ २४६ ॥ तथा--एयं अणंतरुत्तं मिच्छं मणसा न चिंतइ करेमि । सयमेसोव करेऊ अन्नेण कए व सुट्ठु कयं ॥ २४७ ॥ एवं वाया न भणइ करेमि अन्नं च भणइ करेहि । अन्नकयं न पसंसइ न कुणइ सयमेव काएणं ॥ २४८ ॥ करसन्न(ह)भमुहखेवाइएहिं न य कारवेइ अन्नेणं । न पसंसइ अन्नकयं त्थोडियहसियाइं चिट्ठाहिं ॥ २४९ ॥ ततश्च यदा मिथ्यात्वविषयानुमतिरपि निषिद्धा, तदा यः करणकारणानुमतिभिः कुटुम्बं मिथ्यात्वे स्थिरीकुर्वन् तत्स्थापयति, स आत्मानं वंशं च भवसमुद्रे प्रक्षिपतीति किमत्र चित्रमिति गाथार्थः ॥७७॥ यानि मिथ्यात्वानि प्ररूपितानि वंशमपि भवसमुद्रे प्रक्षिपन्ति तान्येव कतिचिन्नामतोऽभिधाय तत्कर्तृणां सम्यक्त्वाभावं प्रतिपादयन्नाह-

मूलम्—कुंडचउत्थी नवमी बारसीइ पिंडदाणपमुहाइं ।
मिच्छत्तभावगाइ कुणंति तेसिं न सम्मत्तं ॥ ७८ ॥

व्याख्या-' कुंड चेति ' कुण्डश्चतुर्थी लौकिकः पर्वविशेषः, करवा चतुर्थिरिति प्रसिद्धिः । नवमी पूर्वोक्तैव द्वादशी वत्सद्वादश्यादिका पिण्डदानं पितॄणां तत्प्रमुखाणि प्रमुखशब्देन लौकिकलोकोत्तरदेवगुरुसम्बन्धिसर्वमिथ्यात्वग्रहः, तानि च मिथ्यात्वानि पूर्वर्षिकृत कुलकेन ज्ञातव्यानि । तच्चेदम् -" देवाण गुरूणंपि य सिरमणिणो जिणवरस्स पयपउमं । पणमिय सम्मसरूवं सुयाणुसारेण दंसेमि ॥ १ ॥ सम्मत्तं सद्दहणं तं पुण गुरुदेवधम्मविसयं तु । सुयभणि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यगुणज्जुएसु तेसिं पडिवत्तिरूवं जं ॥ २ ॥ जं पुण सग्गुणवियलन्नदेवमाईसु सद्दहाणं तं । समाउ विवरीयं मिच्छत्तमुवाहिओ चउहा ॥ ३॥ लोइय लोउत्तरियं देवगयं गुरुगयं च उभयंपि । पत्तेयं नायव्वं जहक्कमं सुत्तओ एवं ॥४॥ हरिहरबंभाइणं गमणं भवणेसु पुयनमणाई । वज्जिज्ज सम्मदिट्ठी तदुत्तमेयं पि निच्छयओ ॥ ५ मंगलनामग्गहणं विणायग्गाईण कज्जपारंभे । ससिरोहणिगेयाईं विणायगट्ठवण वीवाहे ॥ ६ ॥ छट्ठी पुयणमाऊण ठावणबीयाइं चंददसियं च । दुग्गाईणो वाईया तोतलया गहाइमहिमं च ॥७॥ चित्तट्ठमिहनवमीरविरहनिक्खमणसूरगहणाई । होलियपयाहिणं पिंडपाडणं थावरे पूया ॥ ८ ॥ देवइ सत्तमि नागाण पंचमी मल्लगाइमाऊणं । रविससिवारेसु तवो कुदिट्ठिगुत्ताइ सुरपूया ॥ ९॥ दुव्वट्ठम्मिसंकंती पुया रेवंतपंथदेवाणं । सिवरत्तिवच्छबारसि खित्ते सीयाइ अच्चणयं ॥१०॥ नवरत्तीइसु नव पूअ--माइबुह अट्ठमग्गिहोमं च । सुन्निणिरुप्पिणिरंगिणि पूया घयकंबलो माघे ॥ ११ ॥ कज्जलतइया तिलदब्भ–दाणमवि जं जलंजलीदाणे । सावणवंदण छट्ठी-गोपुच्छाइसु करुस्सेहो ॥ १२ ॥ अकच्छट्ठी गोरी-भत्तं च सवित्ति पियरपडिमा उ । उत्तरयणं च भुयाण-मल्लगं गोमयतियज्जा ॥ १३ ॥ देवस्स सुयणउट्ठावणं आमली फन्ह पंडवाणं च । एगारसी तवाइ परतित्थे गमणखणकरणं ॥ १४ ॥ लोइयदेवाइगयं एमाइ किच्च मिच्छत्तं । अन्नंपि तदुवइट्ठं वज्जिज्जा सद्धकरणाइ ॥१५॥ सद्धम्मासिय छम्मासियाइं पवदाणकन्नहलंतिदओ । जलघडदाणं लाहणय दाणमविमिच्छदिट्ठीणं ॥ १६ ॥ कोमारियाइ भत्तं धम्मत्थं वव्वरिउ चित्तम्मि । अस्संजयलोयाणं अक्खयतइया अकत्तणयं

१ सद्गुणविकलान्यदेवादिषु. २. सम्यक्त्वात् ३ विनायकानां गणपतीनां.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



|| १७ || संडविवाहो जिट्ठिणि अमात्रसाए विसेसओ भुज्जं । कूवाइखणणगोयर-हिंडणं पियरहंतइय || १८ || वायस बिरालमाईं पिंडो तरुरोवणं पवित्तयओ । तालायरकहसवणं गोधणमह इंदजालं च || १९ || धम्मग्गिदय नड-पिच्छणं च पायकजु-ज्झदरिसणयं । एवं लोगगुरूण वि नमणंदिय तावसाईणं || २०|| मुलस्सेसा जाए बाले भवणम्मि बंभणा हवणं । तक्कहसवणं दाणं गिहगमणं भोयणाईयं || २१ || एवं लोइयमिच्छं देवगयं गुरुगयं च परिहरिउं । लोउत्तरे विवज्जइ परितित्थियसंगहियबिंबे || २२ || जत्थ जिणमंदिरंमि वि निसिप्पवेसोऽबलाण समणाणं । वासो य नंदिबलिदाण-नाहणनट्टं पयट्टा य ||२३|| तं बोलाइं आसायणाओ जलकेलि देवअंदोलं । लोइयदेवगिहेसु वट्टइ असमंजसं एवं || २४|| तत्थ वि सम्मद्दिट्ठी ण सायरं सम्मरक्खणपराण । उस्सुत्तवज्जगाणं कप्पइ सवसाण नोगमणं ||२५|| एसो चेव विसेसो हराइ भवणाउ अरिहभवणस्स । एगत्थ जं विहीए सव्वं विवरीयमन्नत्थ || २६ || जह तह पवत्तिजुत्तं जइ तं हुज्जा पमाणमेवेह । निट्ठिवणाइकरणं पमाइनिरत्थयं तइया || २७ || जो चितिसंझा नियमो जिणच्चणेसो निरत्थओ हुज्जा ।तह सड्ढेणसुइणा पूयविहाणं जिणाणंपि || २८ || जिणबिंबाण पइट्ठाइगारिसूरि पसाहणजमिह । जुगपवरागम विरइय पयट्ठकप्पेसु किं तेणं || २९ || ता सव्वंपी विहीए पइट्ठपूयाइ जत्थ वावरइ । तत्थेव सुदिट्ठीणं जुत्तं गमणाइ नित्थउय||३०|| जे लोगुत्तमलिंगालिंगि य देहा वि पुप्फ ंगोलं । आहाकम्मं सव्वं जलं फलं चेव सच्चित्तं||३१|| भुजंति थीपसंगं ववहारं गंथसंगहं भुसं । एगागीत्तब्भमणं सच्छंदं चेठियवयणं || ३२ || चेइयमढाइवासं वसहीसु वि निच्चमेव संठाणं । गेयं नेयं चरणाणं अच्चावणमविक्कणयकुसमेहिं|| ३३ ||कुव्वंति अहवकेवल-मागममवलंबिऊण माय-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रणं । वायामित्तेण निन्हवंति तत्थेव निरया त्ति ॥ ३४ ॥ सपुन्नंबीवंदण— छव्विहमावस्सयं उभयकालं । फासुयजलं वमुह— पुत्तिगाइ वंदणयदाणं च ॥ ३५ ॥ पक्खाइवलिए दाणं न्हाण च खीरमाइहिं । जिणबिंबेसु अजुत्तं सड्ढाणमियं ति जे केवि ॥ ३६॥ सावयपयट्टकहगा कहंति नियमइविग्गपियसुयत्था । ते विसयसुयहराण जुगपवराणं पी खिंसंति ॥ ३७ ॥ येणेयं पन्नवियं जुगपवरेणं सुयाणुसारेण । तम्मग्गपवत्तेहिं बहुहा य समत्थियं सव्वं ॥ ३८ ॥ चियवासाईणं वएसि दिट्ठो न कत्थइ निसेहो । एमाइ ता तदुत्तं उस्सुत्तंविय मुणेयव्वं ॥ ३९ ॥ सुत्ताणुसारा तेसिं पि वंदणाई न कप्पए काउं । पासत्थाई जम्हा सुयम्मि भणिया अनमणिज्जा ॥ ४० ॥ ता सव्वत्थवि इत्थं सुयविवरीतणेण सयमेव । मिच्छाभावो सम्मं भावेयव्वो सूयन्नूहिं ॥ ४१ ॥ इह चउविहंपि मिच्छं वज्जित्ता सुत्तदंसियविहीए । वट्टंते जिणभवणे साहूसुय आयरो कज्जो ॥ ४२ ॥ तिविहं तिविहेणेयं मिच्छत्तं जेहिं वज्जियं दूरं । निच्छयओ ते सड्ढा अन्नेऊण नामओ चेव ॥४३॥ जिणवईमयाणुसारा एयं पालंति जे उ सम्मत्तं । ते सिग्घं निव्विग्घं पावंति धुवं सिवं सुहयं ॥४४॥ ततश्चैतानि कुलकोक्तान्यन्यानि लोकप्रसिद्धानि सर्वाणि मिथ्यात्वभावकानि मिथ्यात्वभावसूचकानि कुर्वन्ति विदधति यत्तदोर्नित्यसम्बन्धात् येतेषां न सम्यक्त्वं सम्यग्दर्शनं भवतीति गम्यत इति गाथार्थः॥७८॥प्राक् पाश्चात्यगाथया यदुक्तं ये गृहकुटुम्बस्वामिनो मिथ्यात्वस्थापनं कुर्वन्ति तैर्वंशोपि भवसमुद्रे क्षिप्त इत्यधुना तद्व्यतिरेकमाह—

मूलम्— जह अइकुलम्मि खुत्तं, सगडं कढंति केइ धुरधवला ।
तह मिच्छाओ कुडुंबं इह विरला केइ कड्ढंति ॥ ७९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या— ‘ जह अइत्यादि ’ यथेत्युपमायां ‘अइकुलमिति’ देशीपदत्वात् अतिपंकिलप्रदेशे कर्दमबहुलस्थाने ‘ खुत्तंति ’ मग्नं शकटं रथं कर्षन्ति निष्काशयन्ति केचित् सर्वं वाक्यं सावधारणमिति केचिदेव विशिष्टजातिलक्षणबलादिगुणयुताधौरेयधवलाः प्रधानवृषभाः, नतु सर्वेऽपि गल्यादयोऽपि । तथेत्युपनये मिथ्यात्वात्पूर्वभणितस्वरूपात् कुटुम्बं परिकरं इह जगति विरला अल्पे एव केचित्कदाग्रहदोषरहिता लघुकर्माण आसन्नसिद्धिकाः कर्षन्ति समुद्धरन्ति न तु तदितरे । अयमभिप्रायः । यथा–बहुलकर्दमे मग्नं शकटं धौरेया निष्काशयन्ति । तथा विरला पुण्यवन्तो मिथ्यात्वात् स्वकुटुम्बमुद्धरन्ति सुगुरूपदेशश्रावणादिना स्वयं च मिथ्यात्वासमञ्जसताप्रदर्शनेनेति गाथार्थः ॥७९॥ ननु किमर्थमेवमुक्तं यद्विरलाः केऽपि कुटुम्बं मिथ्यात्वात् कर्षन्तीति यावता सर्वजगत्प्रसिद्धं भगवन्तं वीतरागं दृष्ट्वा स्वयमात्मानं सर्वे मिथ्यात्वादुद्धरिष्यन्तीत्याशंक्याह—

**मूलम्— जह वद्दलेण सूरं महियलपयडं पि नेय पिच्छंति ।**
**मिच्छत्तस्स य उदए तहेव न नियंति जिणदेवं ॥ ८० ॥**

व्याख्या– ‘ जह वेत्ति ’ यथेति दृष्टान्ते वारां दलं वार्द्दलं तेन वार्द्दलेनाभ्रेण करणभूतेन सूरं सूर्यं सहस्रकरं महीतलप्रकटमपि पृथ्वीवलयप्रसिद्धमपि नैव प्रेक्षन्ते पश्यन्ति लोका इति गम्यते । निबिडवार्द्दलेन हि घटपटादिप्रकाशनेन पृथ्वीप्रकटमपि सूर्यबिम्बं न दृश्यते । एवं दृष्टान्तमभिधाय दार्ष्टान्तिकयोजनामाह- मिथ्यात्वस्य दर्शनमोहनीयकर्म-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रथमभेदलक्षणस्य च शब्दोऽनुक्तसमुच्चये स च गाथान्ते योक्ष्यते । उदये विपाके तथैव वार्दलाच्छादितसूर्यबिम्बन्यायेन
न 'नियंतित्ति' न पश्यन्ति न विलोकयन्ति भावदृशा जिनदेवं वीतरागं चकारादागमविधिप्रसाधकं गुरुं च ।
मिथ्यात्वपटललुप्तदृष्टयो हि सुदेवसुगुरून् जगत्प्रसिद्धानपि न पश्यन्तीति गाथार्थः ॥ ८० ॥ जिनदेवं वा पश्यन्तोऽपि
४ मिथ्यात्वरता गुणिमत्सरिणश्च भवन्ति । तादृशानां वाऽभाव एव वरमित्याह—

मूलम्— किं सो वि जणणिजाओ जाओ जणणीइ किं गओ विद्धिं ।
जइ मिच्छरओ जाओ गुणेसु तह मच्छरं वहइ ॥ ८१ ॥

व्याख्या-- 'किं सो वि जिणेत्ति' किमिति क्षेपे सोऽपि मानवो निर्देक्ष्यमाणदूषणोऽपि शब्द एव शब्दार्थः
८ स चाग्रेतनेन जातशब्देन सम्बध्यते जनन्या मात्रा लुप्तविभक्तिकपदं जात एवं अन्तर्भूतकारितार्थत्वात् प्रसूत एव स
जनन्या जात एव किमर्थमित्यर्थः । तादृशजनने हि जनन्यास्तत्कृतापराधपदता भवति । यतो लोकः पुत्रस्य दुश्चरितं
दृष्ट्वा- जननी यानि चिन्हानि,करोति मद्विह्वला । प्रकटानि तु जायन्ते,तानि चिन्हानि जातके॥२५०॥
इत्यादि कथनपुरस्सरं जनन्या एवायं दोषः यदयमीदृश इत्यादि तन्मातरमेव दूषयति तस्माद्जात एव वरमिति भावः।
१२ अथ च जातो जनन्या तथापि किं गतो वृद्धिं किमर्थं प्राप्त उपचयं जातमात्र एव किं न विलीन इत्यर्थः । तादृशो हि
वृद्धिप्राप्तो दुश्चरितमाचरन्नन्यानपि तत्र प्रवर्त्तयति । ततश्च स्वपरयोर्दुर्गतिहेतुत्वेनानर्थकारी स्यादिति वृद्धिमप्राप्त एव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वरम् ।कुत एवमित्याह- यदीत्यभ्युपगमे मिथ्यात्वरतो जातो मिथ्यात्वासक्तः सम्पन्नः गुणेषु आधाराधेययोरभेदोपचाराद् गुणिषु ज्ञानदर्शनचारित्रादिगुणयुतेषु, तथा समुच्चये मत्सरं मात्सर्यमसहिष्णुत्वं यदीतिपदं पाश्चात्यं सिंहावलोकितन्यायेन स्मर्यते वहति, धातूनामनेकार्थत्वात् करोति गुणिषु च यदि मत्सरं करोतीत्यर्थः । एतेनायमभिप्रायः–यो मिथ्यात्वरतस्तस्मिन् सर्वे दोषाः सम्भवन्ति । यदुक्तं--" नवि तं करेइ अग्गी नेय विसं नेय किण्हसप्पोअ । जं कुणइ महादोसं तिव्वं जीवस्स मिच्छत्तं ॥ २५१ ॥ तथा गुणिमत्सरोऽपि पीठमहापीठर्षिवन्महानर्थहेतुः । तदुक्तं–अइसुट्ठिउत्ति गुणसम्मउत्ति जो न सहइ जइ पसंसं । सो परिहाइ परभवे जहा महापीढपीढरिसी ॥ २५२॥ ततो यो मिथ्यात्वरतो यश्च गुणिषु मत्सरं वहति । स दुष्टत्वादजातोऽनुपचितश्च वरमिति गाथार्थः ॥ ॥ ८१ ॥ ननु मिथ्यात्वरतादीनामजातत्वमेव वरमित्याद्युक्तं तत्सत्यं, परं व्यन्तरविशेषाः क्षेत्रपालचामुण्डाद्या अस्मान् नाराधिताः सन्तोऽधुनैव मारयन्तीति भीत्या मिथ्यात्वरता भवामो । ननु सुखेनेत्याशंक्य तेषां व्यन्तराणां वेश्यादिसाम्येन निकृष्टत्वं प्रतिपाद्याऽकिञ्चित्करत्वमाह—

मूलम्—वेसाण बंदियाण य माहणडुंबाण जक्खसिक्खाणं
भत्ता भक्खट्ठाणं विरयाणं जंति दूरेण ॥ ८२ ॥

व्याख्या–' वेसाणेत्ति ' वेश्यानां पण्यस्त्रीणां बन्दिकानां कीर्त्तिपाठकानां चारणाद्युपलक्षणमेतत् चकारोऽनुक्त-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समुच्चयार्थः । स च कापालिसमुच्चायकः माहना ब्राह्मणा डुम्बाश्चाण्डालाः सन्तो ये गीतगानं कुर्वन्ति । ब्राह्मणाश्च डु-
म्बाश्च ब्राह्मणडुम्बास्तेषां यक्षा व्यन्तरविशेषाः क्षेत्रपालनारसिंहब्रह्मराक्षसादयः उपलक्षणत्वात् व्यन्तर्योऽपि चामुण्डा
सत्या वाराही प्रमुखा योगिन्यः शेषास्तुरुष्कगुरवस्तद्व्यन्तराश्च वा यक्षाश्च शेषाश्च यक्षशेषास्तेषां यक्षशेषाणां किमि-
४ त्याह--भक्ता भक्तिमन्तो भक्ष्यस्थानं भोज्यसमा इत्यर्थः । ' विरयाणंति ' पञ्चम्यर्थे षष्ठी तेन विरतेभ्यो यान्ति ग-
च्छन्ति दूरेन तदासन्ना भवन्ति, णमिति वाक्यालङ्कारे,अर्थवशात् विभक्तिपरिणाम इति वेश्यादय इति योज्यम्।इदमुक्तं
भवति, वेश्यादीनां हि ये भक्तास्तानेव ते भक्षयन्त्यधमत्वात्तेषां विरतेभ्यस्तु भीतभीता दूरं पलायन्ते । एवं यक्षशेषाद-
योऽपि भक्तिभाज एव भयोत्पादनादिना भक्षयन्ति । विरतेभ्यस्तु नश्यन्ति न तत्सन्मुखमपि द्रष्टुं शक्नुवन्तीति न
तद्क्रिया मिथ्यात्वादिरतैर्भाव्यमिति गाथार्थः ॥८२॥ यक्ष्यादयो विरतेभ्यो दूरे यान्ति ततस्तेभ्यो विरतैर्भाव्यमित्युक्तं
८ मागर्य च सन्मार्गगमनोपदेशः सूचितः । तत्र च ये सुखेन यान्ति ये च यान्त आश्चर्याय भवन्ति तानाह—

मूलम्–सुद्धे मग्गे जाया सुहेण गच्छंति सुद्धमग्गंमि ।
जं पुण उम्मग्गजाया मग्गे गच्छंति तं चुज्जं ॥ ८३ ॥

१२ व्याख्या–' सुद्धे मग्गेत्यादि ' शुद्धो मार्गो ज्ञानदर्शनचारित्रात्मकः सुविहितजनपथस्तत्र जाताः साधुतया श्रा-
वकतया वा निष्पन्ना अथवा शुद्धे मार्गे शुद्धमार्गविषये जाता गीतार्थास्ते सुखेनानायासेन गच्छन्ति व्रजन्ति । शुद्धमा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्गे प्रागुक्तस्वरूपे सुविहितगुरुपार्श्वप्रतिपन्नसाधुश्रावकव्रता गीतीर्था वा सन्मार्गं गच्छन्तीति तानाश्चर्यं, यदित्युपप्रदर्शने, पुनर्विशेषे यत्पुनरुन्मार्गजाताः पार्श्वस्थादिमार्गे साधुत्वेन श्रावकत्वेन वा निष्पन्नाः, मार्गे शुद्धविधिरूपे गच्छन्ति यान्ति कुमार्गाभिनिवेशत्यागेन । तच्चोद्यं--चित्रं उन्मार्गजातानां हि सन्मार्गगमनं महते कौतुकाय यतस्ते प्राय उन्मार्गं न त्यजन्ति । उन्मार्गभावनयाऽन्यं तं भावितत्वेन यच्च तादृशा अपि मार्गं प्रतिपद्यन्ते तदाश्चर्यमिति गाथार्थः ॥८३॥ ननून्मार्गजातानां सन्मार्गगमने किमित्याश्चर्यमित्याशंकानिरासाय च तद्दोषान् स्पष्टयन्नाह—

मूलम्---मिच्छत्तसेवगाणं विग्घसयाइं पि बिंति नो पावा ।
विग्घलवंमि पडिए दढधम्माणं पणच्चंति ॥ ८४ ॥

व्याख्या—' मिच्छत्तसेवेत्ति ' मिथ्यात्वसेवकानां जिनोक्तमार्गान्यमार्गाराधकानां विघ्नशतान्यपि प्रत्यूहशतान्यपि, आसतां द्वित्रा विघ्ना इत्यपेरर्थः । जायमानानि दृष्ट्वेत्यध्याहारः ' बिंतत्ति ' ब्रुवते वदन्ति नो नैव किञ्चिद्यथा अधुनाऽस्यायं धनहानिरपत्यत्वादिको विघ्नो जात इत्यादि पापा उन्मार्गजाताः । तर्हि किं कुर्वन्तीत्याह-- विघ्नलवेऽपि प्रत्यूहलेशेऽपि पतिते जात इत्यर्थः । दृढधर्म्मणां निश्चलसम्यक्त्वानां प्रनृत्यन्ति प्रकर्षेण हृष्टचिताः सन्तो नृत्यन्ति । इदमुक्तं भवति उन्मार्गजाता हि मिथ्यात्वं गोत्रदेवतापूजाप्रभृतिकुर्वतां दारिद्र्यदौर्भाग्यरोगशोकापत्यवियोगसुतानुत्पत्तिदुष्टसम्बन्धराजबन्धनहरणादिविघ्नशतानि जायमानानि दृष्ट्वापि नहि किञ्चिद् ब्रुवते , यथाऽस्यैतद्देवीपूजादि



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिथ्यात्वं कुर्वतोऽप्येष विघ्नोऽभूदिति । किन्तु कर्मण एवैष दोष इति वदन्ति । यथा च दृढधर्म्मणां विघ्नलवोऽपि क्रमे कण्टकमात्रभङ्गरूपोऽपि भवति । तदा ते प्रनृत्यन्ति हस्तनर्त्तनपूर्वकमुत्फुल्लगल्लाः सन्तो वदन्तीति । यथा अहो अनेन सम्यक्त्वं गृहीतं ततोऽस्यायं विघ्नः सम्पन्न इत्याद्येवंविधश्चोन्मार्गजातानां स्वभावो यद् भ्रामं भ्रामं पात्राण्येव दूषयन्ति । यतः-" शूनां च पिशुनानां च परवेश्मप्रधावताम् । प्रयोजनं न पश्यामः, पात्राणां दूषणादृते ॥ २५३ ॥ इति गाथार्थः ॥ ८४ ॥ उन्मार्गे जाता न त्वेवं जानन्ति—

मूलम्—सम्मत्तं संजुयाणं विग्घं पि हु होइ उच्छवसरिच्छं ।
परमुच्छवं पि मिच्छत्त--संजुयं अइमहाविग्घं ॥ ८५ ॥

व्याख्या—सम्यक्त्वं प्राग्वर्णितस्वरूपं तेन संयुताः सहितास्तेषां सम्यक्त्वसंयुतानां विघ्नो नपुंसकत्वं प्राकृतत्वात्, अपिशब्दः सम्भावनायां, तेनैव सम्भाव्यते यत्सम्यक्त्वं सर्वधर्ममूलं तस्मिंश्चाराध्यमाने विघ्ना विलीयन्त एव धर्मस्य मङ्गलरूपत्वात् ' धम्मो मंगलमुक्किट्ठमिति ' वचनप्रामाण्यात् धर्मेण पापमपनुदतीनि लौकिकश्रुतिभणनाच्च न तु सम्यक्त्वसहितानां विघ्नो भवति । अथ यदि प्राक् कृतप्रभूतदुष्कृतयोगात् तत्कालकृतधर्मेणानिरुध्यमानः स्तोकेनाम्भसा वह्निप्रसर इव कदाचिद्विघ्नोऽपि भवति । स च विघ्नोऽपि मरणादिः हु शब्दोऽवधारणार्थः, तस्य च व्यवहितसम्बन्धः भवति जायते उत्सवसदृशो महोत्सवसमान एव । पुण्यवतां हि मरणमप्युत्सवाय सुगतिप्राप्तिहेतुत्वात्, त-

For Private and Personal Use Only

दुक्तं--"तवनियमसुट्ठियाणं कल्लाणं जीवियं पि मरणं पि । जीवंति जइ गुणा अज्जिणंति सुगई उवेंति मरणा ॥ २५४ ॥ किं पुनर्विघ्नमात्रस्य वाच्यं सम्यक्त्वहीनानां तर्हि का वार्तेत्याह -परमोत्सवोऽपि प्रकृष्टमहोत्सवोऽपि मिथ्यात्वसंयुतोऽतिमहाविघ्नः मिथ्यात्वस्यातिदुष्टत्वात् । यदाह–" न मिथ्यात्वसमः शत्रु--र्न मिथ्यात्वसमं विषं । न मिथ्यात्वसमो रोगो न मिथ्यात्वसमं तमः ॥२५५॥ द्विष द्विषतमो रोगै--र्दुःखमेकत्र दीयते मिथ्यात्वेन दुरन्तेन जन्तोर्जन्मनि जन्मनि ॥ २५६ ॥ वरं ज्वालाकुले क्षिप्तो देहिनात्मा हुताशने । न तु मिथ्यात्वसंयुक्तं जीवितव्यं कदाचन ॥ २५७ ॥ अयं भावो मिथ्यात्विनां हि यः कश्चित् केनचित्पूर्वोपार्जितशुभकर्मवशेन पुत्रजन्मपाणिग्रहणादिर्महोत्सवो भवति, सोऽपि दुरन्तदुर्गतिनिपातहेतुमिथ्यात्वसहिततया महाविघ्न एव । यतो मिथ्यात्वं सर्वपापनिदानं पापाच्च सर्वाणि दुःखानि विघ्नभूतानि भवन्ति यदाह–इह जीवतां परिभवो घोरे नरके गतिर्मृतानां तु । किं बहूनां जीवानां पापात् सर्वाणि दुःखानि ॥२५८॥ तस्मान्मिथ्यात्वसहितः परमोत्सवोऽपि परमार्थतो विघ्न एव, यथा विषसम्पृक्तं परमान्नमपि विषमेव इति गाथार्थः ॥८५ यथा सम्यक्त्वसहितानां विघ्नोऽप्युत्सवो भवति तथाह—

मूलम्----इंदो वि ताण पणमइ हीलंतो निययङ्कवित्थारं ।
मरणंते वि हु पत्ते सम्मत्तं जे न बुड्डंति ॥ ८६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या--इंदो वि ताणेत्ति ' इन्द्रोऽपि देवराजोऽपि आस्तां राजादिरन्यस्तान् पुरुषान् प्रणमति प्रकर्षेण
नमस्करोति । हीलयन्निन्दन् निजकऋद्धिविस्तारं द्वात्रिंशल्लक्षविमानादिलक्षणं स्वसमृद्धिप्रपञ्चं तद्धीलने च कारण-
मिदं किल मम ऋद्धिरैकभविकी एकान्तनश्वरी अनन्तरं चावश्यं गर्भवासादिदुःखसम्भवहेतुः सम्यक्त्वधारिणश्च मनु-
ष्यस्योत्तरोत्तरविशुद्धिप्रकर्षेण द्रव्यक्षेत्रकालभावादि वैशिष्ट्येन तद्भवानन्तरमेवैकान्तानश्वरशास्वतशिवसुखप्राप्तिर्भव-
ति । ततश्च स्वसमृद्धिं हीलयंस्तान् प्रणमति सुरेन्द्रः, तानिति कान् मरणमेव प्राणत्यागरूपमन्तः पर्यवसानं मरणा-
न्तस्तस्मिन् मरणान्तेऽपि, आस्तामन्यस्मिन् विघ्ने, हु शब्दो निश्चये प्राप्ते उपस्थिते सम्यक्त्वं शुद्धदर्शनं ये- " छिज्जंतो
भिज्जंतो मारिज्जंतो वि डज्झमाणो य । जिणवज्जदेवयाणं न नमइ जो तस्स तणुसुद्धी ॥२५९॥ इत्यादि
प्रकारेण तनुमनो वचनशुद्धिमन्तो 'न छुड्डंतित्ति' न त्यजन्ति अरहन्नकवत् तदाख्यानकं चेदम्-तथाहि 'इहैव भरतक्षेत्रे,
देशश्चाङ्गोऽङ्गनामकः । अस्ति गङ्गा यदुत्सङ्गं, समुद्रमिव नामुचत् ॥ १ ॥ तत्रास्ति चम्पकोद्यानं, द्युतिभिर्लिम्पती दिशः।
चम्पेति नगरी नाग–पुरीव बहुभोगिभृत् ॥ २ ॥ केशेषु यत्र कौटिल्यं नीरसत्वं जलाश्रये । विकलत्वममावास्या—च-
न्द्रे नहि जने क्वचित् ॥ ३ ॥ तत्रासीदमलच्छाय–श्चन्द्रच्छायो महीपतिः । यद्भुजच्छायया विश्वं विश्वमाश्वासितं
ननु ॥ ४ ॥ नाक्रामि यस्य च्छाया-ऽपि चन्द्रार्काभ्यामपि क्वचित् । सातपत्रस्य तस्यान्यै-स्तेज आक्रम्यते कथम्
॥ ६ ॥ यस्य प्रहरतः सार्द्धं विपक्षैः समराङ्गणे । न तेषां कोऽप्यभूत् त्राणं दन्तदत्ततृणं विना ॥ ६ ॥ न चौर्यं पार-
दार्यं न यस्मिन् शासति मेदिनीम् । किं चोदिते दिवानाथे तमः क्वापि विजृम्भते ॥ ७॥ महर्द्धिका दीप्तिमन्त-स्तत्रा-
नेकेऽभवन्पुरि । सांयान्त्रिका नौ वणिजो बहुलोकसमाश्रयाः ॥ ८ ॥ ददाना उचितं दानं दधाना उचितान् गुणान् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुर्वाणा उचिताचारं ते नौचित्यं ललङ्घिरे ॥ ९ ॥ सर्वेषु तेषु मुख्योऽभू-दरहन्नकनामकः । ग्रहेष्विव दिनाधीशः सुरेष्विव शतक्रतुः ॥ १० ॥ स चाधिगतजीवादि-तत्त्वः सत्त्वाधिकाग्रणीः । प्रमाणीकृतसर्वज्ञो मन्यतेऽन्यं न दैवतम् ॥ ११ ॥ प्राणेभ्योऽप्यधिकं सम्यक् सम्यक्त्वं च ररक्ष यः । पौषधावश्यकाद्येषु कर्म्मस्वस्खलितः कृती ॥ १२ ॥ अरहन्नकमुख्यास्ते सांयात्रिका वणिग्वराः । मिलिता प्रोचुरन्येद्यु--रिति सर्वे परस्परम् ॥ १३ ॥ पुण्यानि पण्यान्यादाय प्रविशामोऽम्बुधिं यदि । पोतैरर्जयितुं वित्तं वयमेते तदा वरम् ॥१४॥ ततोऽन्योन्यं प्रतिश्रुत्य सर्वे तेऽब्ध्यवगाहनम् । परद्वीपोपयोगीनि वस्तून्याददिरेऽभितः ॥ १५ ॥ पित्रादीनथ पृष्ट्वा ते सम्भाष्य च परिच्छदम् । अभ्यर्च्य देवता इष्टाः प्रत्यूहापोहहेतवे ॥ १६ ॥ गणिमैर्द्धरिमैर्मेयैः परिच्छेद्यैः क्रियाणकैः । शकटानि समापूर्य पोतस्थानमुपाययुः ॥१७ युग्मम् ॥ यानपात्राण्यपूर्यन्त–पुरा नीतैश्च वस्तुभिः । फलकंप्रक्षणाद्यैश्च सज्जंतेस्म निरन्तरम् ॥ १८ ॥ तन्दुलानां च सूपानां समितानां च सर्पिषाम् । तैलानां च गुडानां च खण्डानां मधुराम्भसाम् ॥ १९ ॥ एधसां भाजनानां च गोरसौषधयोरपि । कृपाणाद्यायुधानां च तृणाऽऽवरणयोस्तथा ॥ २०॥ भोगोपयोगिद्रव्याणा- मन्येषामपि भूयसाम् । सङ्ग्रहं चक्रिरे तेऽनुयोगानामिव साधवः ॥ २१ ॥ त्रिभिर्विशेषकम् ॥ सुनक्षत्रे सुलग्ने च सुमुहूर्त्ते शुभेऽहनि । शकुनेष्वनुकूलेषु शिवचक्रे च पृष्टगे ॥ २२ ॥ धूपेषूद्ग्राह्यमाणेषु कृतेषु बलिकर्म्मसु । आपूरितेषु वा तेषु समुद्रेषु समन्ततः ॥ २३ ॥ व्याश्नुवाने दिगन्तांश्च भेर्याद्यातोद्यनिःस्वने । उत्कृष्टसिंहनादे च शब्दाद्वैतं प्रकुर्वति ॥ २४ ॥ शिवा वः सन्तु

---

१. व्याप्ते ॥



For Private and Personal Use Only

पन्थानो व्रजतां दुस्तरेऽम्बुधौ । चिरं जीवत भद्राणि लभध्वं सर्वतोऽपि च ॥ २५ ॥ लब्धार्थान् सिद्धसाध्यांश्च पुनर्निजनिकेतने । ईक्षामहे समायाता--न्यथा युष्मांस्तथाऽस्तु च ॥ २६ ॥ इत्यादिकाभि राशीभि--रत्रायातैः सुवत्सलैः । मुहुराश्वास्यमानास्ते स्वजनैरुद्गताश्रुभिः ॥२७॥ दृष्टिभिः स्नेहलाभिश्च पुनः पुनरुदीक्षिताः । पित्राद्यैर्वलीतग्रीवै--र्निवृतैः सदनं प्रति ॥ २८ ॥ ददाना याचकेभ्यश्च कामितं हृष्टमानसाः । पोतमारुरुहुः सर्वे सद्ध्यानमिव साधवः ॥ २९ ॥ बन्धनेभ्यस्ततः पोतं मुमुचुः कर्णधारकाः।समुच्छ्रितश्वेतपटं दृष्टं तीरचरैर्नरैः ॥ ३० ॥ विमुक्तबन्धना सा नौः प्रेरिता कर्णधारकैः । राजहंसीव गंगाम्भो--गाहमाना ततोऽचलत् ॥ ३१ ॥ प्रवाहस्यातिवेगेन कियद्भिरपि वासरैः । गङ्गामुखेन कल्लोल--लोलं साऽविशदम्बुधि ॥ ३२ ॥ अरहन्नकमुख्यास्ते वहित्रेण महोदधेः । मध्यमासादयन्ति स्म यावत्तावदभूदिति ॥३३॥ अकालगर्जितं जज्ञे विद्युदुद्योतगर्भितं । सदन्तकान्तिस्फुटनो गगनस्येव पूत्कृतम् ॥३४॥ प्रतिकूलो ववौ वायुः शकुनाश्चासमञ्जसाः । दिग्दाहोल्कापातमुख्या उत्पाताश्चापि जज्ञिरे॥३५॥सर्वतोऽपि स्म नृत्यन्त्य--भीक्ष्ण्यमाकाशदेवताः ।उपसर्गकृतः सैन्या-प्रयायिन्य इवागताः॥३६॥ततस्तालादपि प्रांशु तमोऽतिपरुषाकृति । जगज्जिघांसोः प्रेतानां पत्युर्बाहुरिवोद्यतः॥३७॥मेषमूषकमार्जार--मक्षिकाकाककृष्णरुक् । निर्गतो वडवावक्त्र--धूमराशिरिवोच्छ्रितः ॥३८॥ दह्यमानचिता ज्वाला-मालायासोदरानिव । बिभ्राणः कपिलान् केशानू--र्ध्वस्थानेव मस्तके ॥३९॥ मूर्त्तक्रोध इव बिभ्रद्भालं भ्रकुटिभीषणम् ।उष्ट्रौष्ट्रादपि लम्बेनौ-ष्ठपुटेन भयानकः॥४०॥तडित्पिङ्गलदेदीप्य-माननिम्नविलो-

१ नावा ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घनः । चालयन्नोष्ठयुगलं कपिवच्च पुनः पुनः॥४१॥कोपावेशविनिर्गच्छत् प्रविशत्श्वाससन्ततेः । पृथुभूतपुटां वक्रां-चिपटां नासिकां दधत् ॥ ४२ ॥ चक्राभ्यामग्रदन्ताभ्यां निर्गताभ्यां मुखान्तरात् । विडम्बयन् वराहस्य मुखं बीभत्सतागुणैः ॥ ४३ ॥ भुजाभ्यामतिलम्बाभ्यां परिघाभ्यामिवान्वितः । स्थूणाभ्यामिव दीर्घाभ्यां जङ्घाभ्यां च विराजितः ॥ ४४ ॥ वक्षसा च विशालेन कठिनेन पर्वतेरपि । शय्यापट्टेन मार्त्तण्ड-सूनोरिव[1] भयङ्करः ॥ ४५ ॥ क्षुद्वेदनोदयाद्दन्तःक्षिप्तवारिधिनेव तु । जठरेणातिलम्बेन विस्मयं जनयन् भुवः ॥ ४६ ॥ अभीक्ष्णं प्रचलत्कर्ण-शष्कुलीमण्डलोऽनलम् । जाज्वल्यमानं वक्त्रान्त-र्दधानो दारुणाकृतिम् ॥ ४७ ॥ विलोललोलयो[2]र्युग्मं निर्गतं मुखतो दधत् । द्वयं भुजङ्गयोर्मन्ये वल्मीकादिव निर्गतम् ॥ ४८ ॥ सूर्योपमनखस्तीक्ष्ण--दंष्ट्राडम्बरभीषणः । नृवशालिप्तसर्वाङ्गो गलल्लालाकुलाऽऽननः ॥ ४९ ॥ तत्कालच्छिन्नबीभत्स-क्षरच्छोणितपिच्छलाम् । मनुष्यशिरसां माला- मन्त्रप्रोतां वहन् हृदि ॥ ५० ॥ स्फारस्फटाविनिर्गच्छद्-घोरफूत्कारदारुणैः । गोनसैः परितो बद्ध-परिकरोऽप्रियङ्करः ॥५१॥ सरडोरगगोधालि-खजूर नकुलोदरैः । जीवद्भिः परिसर्पद्भिः[3] प्रारब्धकटिमेखलः ॥५२॥ क्रोधाध्मातमहाकृष्ण-सर्पकर्णावतंसकः । स्कन्धन्यस्त-महाक्रूर-तरमर्ज्जारजम्बूकः ॥५३॥ प्रसार्य पृथुलं वक्त्र-मट्टहासैरमर्षणः । भापयन्नखिलं लोकं रुष्टो यम इवापरः ॥५४॥ तत्कालहतकुम्भीन्द्र चर्म्मसंवर्म्मिताङ्गकः । व्याघ्रचर्म्मपिनद्धां च दधत्कर्त्तरिकां करे ॥ ५५ ॥ कातराणां हृदः स्फोटं जनयन् घण्टितारवैः । वेतालालिपरिवारो दुर्दृशः पूतिगन्धभृत् ॥५६॥ प्रहसंश्च प्रनृत्यंश्च वल्गन् गर्ज्जन्ननेकशः[4] । नीलो-

१ शनिश्चरः २ जिह्वयोः । ३ सर्पैः । ४ व्याप्ता ॥



For Private and Personal Use Only

त्पलदलन्नीली गवलस्यामखड्गयुक्॥५७॥विरूपाङ्गो विरूपाक्ष आगच्छन् व्योममण्डलात् । पिशाचो ददृशे कोऽपि पोतारूढवणिग्वरैः। ५८॥द्वाविंशतीभिः कुलकम् । ते तादृशं महाकायं वणिजो वीक्ष्य राक्षसम् ।वातप्रहतवल्लीवत् साध्वसेन चकम्पिरे ॥ ५९ ॥ परस्परस्य देहेषु प्राविशन् भयविह्वलाः । अनन्यशरणाः सन्तः शरणार्थमिवाभितः ॥६०॥ किं कुर्मः कुत्र वा यामः कं श्रयामः कमीड्महे । यत्प्रसादादयं दुष्टो-पसर्गो विलयं व्रजेत् ॥ ६१ ॥ इति चिन्तातुराः सर्वे भयोद्भ्रान्तविलोचनाः । विलक्षवदनास्तस्थुः प्राप्तावध्यमहीमिव ॥ ६२ ॥ युग्मम् ॥ उपयाचितकं चक्रु स्कन्दमुद्दिश्य केचन केऽपि रुद्रं हरिं केऽपि नागभूतौ च केचन ६३ ॥ चामुण्डां केऽपि केऽप्यार्यां केऽपि गोत्राधिदेवताम् । समुद्रदेवतां केऽपि क्षेत्रपालं परे पुनः ॥ ६४ ॥ यो वाऽभीष्टतमो यस्य यक्षो वा व्यन्तरोऽथवा । स तमाराधयामास तदैकाग्रमना भयात् ॥६५॥ तस्मिन्नवसरे धीर एकएवारहन्नकः । अभीतो नाकुलो त्रस्तोऽनुद्विग्नो निश्चलाशयः ॥६६॥ अभिन्नमुखरागश्च विकस्वरविलोचनः । तमापतन्तमुद्गीर्ण-कृपाणंकरुणोज्झितम् ॥६७॥ दृष्ट्वा पोतस्यैकदेशं वस्त्रान्तेन प्रमृज्य च । स्थाने स्थित्वा स्थिरश्रान्तोऽव्यधादर्हन्नमस्क्रियाम् ॥ ६८ ॥ त्रिभिर्विशेषकम् ॥ नमोऽस्त्वर्हद्भ्य इत्यादि प्रणिपातस्य दण्डकम् । पठित्वा कुरुते चैत्यवन्दनां भयवर्जितः ॥ ६९ ॥ ततश्चतुरो लोको-त्तमान् कृत्वा समङ्गलम् । अर्हतः सिद्धसाधूंश्च धर्म्मं च शरणं श्रितः ॥ ७० ॥ अष्टादशापि पापस्य स्थानानि व्युत्ससर्ज च । क्षमयामास सर्वांश्च सत्त्वान् सत्ववदग्रणीः ॥ ७१ ॥ ज्ञानादिपञ्चाचाराणां सम्यक्त्वस्य व्रतस्य च । योऽतिचारः समुत्पन्न-स्तं नि-

---

१ भयेन ॥ २ पार्वती ।:

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निन्द मुहुर्मुहुः ॥ ७२ ॥ आलोच्य स्वकृतं सर्वं दुष्कृतं सिद्धसाक्षकम् । निःशल्यीभूतहृदयो मैत्रीं जन्तुष्वकल्पयत् ॥७३॥ अर्हतां साधुसाध्वीनां समानधर्म्मणां तथा । वात्सल्यादिकृतं यत्तद–नुमोदयति स्म सः । ७४ ॥ मुच्येयं नाहमेतस्मा–द्यावत् दुष्टोपसर्गतः । कायोत्सर्गः कल्पते मे तावत् पारयितुं नहि ॥ ७५ ॥ विलीने चोपसर्गेऽस्मिन् दुष्टदैवतनिर्म्मिते । कल्पते पारणं कायो-त्सर्गस्येति विचिन्त्य च ॥ ७६ ॥ प्रत्याख्याय च साकारं भक्तोपध्यादिनिस्पृहः । कायोत्सर्गे स्थिरस्तस्थौ मेरुसानुरिवागतः ॥७७॥ ततस्तालपिशाचोऽपि सोऽरहन्नकसन्निधौ । विकोशासिः समागत्य तर्जयन्नभ्यधादिति ॥ ७८ ॥ अप्रार्थ्यप्रार्थकानिष्ट जीवितव्यातिदुर्म्मते । पुण्यहीन यमाधीन-दुरन्तप्रान्तलक्षण ? ॥७९॥ अरहन्नक रे रे त्वं सम्यक्त्वं च व्रतानि च । न खण्डयामि नोज्झामि किलाहमिति मन्यसे ॥८०॥ परं नोज्झसि सम्यक्त्वं व्रतानि च गुणास्तथा । न खण्डयसि वा चेत्त्वं मदाराधनया खलु ॥ ८१ ॥ तदाऽहन्तव [1]बोहित्थ-मिदं वस्तु समन्वितम् । उत्पाट्यङ्गुलियुग्मेनो-त्क्षेप्यापि च [2]विहायसि ॥८२ ॥ मज्जयामि महाम्भोधौ यथा मग्नस्त्वमम्भसि । आर्त्तध्यानपरवशो म्रियसे ह्यसमाधिना ॥८३॥ ततः स मनसा स्माह-कायोत्सर्गस्थ एव हि । असंत्रस्तो मनः क्षोभ-मगच्छंश्च मनागपि॥८४॥तं प्रेतमिति भो देव? श्राद्धोऽहमरहन्नकः । विज्ञातजीवाजीवादि-तत्त्वो धर्मरहस्यवित् ॥ ८५ ॥ श्रीनैर्ग्रन्थात्प्रवचना-च्छक्यो देवदानवैः । नेतुं विपरिणामं वा परिक्षोभयितुं तथा ॥ ८६ ॥ तस्मात्त्वं निज श्रद्धानु-सारेण कुरु भो सुर? । न मेऽस्ति कृतकृत्यस्य भयं किमपि तावकम्॥८७॥इत्युदित्वा स्थिरस्तस्थौ स्वधर्मध्यान

१ पोत ॥ २. आकाशे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एव हि । किं कदापि मृगेन्द्रोऽपि बिभेति गजगर्ज्जितैः ॥ ८८ ॥ पुनर्देवस्तथैवावक् द्विस्त्रिस्तं प्रेतरूपभृत् । सोऽपि स्वनिश्चयं नैव ललङ्घे धीरमानसः ॥ ८९ ॥ ततोऽधिकतरक्रोध-ज्वलच्चित्तचितानलः । तद्धूममिव दुर्वाक्य-व्रजं वक्त्रेण चोद्वमन् ॥ ९० ॥ पोतमुत्पाटयामास हठादाकृष्य वारिधेः । हेलयाङ्गुलियुग्मेन सो सुरस्तृणमात्रवत् ॥९१॥ युग्मम् नीत्वा च गगनेनाव-मुवाचेति स तं प्रति । जिजीविषुर्यदि त्वं तन्माऽ-वमन्यस्व मद्वचः ॥ ९२॥ अन्यथाऽहमितः स्थाना-न्मोक्षामि तव वाहनम् । येनैतत् खण्डशो भूत्वा त्वया सह विनंक्ष्यति ॥ ९३ ॥ तथापि न चचालासौ धर्म्मात्के-बलिभाषितात् । किं मर्यादां त्यजेदब्धिः प्रेरितोऽपि नदीरयैः ॥ ९४ ॥ यदा च नहि शक्तोऽसौ धर्म्माच्चालयितुं सुरः । बभूव कथमप्येनं सुश्राद्धमरहन्नकम् ॥ ९५ ॥ तदा शनैः शनैर्नावं जलोपरि मुमोच सः । दुष्टो पिशाचरूपं च सञ्जहाराति विस्मितः ॥ ९६ ॥ दिव्यरूपधरो भूत्वा चलत्कुण्डलभूषणः । माणिक्यमुकुटालम्बि मालालङ्कृतमस्तकः ॥ ९७ ॥ प्रलम्बमानसन्मुक्ता-फलप्रालम्भकान्तिभिः । क्षीरोदकाप्लुतमिव कुर्वन् वक्षःस्थलं कलम् ॥ ९८ ॥ सौवर्णकटिसूत्रेण क्वणत् किंकिणिकेन च । संवेष्टितकटीदेशो भूगोल इव वार्द्धिना ॥ ९९ ॥ काञ्चनाङ्गदविभ्राज-मानबाहुलताद्वयः । बिभ्राणः कटके रत्न-निर्म्मिते हस्तपादयोः ॥ १०० ॥ कण्ठालम्बितकल्पद्रु-पुष्पमालाविराजितः । स्वच्छाऽतुच्छतमा ज्योति-र्दिव्याम्बरपरिग्रहः ॥१ ॥ सर्वा विद्योतयन्नाशाः शान्तेन निजचेतसा । प्रसन्नवदनः सौम्यः पूर्णिमाचन्द्रमा इव ॥ २ ॥ कुर्वन् जयजयारावं सार्धं कुसुमवृष्टिभिः । अरहन्नकमित्याख्यत् पुरः स्थित्वा सुरं स तु ॥ ३ ॥ सप्तभिः कुलकम् ॥ धन्योऽसि कृतपुण्योऽसि ननु भो अरहन्नकः । कृतार्थोऽसि तवैव स्तः सुलब्धे जन्मजीविते ॥ ४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जननी जननी सैव या त्वां प्रासूत नन्दनम् । निःसत्वान् कातरान् क्लीबान् जनयन्ति न काः सुतान् ॥ ५ ॥ त्वयैषा लङ्कृता पृथ्वी तवैव कुलमुज्ज्वलम् । त्वया सनाथो लोकोऽयं गुणाः सर्वे त्वयि स्थिताः ॥६ ॥ यस्य सम्यक्त्वमूलेऽस्मिन् धर्म्मे सर्वज्ञभाषिते । तवैव निश्चला बुद्धिः प्रतिपत्तिश्च विद्यते ॥ ७ ॥ अन्यदा च सुराधीशः सौधर्मेन्द्रः सभास्थितः । बहुनिर्ज्जरकोटीना--मन्तरुच्चैरिदं जगौ ॥ ८ ॥ जम्बूद्वीपेऽस्ति भरते--क्षेत्रे चम्पाभिधा पुरी तत्रारहन्नको नाम--श्रमणोपासकाग्रणीः ॥ ९ ॥ स च जीवादितत्त्वज्ञः सुविनिश्चितबुद्धिमान् । सर्वज्ञवचनादन्य--न्मन्वानोऽवकरोपमम् ॥ १० ॥ सेन्द्रैरपि सुरैर्नैव शक्यश्चालयितुं खलु । महासत्त्वो महात्मासौ सम्यक्दर्शन निश्चलः ॥ ११ ॥ त्रिभिर्विशेषकं ॥ तदिदं श्रद्दधामि स्म नाहं शक्रस्य भाषितम् । अचिन्तयंश्च गच्छामि तं परिक्षितुमेकदा ॥ १२ ॥ ततोऽहं प्रियधर्मत्वं दृढधर्म्मत्वमप्यथ । दिदृक्षुस्तावकं त्वां चा--पश्यं वारिधिमध्यगम् ॥ १३ ॥ इहागन्तुं च निर्म्माय रूपमुत्तरवैक्रियम् । दिव्यया देवगत्या च शीघ्रमागां त्वदन्तिकम् ॥ १४ ॥ अकार्षमुपसर्गं ते विकृताकारधारकः । भीमाट्टहासैर्दुर्वाक्य--तर्ज्जनाद्यैरनेकशः ॥ १५ ॥ तथापि नहि भीतस्त्वं नापि वैवर्ण्यमाश्रितः । नाभूद्विपरिणामो वा धर्मध्यानाच्च नाचलः ॥ १६ ॥ प्रत्युतोद्भवदानंद-कन्दकन्दलितं मनः धर्म्मे एव स्थिरं चक्रे तस्मात्तुभ्यं नमोनमः ॥ १७ ॥ शक्रोक्तमधुना सर्वं श्रद्दधामि तथेति च । नहि मिथ्यागिरः क्वापि तादृशाहि महोत्तमाः ॥ १८ अथ भो श्रावकश्रेष्ठा--पराधं मदनुष्ठितम् । क्षमस्व भूयो नैवाहं विधास्ये पापमीदृशम् ॥ १९ ॥ वारंवारं

१ कचरो ॥



For Private and Personal Use Only

भणन्नेवं प्राञ्जलिः स सुरोत्तमः । वन्दमानः पदद्वन्द्वं क्षमयामास तं तदा ॥ २० ॥ उभे कुण्डलयुग्मे च ददौ तस्मै स निर्जरः । सूर्यबिम्बाधिकज्योतिः प्रणाशिततमोभरे ॥ २१ ॥ पुनः प्रणम्य तं भक्त्या श्रमणोपासकोत्तमम् । यथास्थानं ययौ देवो मनसा तद्गुणान्वहन् ॥ २२ ॥ ज्ञात्वा निरुपसर्गं तु सोऽपि श्रीअरहन्नकः । कायोत्सर्गं पूर्णसन्धः पारयामास पुण्यवान् ॥ २३ ॥ ततस्ते वणिजः सर्वे तुष्टुवुस्तं गुणाधिकम् । त्वत्प्रसादाद्वयं तीर्णा आपदन्दुस्तरामिमाम् ॥ २४ ॥ अथानुकूलपवनप्रेरितं तद्वहित्रकम् । पापवारिनिधेस्तीरं संसारस्येव केवली ॥ २५ ॥ पोतोत्तारास्पदं प्राप्यो--त्तारयामासुराशु ते । पोतं ततश्च वस्तून्यु--त्तार्य श्राक् शकटेऽक्षिपन् ॥ २६ ॥ आपूर्णशकटास्तेऽथ जग्मुः श्रीमिथिलापुरीम् । लक्ष्म्यर्जनाय नो यान्ति वणिजः कुत्र कुत्र वा ॥ २७ ॥ तत्र श्रीमल्लिजनकः कुम्भनामा महीपतिः । तदा पालयति प्राज्यं राज्यं शक्रपराक्रमः ॥ २८ ॥ ते तस्य प्राभृतीचक्रु--स्तयोः कुण्डलयुग्मयोः । एकं युग्मं प्रभूतेन प्राभृतेन समन्वितम् ॥२९॥ श्रीकुम्भेन प्रसन्नेनो--च्छुल्कास्ते विहितास्तदा । निःशङ्कं विविधं वस्तु विक्रीणन्ति च लान्ति च ॥३०॥ दिव्यं कुण्डलयुग्मं त--च्छ्रीमल्ल्यै कुम्भभूभुजा । व्यतारि परिधानाय विश्वविस्मयकारकम् ॥ ३१॥ लब्धलाभाश्चारहन्नकाद्यास्ते वणिजोऽखिलाः । पुनस्तथैव तेनैवा--ध्वना चम्पापुरीं ययुः ॥ ३२ ॥ हर्षवाद्यान्यवाद्यंत--मङ्गलान्यक्रियन्त च । कुशलेन समेतानां तेषां बन्ध्वादिभिस्तदा ॥ ३३ ॥ एकीभूयारहन्नाद्या--श्चन्द्रच्छायस्य भूभुजः । द्वितीयं कुण्डलयुगं स प्राभृतमढौकयन् ॥ ३४ ॥ सोऽपि तुष्टश्चकारैषा--मुच्छुल्कं वणिजां ततः । सर्वे ते स्वस्वसदनं जग्मुर्लाभसमन्विताः ॥ ३५ ॥ कुण्डलानां च वृत्तान्तो महानग्रेऽपि विद्यते । स मल्लिज्ञाततो ज्ञेयो नोक्तोऽत्रानुपयोगतः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ३६ ॥ यथाऽरहन्नकः श्राद्धः सम्यक्त्वस्थिरमानसः । सुरेन्द्रेण स्वयं भक्त्या प्रणतो गुणकीर्त्तनात् ॥ ३७ ॥ तथाऽन्येऽपि नरा ये श्रीसम्यक्त्वं दुर्दशास्वपि । न त्यजन्ति महासत्त्वा–स्तान्नमन्ति सुरेश्वराः ॥ ३८ ॥ अरहन्नकवृत्तमीदृशं, श्रुत्वा भो भविका जिनोदिते । कुरुतातिसुनिश्चलं मनः, सम्यक्त्वे शिवपत्तनाध्वनि ॥ ३९ ॥ एवं च तेषां विघ्नोऽप्युत्सव एवेति सूक्तं यत उत्सवः स एव यः परमोन्नतिहेतुः, परमोन्नतिश्चेन्द्रप्रणतिमुक्तिप्राप्तितः का नामाधिकेति गाथार्थः ॥ ननु मरणान्तेऽपि सम्यक्त्वं न त्यजतीत्युक्तं तत्किमर्थमित्याह—

**मूलम्—छड्डंति निययजीअं तणं व मुक्खत्थिणो नउण सम्मं ।**
**लब्भइ पुणो वि जीयं सम्मत्तं हारियं कत्तो ॥ ८७ ॥**

व्याख्या—'छड्डंतित्ति' त्यजन्ति जहन्ति निजकजीवं जीवजीवितयोरभेदोपचाराज्जीवितमिति भावः । तृणमिव घासवत् मोक्षार्थिनो निर्वाणाभिलाषिणो न पुनः सम्यक्त्वं । कुत एवमित्याह लभ्यते प्राप्यते पुनस्तदुत्तरकालमेव जीयमिति जीवितं प्राणधारणलक्षणं प्राग्जीवितसमाप्तावुत्तरजीवितस्यावश्यम्भावात् । सम्यक्त्वं तु हारितं निर्गमितं स तत्कुतः कस्माल्लभ्यते इति योगोऽपि तु न कुतश्चित् ,यतः सम्यक्त्वस्य निर्गमितस्य पुनः प्राप्तिरुत्कर्षतोऽनन्ते कालेऽभिहिता । यदुक्तं—" कालमणंतं च सुए अद्धापरियट्टओ य देसूणो । आसायणबहुलाणं उक्कोसं अंतरं होइ ॥ २६० ॥ ततश्च यस्मात् सम्यक्त्वं पुनर्दुर्लभं जीवितं सुलभं तस्मान्मोक्षार्थिनो जीवितं तृणमिव त्यजन्ति सम्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्त्वार्थं , न पुनर्जीवितार्थे सम्यक्त्वमिति गाथार्थः ॥ ८७ ॥॥ ननु यदि सम्यक्त्वं हारितं दुर्लभं तर्हि भवतु नाम किं तेन सताऽसता च फलमित्याशङ्क्याह—

मूलम्—गयविहवावि सविहवा सहिया सम्मत्तरयणराएण ।
सम्मत्तरयणरहिया संते वि धणे दरिदत्ति ॥ ८८ ॥

व्याख्या-‘ **गयविहेत्ति** ’ गतविभवा अपि नष्टसर्वस्वा अपि, आस्तां सधना अल्पधना वा सविभवा सद्द्रव्याः के इत्याह—सहिता युक्ताः सम्यक्त्वरत्नराजेन सम्यक्त्वचिन्तामणिना चिन्तामणित्वं चैहलौकिकपारलौकिककल्याणहेतुत्वात् । तदुक्तं-“ **कल्लाणपरंपरयं लहंति जीवा विशुद्धसम्मत्ता । सम्मद्दंसणरयणं नग्घइ ससुरा सुरे लोए** ॥ २६१ ॥ एतत्सहितानां चोत्तरकालेऽवश्यं विभवलाभात् भाविनि भूतवदुपचारात् अविभवानामपि सविभवत्वम् । अथवा सम्यक्त्वरत्नरागेन सम्यक्त्वरत्ने रागः सम्यक्त्वरत्नरागस्तेन सम्यक्त्वरत्नप्रीत्येत्यर्थः । सम्यक्त्वरत्नरहिताः पुनरिति गम्यते सत्यपि विद्यमानेऽपि धने विभवे दरिद्रा निर्धना उत्तरकाले सम्यक्त्वरहितानां धनस्यावश्यंनाशसद्भावात् तत्कालेऽपि दरिद्रतैव व्यपदिश्यते । अक्षिप्तेऽपि मद्ये उत्तरकाले क्षेप्तव्यमद्ययोगान्मद्यभाण्डमिति व्यपदेशवत् इति शब्दो वचनसमाप्त्यर्थं इति गाथार्थः ॥ ८८ ॥ यत एव सम्यक्त्वचिन्तामणिसहितो गतविभवा अपि सद्विभवा अत एव ते सम्यक्त्वशुद्ध्यधिकारे दीयमानां धनकोटीमपि नेच्छन्तीत्याह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—जिणपूयणपत्थावे जइ कुविसहाण देइ धणकोडि ।
मुत्तूण तं असारं सारं विरयंति जिणपूयं ॥ ८९ ॥

व्याख्या–'जिणपूयणत्ति' जिनो वीतरागस्तस्य पूजनमर्चनं तस्य च द्रव्यभावभेदेन द्विभेदत्वेऽपि पुष्पादिद्रव्यपूजनमिह प्रस्तुतं तस्य जिनपूजनस्य प्रस्तावोऽवसरस्तस्मिन् यदि कोऽपि देवदानवादिः श्राद्धानां शुद्धसम्यक्त्वधारिणामुपासकानां ददाति प्रयच्छति धनकोटिं हिरण्यलक्षशतमुपलक्षणं चैतत्तेन न्यूनमधिकं वा धनं दत्ते मुक्त्वा तां धनकोटिमसारां तुच्छां चौराग्निभूपदायादजलादिहार्यत्वात् । सारां सम्यक्त्वशुद्धिहेतुत्वात् स्वर्गापवर्गादिसमग्रसुखकारकत्वात् विरचयन्ति कुर्वन्ति जिनपूजां देवपूजामेव । अयं भावः दृढसम्यक्त्वस्य श्राद्धस्य कश्चिद्देवो वा मानवो वा जिनपूजां कुर्वतो धनकोटिं ददाति, किलाधुना भगवत्पूजां परित्यज्य मया दीयमानां कोटिं गृहाण । भगवत्पूजां मा कृथा इत्याद्युक्त्वा तथाऽप्यसारां तां धनकोटिमपि मुक्त्वा सारां भगवत्पूजामेव कुर्यात् सारत्वं च जिनपूजाया भरतादीनां तथाभ्युपगमात् । यदुक्तं-तायंमि पूइए चक्कंपि पूइयं पूइणारिहो ताओ ।इह लोइयं तु चक्कं परलोयसुहावहो ताओ ॥२६२॥इति गाथार्थः॥८९॥ननु जिनपूजासारमित्युक्तं सा च यथा कथञ्चिद्विधेयेति परवचनमाशङ्क्य तन्निराकरणं प्राह--

मूलम्—तित्थयराणं पूया सम्मत्तं गुणाण कारणं भणिया।
सा वि य मिच्छत्तयरी जिणसमए देसिय अपूया ॥९०॥ 

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या– ' तित्थयेत्ति ' तीर्थंकराणामर्हतां पूजाप्रस्तावात्कुसुमचन्दनादिद्रव्यपूजासम्यक्त्वगुणानां सम्यक्त्वं प्रतीतं गुणा ज्ञानादयस्तेषां कारणं हेतुर्भणिता प्रतिपादिता आगम इति गम्यते -यदुक्तं श्रीआचारांगनिर्युक्तौ दर्शनभावनाधिकारे-- " तित्थगराण भगवओ पवयणपावयणि अइसइड्ढीणं । अभिगमणनमणदरिसणकित्तणसंपूइणा थुणणा ॥ २६३ ॥ तथा--श्रीआवश्यकनिर्युक्तौ--अकसिणपवत्तगाणं विरयाविरयाण एस खलु जुत्तो । संसारपयणुकरणे दव्वत्थए कूवदिट्ठंतो ॥ २६४ ॥ साऽपि च सैव या सम्यक्त्वगुणानां कारणं भणिता । सा मिथ्यात्वकरी मिथ्यात्ववृद्धिहेतुमत्त्वेन जिनसमयेऽर्हत्प्रवचने देशितोक्ता यदीत्यध्याहाराद्यदि अपूजा कुत्सिता पूजा अविधिपूजेत्यर्थः । कुत्सितार्थता च नञः, समये तथा प्रतिपादनात् , यथा- जह थोवजुन्नकुच्छिय चेलेहिं वि भन्नए अचेलित्ति । जह तूरसालिय लहुं देपुत्तिं नग्गियामोत्ति ॥ २६५ ॥ कुत्सितत्वं च पूजायाः स्वमतिप्रवृत्तेस्तथा चोक्तं--" समइपवित्ती सव्वा आणाबज्झत्ति भवफला चेव । तित्थयरुद्देसेण वि न तत्तओ सा तदुद्देसा ॥ २६६ ॥ स्वमतिप्रवृत्तिश्चैवंविधा दोषहेतुर्यथा--शृङ्गैः प्रसूनसमये जलकेलिलीला, मान्दोलनं भगवदोकसि देवतानां । धर्म्मच्छलाल्लगुडरासमनल्पहासं, निर्म्मापयन्त्यहह संसृतिहेतुमज्ञाः ॥२६७॥ तथा-यात्राः प्रतीत्य पितरो भवतान्न[ऽत्र] चैत्ये,यद्वात्र मासि विहिता धनिनाऽमुना तत्। कार्यास्त्वयाऽपि च तथेति कथं गृहस्थै, र्धर्म्मोऽयमित्यनुचितं रचयन्ति धूर्त्ताः ॥२६८॥ श्राद्धप्रपारविशशिग्रहमाघमाला--सङ्क्रान्तिपूर्वपरतीर्थिकपर्वमाला । पापावहाविगलदुकूलयुक्तिजाला जैनाः स्ववेश्मसु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथं रचयन्ति बालाः ॥ २६९ ॥ सा चापूजैव अयमभिप्रायः-यैव तीर्थंकराणां पूजाविधिना क्रियमाणा सम्यक्त्व-गुणानां कारणं भणिता सैव यद्यविधिना क्रियते तदा मिथ्यात्वकरी भवतीति गाथार्थः ॥ ९० ॥ अथ पूर्वोक्तार्थप्रक-टनार्थमेव सोपनयं निगमनमाह—

मूलम्—जिणआणाए धम्मो आणारहियाण फुडमहम्मत्ति ।
इय मुणिऊण य तत्तं जिणआणाए कुणह धम्मं ॥ ९१ ॥

व्याख्या--' जिणेत्ति ' जिनाज्ञया भगवदुक्तयथोक्तकरणलक्षणया धर्मः पुण्यं आज्ञारहितानां स्वमतिकल्प-नाशिल्पोपजीविनां स्फुटं प्रकटमधर्म्म इति । तदुक्तं--वीतरागः सपर्यायाः तवाज्ञापालनं वरम् । आज्ञाराद्धा विराद्धा च शिवाय च भवाय च ॥ २७० ॥ तत इति पूर्वोक्तप्रकारेण मुणित्वा ज्ञात्वा तत्त्वं परमार्थं जिना-ज्ञया सर्वं वाक्यं सावधारणमिति । जिनाज्ञयैव कुरुत धर्मं विधत्त सुकृतं आज्ञा विना कृतस्य निष्फलत्वात्। ततोऽयं भा-वो जिनाज्ञयैव धर्मः कर्त्तव्यो नान्यथैवेति गाथार्थः ॥ ९१ ॥ नन्वेवंविध तत्त्वज्ञायकः को भवतीत्याह–

मूलम्—जं जं जिणआणाए तं चिय मन्नइ न मन्नए सेसं ।
जाणइ लोयपवाहे न हु तत्तं सो य तत्तविऊ ॥ ९२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या–' जं जं जिणेत्ति ' यद्यदेव देवपूजां वन्दनकादिकं धर्मकृत्यं जिनाज्ञायां वर्त्तत इति गम्यते तदेव मन्यतेऽभ्युपगच्छति । न मन्यते नाभ्युपैति शेषं जिनाज्ञारहितं परतीर्थिकप्रणमनादि । यदुक्तं--परत्तित्थियाण पणमण उब्भावणथुणणभत्तिरागं च । सक्कारं सम्माणं दाणं विणयं च वज्जेइ ॥ २७१ ॥ यत एव च जिनाज्ञारहितं न मन्यते अत एव जानाति वेत्ति किमित्याह--लोकप्रवाहे गतानुगतिकारूपे अनुश्रोतो मार्गरूपे वा नहु नैव तत्त्वं शुद्धधर्मरूपं, शुद्धधर्मरूपस्य हि तत्त्वस्य माया कपटानुवृत्तिभणितादिरूपाल्लोकप्रवाहाद्भिन्नत्वेनावस्थानात् ॥ तदुक्तं--धम्मम्मि नत्थि माया नय कवडं आणुवित्ति भणियं वा । फुडपागडमकुटिल्लं धम्मवयणमुज्जुयं जाण ॥२७२॥ नवि धम्मस्स भडक्का उक्कोडा वंचणा य कवडं वा । निच्छम्मो किर धम्मो सदेव मणुया सुरे लोए ॥ २७३ ॥ स तादृशः चकारोऽवधारणे तेन स एव नान्यस्तत्त्ववित् धर्मस्वरूपवेदिना अयं भावः--यद्यज्जिनाज्ञायां वर्त्तते तदेव मन्यतेऽन्यत्र मन्यते लोकप्रवाहे च तत्त्वं नास्तीति जानाति यः स एव तत्त्वविज्ञापर इति गाथार्थः ॥ ९२ ॥ अथ ये तत्त्वज्ञानसामग्र्यां सत्यामपि तत्त्वं न विदन्ति तद्दोषदर्शनद्वारेण तानेवाह--

मूलम्—साहीणे गुरुजोगे जे नहु निसुणंति सुद्धधम्मत्थं ।
ते धिट्ठदुट्ठचित्ता अह सुहडा भवभयविहुणा ॥ ९३ ॥

व्याख्या--' साहीणेत्यादि ' स्वाधीने आत्मा यत्ते गुरुयोगे सद्गुरुसंसर्गे ये केऽपि निबिडप्रमादमदिरालुप्तचै-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्या नहु नैव निश्रृण्वन्ति समाकर्णयन्ति शुद्धधर्मार्थं शुद्धधर्मप्रतिपादकशास्त्रार्थं । ते धृष्टचित्ता धृष्टं प्रगल्भं पापकरणे निःशङ्कमिति यावत् दुष्टं क्रूरं चित्तं येषां ते तथा । अथेति प्रकारान्तरे ते सुभटाः शूराः कुतो यतो भवभयविहीनाः भवादबिभ्यतः सुटभा हि न मरणाद्बिभ्यति । एवं तेऽप्यनन्तमरणात्मकाद् भवान्न बिभ्यतीति सुभटाः । इदमुक्तं भवति ये स्वाधीनेऽपि शुद्धधर्मकथकगुरुयोगे--" आलस्समोहवन्ना थंभा कोहापमायकिविणत्ता । भयसोगा अन्नाणा वक्खेव कुतूहला रमणा २७४ ॥ इत्यादिभिः कारणैरर्हद्धर्म्मं न श्रृण्वन्ति । यं विना जीवा अनन्तसंसारे भ्रमन्ति । यदुक्तं--सव्वगईपक्खंदे काहिंति अणंतए अकयपुन्ना । जे उ न सुणंत्ति धम्मं सोऊण य जे पमायंति ॥ २७५ ॥ ते धृष्टचित्ता दुष्टचित्ताश्चाथवा भवभयं घोरदुक्खकारणं तेषां नास्ति किन्तु भवाभिनन्दिन इति गाथार्थः ॥ ९३ ॥ ननु श्रवणे को गुण इत्याह--

मूलम्—सुद्धकुलधम्मजीयवि गुणिणो न रमंति लिंति जिणदिक्खं ।
तत्तो वि परमतत्तं तओ वि उवयारओ मुक्खं ॥ ९४ ॥

व्याख्या--सुद्धकुलेत्ति ' शुद्धः सामान्यशिष्टलोकापेक्षयानिर्दोषः कुलधर्मः कुलाचारः यथा--लोकापवादभीरुत्वं दीनाभ्युद्धरणादरः । कृतज्ञता सुदाक्षिण्यं सदाचारः प्रकीर्तितः ॥ २७६ ॥ सर्वत्र निंदा सन्त्यागो वर्णवादश्च साधुषु । आपद्यदैन्यमत्यन्तं तद्वत्सम्पदि नम्रता ॥ २७७ ॥ प्रस्तावे मितभाषित्वमविसंवा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दनं तथा । प्रतिपन्नक्रिया चेति कुलधर्म्मानुपालनम् ॥ २७९ ॥ असद्व्ययपरित्यागः स्थाने चैतत्क्रिया सदा । प्रधानकार्ये निर्बन्धः प्रमादस्य विवर्ज्जनम् ॥ २८० ॥ लोकाचारानुवृत्तिश्च सर्वत्रौचित्यपालनम् । प्रवृत्तिर्गर्हिते नेति प्राणैः कण्ठगतैरपि ॥ २८१ ॥ इत्यादिरूपः शुद्धकुलधर्मस्तत्र जाता अपि क्षत्रियब्राह्मणवणिगादीश्वरकुलोत्पन्ना, अपिः सम्भावने,गुणिनः संवेगादियुक्ता न रमन्ते न रतिं कुर्वते । सुगुरूपदेशे श्रवणानन्तरः प्रमादस्थान इति गम्यम् । किं तर्हि कुर्वन्तीत्याह--लान्ति गृण्हन्ति जिनदीक्षां द्वितीयपश्चाशकोक्तविधिना सम्यक्त्वप्रतिपत्तिलक्षणां, पश्चाशके हि जिमदीक्षाशब्देन सम्यक्त्वप्रतिपत्तिरुक्ता । ततस्तस्या जिनदीक्षाया अपि परमतत्त्वं सर्वविरतिलक्षणं परमतत्त्वतां च सर्वविरतेरक्षेपेण मोक्षसाधकतमत्वात् लान्तीति सम्बध्यते । यदुक्तं--पश्चाशकद्वितीयस्य गाथा ४२ ॥ " इय कल्लाणी एसो कमेण दिक्खागुणो महासत्तो । सम्मं समायरंतो पावइ तह परमदिक्खं पि ॥ [ व्याख्या—इति उक्तन्यायेन सम्यग्दीक्षाऽधिकृतगुणवृद्ध्यादि तल्लिङ्गप्राप्तिलक्षणेन कल्याणी कल्याणवान् लोकद्वयेत्यर्थः । दीक्षागुणान् जिमदीक्षाधर्म्मान् जिनसाध्वागमभक्तिप्रभावनादीन् समाचरन्निति योगो, महासत्त्वो महानुभावः सम्यग्भावसारं समाचरन्नासेवमानः प्राप्नोति लभते तथेत्ति फलान्तरसमुच्चयार्थः । परमदीक्षामपि सर्वविरतिदीक्षामपि न केवलं कल्याण्येव भवतीत्यपि शब्दार्थः । अथवा इति कल्याणी सन्नेष प्राप्नोति तथा परमदीक्षामपि यथेतरदीक्षां प्राप्त इति हृदयं शेषं तथैवेति गाथार्थः ॥ ४२ ॥] ततोऽपि परमतत्वात् सर्वविरतिलक्षणादुपचारतो मोक्षो मोक्षारोपो जीवत एव मोक्ष इत्यर्थः तदुक्तं-निर्ज्जितमदमदनानां वाक्कायमनोविकाररहितानाम् । विनिवृत्तपराशा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामिहैव मोक्षः सुविहितानाम् ॥ २८१ ॥ तथा तिणसंथारनिसन्नो मुणिवरो भट्ठरागमयमोहो। जं पावइ मुत्तिसुहं कत्तो तं चक्कवट्टी वि ॥२८२॥ अथवा--तओ वि उवयारउओ मुक्खमिति ' पदमन्यथा व्याख्यायते, यथा ततः परमतत्त्वात् सर्वविरतिरूपादुपकार इति गम्यते सर्वविरतिर्हि पालयता सर्वेषामप्युपकृतं भवति । तदुक्तं--" चेइयकुलगणसंघे आयरियाणं च पवयणसुए य । सव्वेसु वि तेण कयं तव संजममुज्जमंतेण ॥ २८३ ॥ उपकारतश्चैत्यादीनामुपकारान्मोक्षं प्राप्नुवन्तीति शेषः । अर्हच्चैत्यादिसेवया च तीर्थंकरादिकर्मोपार्जनपूर्वमवश्यं मोक्षप्राप्तिः । अरहंतसिद्धपवयणगुरुथेरबहुसूसुए तवस्सीसु । वच्छल्लया य एसिं अभिक्खनाणोवओगे य ॥ २८४ ॥ इत्यादिवचनप्रामाण्यात् । अयं भावः शुद्धकुलजाता अपि गुणिनो विषयादिप्रमादस्थानेषु न रमन्ते । किन्तु सद्गुरुसामग्र्यां सत्यां तदुपदेशमाकर्ण्य सम्यक्त्वलक्षणां दीक्षां लान्ति । ततश्च सर्व विरत्याद्युत्तरोत्तरपदं प्राप्नुवन्तीति गाथार्थः ॥ ९४ ॥ गुरूपदेशश्रवणाच्च निर्वेदोऽपि भवतीति तमेवाह—

मूलम्——वन्नेमि नारयाओ जेसिं दुक्खाइं संभरंताणं ।

भव्वाण जणइ हरिहर-रिद्धि समिद्धीविउग्घोसं ॥ ९५ ॥

व्याख्या— ' वन्नेमिनारेत्ति ' वर्णयामि प्रशंसामि नारकान् घर्म्मादिनरकपृथ्वीजातान् येषां नारकाणां दुःखानि च्छेदनभेदनताडनादिकानि कष्टानि स्मरन्ताम् । उत्तराध्यनने अ० १९ गाथा । ४९ । ५० ।



For Private and Personal Use Only

५१ । ५२ ॥ "कंदंतो कंदुकुंभीसु, उद्धपाओ अहोसिरो । हुयासणे जलंतम्मि पक्कपुव्वो अणं-
तसो ॥ २८५ ॥ महादवग्गिसंकासे मरुम्मि वइरवालुए । कालंबवालुयाए उ दड्ढपुव्वो अणंतसो
॥ २८६ ॥ रसंतो कंदुकुंभीसु उड्ढं बंधो अबंधवो । करवत्त करकयाई हिं च्छिन्नपुव्वो अणंतसो ॥
४ ॥ २७७ ॥ अइतिक्खकंटगाइण्णे तुंगेसिं बलिपायवे । खेवियं पासबद्धेणं कड्ढो कड्ढाहि दुक्करं ॥ २८८ ॥
[व्याख्या– क्रंदन् कंदुकुंभीषु लोहादिमयीषु पाकभाजनविशेषरूपासु हुताशने देवमायाकृते ॥ ४९ ॥ महादवाग्निसं-
काशे अत्रान्यस्य तादृशदाहकतरस्याभावादेवमुपमा प्रोक्ता अन्यथा त्विहत्याग्नेरनन्तगुण एव तत्रोष्णः पृथिव्यनुभाव
इति 'मरुम्मित्ति' तात्स्थ्यात्तद्व्यपदेशसम्भवादन्तर्भूतोपमार्थत्वाच्च, मरौ मरुवालुकानिकरकल्पे 'वइर-
८ वालुएत्ति' वज्रवालुकानदीपुलिने कदम्बवालुकायां कदम्बवालुकानदीपुलिने च ॥ ५० ॥ रसन्नाक्रंदन्
कंदुकुम्भीषु क्षिप्त ऊर्ध्वं वृक्षशाखादौ बद्धो माऽयमितो नंक्षीदिति नियन्त्रितः क्रकचं करपत्रविशेष एव ॥ ५२ ॥
'खेविअंतिखिन्नं' खेदोऽनुभूतः मयेति गम्यते 'कड्ढो कड्ढाहिंति' आकर्षणापकर्षणैः परमाधार्मिककृतैः दुष्करं
दुःसहमिदमिति शेषः ॥ ५२ ॥ ] इत्यादिगुरूपदेशश्रवणेन चिन्तयतां भव्यानां मोक्षगमनार्हाणां हरिहरऋद्धिसमृ-
द्धिरपि आस्तामन्येषां समृद्धिर्हरिनारायणो हरो महेशस्तयोर्ऋद्धिर्विभवस्तस्याः समृद्धिः प्राचुर्यं साऽपि लोके हि हरि-
१२ हरयोरेव ऋद्धेः प्राधान्यं वर्ण्यते । ततस्तादृश्यपि ऋद्धिः उद्घोसंति उद्घुषणं भयेन रोमाञ्चं जनयति उत्पादयति । ते
हि सुगुरूपदेशादृद्धिगौरवस्य नरकफलतां परिभावयन्तो महत्या अपि समृद्धेर्बिभ्यतीति । तेषां सा ऋद्धिर्भयाद्रोमाञ्चं
जनयति ततश्च ते तद्भीता भवनिर्वेदात् सम्यक्त्वं ·.तिपद्यन्ते इति नारकश्लाघा नान्यथा इति गाथार्थः॥९५॥एवं पूर्व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गाथाभ्यां संवेगनिर्वेदौ प्रतिपादितौ । तौ चाप्तोक्तश्रवणादेव भवतः तदपि च बहुभिर्म्मन्यमानमपि कैश्चिदपि कदाग्रहग्रस्ते मन्यत इति भणित्वाऽधुना तान् निन्दन् गाथाद्वयमाह–

मूलम्—सिरिधम्मदासगणिणा रइयं उवएसमालसिद्धंतं ।
सव्वे वि समणसड्ढा मन्नंति पढंति पाढंति ॥ ९६ ॥

तं चेव केइ अहमा बलिया अहिमाणमोहभूएहिं ।
किरियाए हीलंता हीही दुक्खाइं न गणंति ॥ ९७ ॥

व्याख्या--सिरिधम्मदासेत्ति० तं चेवत्ति' श्रीधर्मदासगणिना श्रीवर्द्धमानजिनसमयवर्त्तिना महर्षिविशेषणेति प्रवादः, रचितं निष्पादितं उपदेशमालासिद्धान्तं सिद्धान्तोक्तार्थानामेवाभिधायकत्वात् । सिद्धान्तमिति भणितं सर्वेऽपि श्रमणश्राद्धाः श्रमणा मुनयः श्राद्धाः श्रावका जिनाज्ञापरा मन्यन्तेऽङ्गीकुर्वन्ति पठन्ति स्वयं भणन्ति परान् भाणयन्ति । उपलक्षणमेतत्तेनान्यानपि प्रकरणानि श्रीउमास्वातिवाचकश्रीहरिभद्रसूरिप्रमुखपूर्वयुगप्रवरागमगणधररचितानि सिद्धान्तानि सिद्धान्तार्थाविसंवादीनि प्रशमरतिपंचाशकादीनि मन्यन्ते पठन्ति पाठयन्ति च ॥ ९६ ॥ तमेव चोपदेशमालासिद्धान्तमुपलक्षणादन्यान्यपि सर्वगच्छप्रसिद्धगीतार्थकृतप्रकरणानि एव शब्दार्थः । ततस्तमपि केचिदित्यनिर्दिष्टनामानो-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऽधमा जघन्या नीचा इत्यर्थः । पुनस्तानेव विशिनष्टि छलिता भ्रान्तिं प्रापिताऽभिमानमोहभूतैः तत्राभिमानोऽभिनिवेशो मोहोऽज्ञानं ते एव भूताविव भूतौ व्यन्तरविशेषौ ताभ्यामभिमानमोहभूताभ्यां प्राकृतत्वाद् बहुवचनं क्रिययाऽनुष्ठानेन हीलयन्त एतदुक्तानुष्ठाननिराकरणेन हीलयन्त इत्यर्थः । अथवा क्रियया पाठलक्षणया पाठकरणेन हीलयन्तः किल किमेतत्पठ्यते नहीदं गौतमसुधर्म्मादिसूत्रकारकृतं, किं तर्हि येन तेन वा पाश्चात्येनाविदितशीलेन कृतमिति किमेवंविधाप्रमाणभूतपठनेनेति हीलयन्तो । ही ही इति खेदे, दुःखान्यशर्म्माणि न गणयन्ति भावीन्यनन्तानि दुःखानि न जानन्तीत्यर्थः । तथा हि–भूतच्छलिता भाविनमपायमचिन्तयन्तो यथा तथा चेष्टते भाषन्ते च । तथाऽभिमानमोहभूतच्छलिता भवदुःखान्यगणयन्तः श्रीउपदेशमालादीनि हीलयन्ति । नत्वेवं जानन्ति यत्सर्वश्रमणसङ्घसम्मतगीतार्थसंविग्नाचार्यकृतानि प्रकरणान्यपि सिद्धान्तप्रायाण्येवान्यथा तत्कृतानामनङ्गीकारे सङ्ग्रहणीकर्मप्रकृत्यादिग्रन्थानामप्यप्रामाण्यं स्यात्ततश्च तद्धीलने परमार्थतो भगवद्धीलैव । एतद्धीलया च दुःखं भवतीत्यत्रैवोक्तं प्राक् जिणमयलवहीलाए इत्यादिनेति गाथार्थः ॥ ९७ ॥ ननूपदेशमालादिहीलनेन कुतो दुःखं भवतीत्याह—

मूलम्—इयराण ठकुराण वि आणाभंगेण होइ मरणदुहं ।
किं पुण तिलोयपहुणो जिणिंददेवाहिदेवस्स ॥ ९८ ॥

व्याख्या–' इयराणेत्ति ' इतरेषामपि कतिपयग्रामस्वामिनामपि ठक्कुराणां राज्ञामपि शब्दो भिन्नक्रमः स च प्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्योजित एव आज्ञाभङ्गेन आदेशखण्डनेन भवति मरणदुःखं । ते हि खण्डिताज्ञं स्वसेवकं मारयन्तीति प्रतीतं । किं पुनस्त्रिलोकप्रभोस्त्रिभुवननायकस्य जिनेन्द्रदेवाधिदेवस्याज्ञाखण्डनेन मरणदुःखं भवतीति वाच्यम् । जिनाज्ञा ह्येवं--यद् गीतार्थाचार्यपरम्परागतोऽर्थः स्वच्छेकबुद्धया नाप्रमाणयितव्यः । यदुक्तं--श्रीसूत्रकृदङ्गनिर्युक्तौ--" आयरियपरंपरएण आगयं जो उ छेयबुद्धीए । कोवेइ च्छेयवाई जमालिनासं स नासिहिई ॥ २९० ॥ यदि छेकवादी कश्चित्तं न प्रमाणयति तथा तेन तीर्थकराज्ञा खण्डिता भवति । तत्खण्डनाच्चानन्तानि मरणानि प्राप्नोति । एकमरणस्य तु किं वाच्यमिति गाथार्थः ॥ ९८ ॥ ननु धर्मोद्यतानां जीवहिंसाविरतानां जिनादेशाकरणेऽपि को दोष इत्याशङ्क्याह—

मूलम्—जगगुरुजिणस्स वयणं सयलाण जियाण होइ हियकरणं ।
ता तस्स विराहणया कह धम्मो कह णु जीवदया ॥ ९९ ॥

---

१ "आयरियपरंपरएण" आचार्याः-सुधर्मस्वामिजम्बूनामप्रभवार्यरक्षिताद्याः संविग्नगीतार्थाः तेषां प्रणालिका—पारंपर्यं तेनागतं यदर्थं-यद् व्याख्यानं तत् यस्तु कुतर्कदर्पाध्मातमानसो मिथ्यात्वोपहतदृष्टितया ' छेयबुद्धिए ' छेकबुद्धया निपुणबुद्धया कुशाग्रीयशेमुषीकोऽहमिति कृत्वा 'कोवेइ' कोपयति दूषयति- अन्यथा तमर्थं सर्वज्ञप्रणीतमपि व्याचष्टे-कृतं कृतमित्येवं ब्रूयात् । स एवं 'छेयवाई' छेकवादी निपुणोऽहमित्येवंवादी पण्डिताभिमानी 'जमालीनासं' जमालिनाशं- जमालिनिन्हववत् सर्वज्ञमतविगोपकः 'णासिहित्ति' विनंक्ष्यति अरहट्टघटीयन्त्रन्यायेन संसारचक्रवाले बंभ्रमिष्यतीत्यर्थः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या–'जगगुरुजिणेत्ति' जगद्गुरोर्भुवनत्रयानुशासकस्य जिनेन्द्रस्यार्हतो वचनमागमः सकलानां सर्वेषां जीवानामेकेन्द्रियादिपञ्चेन्द्रियपर्यवसानानां प्राणिनां भवति जायते। हितकरणं हितकारकं हितत्वं च भगवद्वचनस्य प्रतीतम्। यथा--" सुनिउणमणाइनिहणं भूयहियं भूयभावणमणग्घं। अमियमजियं महत्थं महाणुभावं महाविसयं॥ २९१॥ यतः करणात्सर्वजगद्धितं भगवद्वचनं 'ता' तस्मात् तस्य भगवद्वचनस्य विराधनया खण्डनया कथं धर्मश्चारित्रलक्षणः आज्ञारूपत्वादेव तस्यापि तु न कथञ्चिदित्यर्थः। तथा कथं तु केन प्रकारेण जीवदया प्राण्यहिंसाजीवदयाया भगवद्वचनसाध्यत्वात्, तद्विराधने च तदभाव एवेति। यत उक्तं--उपदेशमालायां गाथा॥ ५०५॥ " आणाइच्चिय चरणं तब्भंगे जाण किं न भग्गंति। आणं च अइक्कंतो कस्साएसा कुणइ सेसं॥२९२॥ [व्याख्या-'आणाइ इति' चिय इति निश्चयेन आणा इति आज्ञयैव चरणं चारित्रं जिनाज्ञापालनमेव चारित्रमित्यर्थः। तद्भङ्गे आज्ञाभङ्गे कृते सति हे शिष्य! जानीहि किं न भग्नमिति आज्ञाभङ्गे सर्वमेव भग्नमित्यर्थः, आज्ञां जिनाज्ञामतिक्रान्तो यदि जिनाज्ञोल्लङ्घिता तर्हि कस्यादेशात् शेषं अनुष्ठानादि करोति आज्ञां विनानुष्ठानाचरणं विडम्बनैवेत्यर्थः॥ ५०५॥ ] अथवा--आज्ञाभङ्गो नरेन्द्राणां गुरूणां मानखण्डनम्। मर्मप्रकाशनं पुंसामशस्त्रं वध उच्यते॥ १॥ इति सुभाषितानुसारेणाज्ञाविराधकानां कथं जीवदयाऽपि तु न कथञ्चित्, तस्मात्तत्खण्डनेन धर्मो नापि जीवदयेति गाथार्थः॥ ९९॥ उक्तं जिनवचनविराधनान्न धर्म्मो न जीवदयेति। अथ तद्विराधनाप्रकारमेवाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्— किरियाइफडाडोवं अहियं साहंति आगमविहूणं ।
मुद्धाण रंजणत्थं सुद्धाणं हीलणट्ठाए ॥ १०० ॥

व्याख्या–‘ किरिया ’ इत्यादि क्रियाया धर्मानुष्ठानरूपायाः स्फटाटोपमिव स्फटाटोपमाडम्बरमित्यर्थः । अधिकं स्वमतिकल्पनाघटनया सूत्रोक्तादतिरिक्तं साधयन्ति प्ररूपयन्ति केऽपीति गम्यम्, यथा पुष्पदीपनैवेद्यादिभिर्भगवत्पूजा न विधेया हिंसाहेतुत्वात् । तथा-- निष्कारणमपि यथा कथञ्चिदविधिना विधिना वा सामायिकादिकरणीयमेव । तथा । त्रिविधाहारप्रत्याख्यानेऽपि जलत्यागेन स्वादिमग्रहणं कार्यम्, तथा श्रावकेणापि षट्पदिकारक्षायै मुण्डितमस्तकेन भाव्यम्, षट्विधजीवनिकायवधभीरुणा श्राद्धेनापि पञ्चग्रास्यादिप्रकारेण भिक्षा ग्राह्या इत्यादिरूपं, । कीदृशमित्याह-- आगमविहीनं आगमानुक्तं आगमविहीनता चैवं-पुष्पैः श्रीवज्रस्वामिना भगवता स्वयमाहृतैः पूजा कारिता श्रूयते च—
“ माहेसरीइ सेसा पुरियं नीया हुयासणगिहाओ । गयणयलमो वइत्ता वइरेण महाणुभावेण ॥२९३॥ इति । ततश्च पुष्पपूजैकेन्द्रियविराधनाहेतुत्वेऽपि द्रव्यपूजाधिकारिणा सावद्यान्तरविनिवृत्त्यर्थं सम्यक्त्वशुद्ध्यर्थं युज्यमानापि यदनुचिता स्वच्छन्दैः कैश्चिदुच्यते । तदागमाधिकं एवं नैवेद्यदीपाद्यपि गीतार्थाचीर्णमपि निषिध्यते तदप्यागमहीनं । तथा सत्यपि सामर्थ्ये किमपि कदालम्बनमादाय सामायिकादीनामविधिना करणे मिथ्यात्वम्, यतः– उपदेशमालायां गाथा ॥५०४॥ “ जो जहवायं न कुणइ मिच्छद्दिट्ठी तओ हु को अन्नो । वड्ढेइ य मिच्छत्तं परस्स संकं



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जणेमाणे ॥ २९४ ॥ [व्याख्या– ' जो जहवायं इति ' यो यथा वाचं न करोति यादृशं वचनं जल्पितं तादृशं क्रियानुष्ठादि न करोतीत्यर्थः । ' तओत्ति ' तस्मात् पुरुषात् ' हु ' इति निश्चितं- क अन्यो मिथ्यादृष्टिः अपि तु न कोऽपीत्यर्थः । स एव मिथ्यात्वधारी यतः स पुमान् मिथ्यात्वं वर्द्धयति किं कुर्वन् ' परस्सत्ति ' परेषां अन्यलोकानां शङ्कां जनयन् उत्पादयन् ॥५०४॥] तस्मान्निष्कारणमविधिकरणमागमविरुद्धं तथा त्रिविधाहारप्रत्याख्याने पानकं विनाऽन्यन्न कल्पते । यदुक्तमागमे--जइ पुणो कुणइ पोरिसि पुरिमेगासण अब्भत्तट्ठेतिविआहरो । तो पाणगसुद्धिसियं लेवाडे णिच्चेवमाइ कुणइ ॥१॥ आगाराणं छक्कं तत्थ य सुत्तं इमं भणियमित्यादि, यस्य कस्यचिदेकस्याहारस्य ग्रहणे शेषत्रयत्यागेऽशनमात्रैकभोगादपि त्रिविधाहारप्रत्याख्यानं भवति,तच्चासम्मतं ततस्त्रिविधाहारप्रत्याख्याने जलत्यागेन यस्य कस्याप्याहारस्य स्वादिमादेर्ग्रहणमुत्सूत्रं । तथा श्रावकाणां हि दशमप्रतिमाया अर्वाग्मस्तकमुण्डनं श्रुते न श्रूयते इति दशमैकादशप्रतिमाधरान्यश्रावकाणां मस्तकमुण्डनमपि श्रुतविरुद्धं लाघवोत्पादनादिति, भिक्षाभ्रमणमपि साधूनामेवोक्तं न श्राद्धानाम् । यतः– " से गामे वा नगरे वा गोयरग्गगओ मुणी । चरे मंदमणुव्विग्गो अव्वक्खित्तेण चेयसा ॥ २९५ ॥ " तथा सर्वसम्पत्कर्यपि भिक्षा साधूनामेव यथा-"यतिर्ध्यानादियुक्तो यो गुर्वाज्ञायां व्यवस्थितः । सदानारम्भिणस्तस्य सर्वसम्पत्करी मता ॥ २९६ ॥ साधुव्यतिरिक्तानां तु केषांचित्पौरुषघ्नी केषांचिद्वृत्तिर्भिक्षा । यथोक्तं-- धर्मलाघवकृन्मूढो, भिक्षयोदरपूरणं । करोति दैन्यात्पीनाङ्गः, पौरुषं हन्ति केवलम् ॥ २९७ ॥ निःस्वान्धपङ्गवो ये तु, न शक्ता वैक्रियान्तरे । भिक्षामटन्ति वृत्त्यर्थं, वृत्तिभिक्षेय-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुच्यते ॥ २९८ ॥ येषां तु भिक्षाग्रहणमुक्तमेवमेकादशीं प्रतिमां प्रतिपन्नानां ते तु श्रमणभूता एवोच्यन्ते । तस्याश्च सम्प्रति व्यवच्छिन्नत्वात् । यदुक्तं--" साहूण गोयरओ, वुच्छिन्नो दूसमाणुभावाओ । अज्जाणं पणवीसं सावगधम्मो य वोच्छिन्नो ॥ २९९ ॥ श्रावकधर्मश्चात्र प्रतिमारूपो ज्ञेयः, ततश्च सम्प्रत्यपि यत् श्रावकेभ्यो भिक्षां ग्राहयन्ति तदागमबाधितम् ।ननु तर्हि किमर्थं ते आगमविहीनं क्रियास्फटाटोपं साधयन्तीत्याह-मुग्धानामज्ञानानां रञ्जनार्थं रागोत्पादनार्थं मुग्धा ह्येवंविधया क्रिययाऽस्मासु रज्यतामिति बुद्ध्या, तथा शुद्धानामागमोक्तार्थाभिधायिनां हीलनार्थम् । एते ह्येकेन्द्रियादिविराधनां पूजया कारयन्तीत्यसंयता इत्यादिरीत्या तेषां निन्दार्थं । एवं च तेषामागमातिरिक्तक्रियाडम्बरं कुर्वतां प्रत्युतक्लेश एव--यदुक्तं–अप्पागमो किलिस्सइ, जइ वि करे अइदुक्करंपि तवं । सुंदरबुद्धीए कयं बहुं पि न सुंदरं होइ ॥ ३०० ॥ तत्करणे चाज्ञाभङ्गः प्रतीत एवेति गाथार्थः ॥१००॥ एवं स्थितेऽपि सति किमित्याह—

मूलम्—जो देइ सुद्धधम्मं सो परमप्पा जयंमि नहु अन्नो ।
किं कप्पदुमसरिसो इयरतरू होइ कइया वि ॥ १०१॥ ॥

व्याख्या–' जो देइत्ति ' यः कोऽपि साध्वादिर्ददाति प्रयच्छति शुद्धधर्मं सिद्धान्तविधिनोक्तं जिनोक्तं धर्म्मं, स परमात्मा परमात्मेव परमात्मा परमप्राणभूतोऽत्यन्तवल्लभः सर्वोपकारार्ह इत्यर्थः । यथा हि परमात्मनः सर्वं यद्यदी-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हितं तत्तत्क्रियते तथा शुद्धधर्मदायकस्यापि सर्वद्धर्या सर्वसमुदायेनोपकारः कर्तव्यः । यतः--" सम्मत्तदायगाणं दुप्पडियारं भवेसु बहुएसु । सव्वगुणमेलियाहि वि उवयारसहस्सकोडीहिं ॥ ३०१ ॥ जगति विश्वे नहु नैवान्यस्तत्समानो परः परमोऽस्तीति गम्यं । कुत एवमित्याह--किमिति प्रश्ने कल्पद्रुमो देवतरुस्तत्सदृशः कल्पद्रुमसमान इतरतरुः सहकारबीजपूरराजादनचंपकाशोकबकुलतालहिंतालादिर्भवति कदापि कस्मिन्नपि काले अपि तु न कदापीत्यर्थः । अयमभिप्रायो यथा कल्पद्रुमो वाञ्छितार्थदानदक्षतया श्लाघ्यस्तथान्ये द्रुमाः सरससुगन्धसुरूपफलपुष्पदायिनोऽपि न श्लाघ्याः स्युः, किं पुनः कर्कशकटुकण्टकाः कर्कन्धुकरीरादयः । एवं यः सम्यक्त्वं शुद्धतमं ददाति, न तत्समा अन्येऽपि तदपेक्षया शुद्धमार्गोपदेष्टारः किं पुनर्ये कुमार्गदेशका इति गाथार्थः॥ १०१॥ नत्वशुद्धधर्मभाषिषूपेक्षोक्ता शुद्धधर्मदातृषु च रागः कर्तव्यतयोक्तः पूर्वगाथाद्वयेन ततश्च धर्मसाधनमाध्यस्थ्यं भवता निरस्तमित्याशङ्क्याह—

मूलम्—जे अमुणियगुणदोसा ते कहवि बुहाण हुंति मज्झत्था ।
जइ ते विहु मज्झत्था ता विस अमयाण तुल्लत्तं ॥ १०२ ॥

व्याख्या-ये केऽपि अमुणितावज्ञातौ गुणदोषौ यैस्तेऽमुणितगुणदोषाः । तत्र गुणा ज्ञानादयो दोषा अज्ञानादयः तदन्तरं न जानन्ति । गुणान् दोषाश्च तुल्यतया पश्यन्तीत्यभिसन्धिः, ते कथं विबुधानां पण्डितानां भवन्ति जायन्ते मध्यस्था मध्यस्थतया सम्मता इति यावत् । मध्यस्था हि ते एव ये गुणिषु प्रीतिं वहन्ति दुष्टेषु चोपेक्षां कुर्व-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्ति अज्ञातगुणदोषविभागास्तु परमार्थतो गुणिषु द्वेषिण एव । गुणेष्वनादरात् । यदि चेत्तेऽप्यज्ञातगुणदोषविशेषा अपि दुर्निश्चये ये मध्यस्था माध्यस्थ्यभाजः । 'ता' तर्हि विषामृतयोस्तुल्यत्वं, कालकूटसुधारसयोः समानत्वं, यतोऽज्ञातगुणदोषविभागा हि मूर्खामूर्खत्वं च मरणमेव किं मरणं मूर्खत्वमिति वचनात् । ततश्च कार्ये कारणोपचारान्मूर्खत्वकलिता गुणदोषभेदानभिज्ञा विषतुल्याः विदितगुणदोषविभागास्तु किममृतमित्र युज्यते सदुपदेश इत्यादि, सदुपदेशगुणश्रवणादुपात्तसदुपदेशामृता अमृतकल्पा एव । मध्यस्था अपि त एव ये पक्षपातराहित्येन गुणदोषौ विज्ञाय तत्र प्रवृत्तिनिवृत्ती कुर्वन्ति । ततश्चाज्ञातगुणदोषभेदानामपि ज्ञातगुणदोषभेदवत् यदि माध्यस्थ्यं तदा विषामृतयोस्तुल्यत्वं प्रतीतमेवेति गुणानुराग एव माध्यस्थ्यमिति गाथार्थः ॥२॥ अथ गुणानुरागमेव दोषत्यागपूर्वं स्वाभ्युपगमव्याजेनोपदिशन्नाह—

मूलम्—मूलं जिणिंददेवो तव्वयणं गुरुजणं महासुयणं ।
सेसं पावट्ठाणं परमप्पाणं च वज्जेमि ॥ ३ ॥

व्याख्या–'मूलेत्ति' मूलं वृक्षबुध्नस्तद्वैवाश्रयणीयत्वान्मूलमाश्रयो यथा वृक्षमूलं वल्ल्यादीनामाश्रयः तथा मूलमाश्रयो ममेति गम्यत । क इत्याह--जिनेन्द्रदेवोऽर्हन् तथेत्यध्याहारस्तथा तद्वचनं जिनप्रणीतो धर्म इति यावत् । तथा गुरुजनो मुनिजनः, किं विशिष्टो ? महासुजनः, महासुजन इव महासुजनः । यथाहि-महासुजनः परोपकारैकनिष्ठतया सर्वगुणसम्पन्नतया च सर्वजनहितो भवति । तथा यो गुरुर्यथोक्तचारित्रपालनेन सर्वजीवहित इति स च मूलमिति



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्बन्धः नपुंसकनिर्देशश्चात्र प्राकृतत्वात् अर्हन्तं तदुक्तधर्मं सुगुरुं चाश्रयामीति भावः । गुणपक्षपातरूपत्वात् तदाश्रयस्य शेषं उक्तदेवगुरुधर्मतत्त्वादन्यत् पापस्थानं पापपदं मिथ्यात्वादिकं परं परकीयं कुगुरु-कुदेव-कुधर्मादिकं परतीर्थिकसम्बन्धि 'अप्पाणंति' आत्मीयं स्वकुलक्रमायातं गोत्रदेवीपूजनपार्श्वस्थनमनाऽविधिप्ररूपणादिकं वर्जयामि परिहरामि । सदोषतया त्यागार्हत्वात्तस्येति गाथार्थः ॥ १०३ ॥ नन्वेवमेकेषामाश्रयणे नान्येषां च वर्जनेन भवतो रागद्वेषौ भविष्यत इत्याशङ्कयाह—

मूलम्—अम्हाण रायरोसं कस्सुवरिं इत्थ नत्थि गुरुविसए ।
जिण आणरया गुरुणो धम्मत्थं सेसवोसिरिमो ॥ १०४ ॥

व्याख्या--'अम्हाणेत्ति' अस्माकमुपलक्षणत्वात् अन्येषां च जिनवचनभावितमतीनां रागरोषं रागश्च रोषश्च रागरोषमिति समाहारान्नपुंसकत्वं प्रीतिद्वेषावित्यर्थः, 'कस्सुवरि' मित्यत्रापिशब्दस्य गम्यमानत्वात्, कस्याप्युपरि- अत्र जगति नास्ति न विद्यते गुरुविषये, अमी अस्मदीया अमी अन्येषामित्यादि, एवं देवविषयेऽप्युपलक्षणमेतत् केवलं जिनाज्ञारता भगवदादेशासक्ता गुरवो धर्मार्थं धर्मनिमित्तमङ्गीक्रियन्ते इति शेषः । उपलक्षणत्वाद्रागद्वेषरहितं देवमाप्तोक्तं च धर्ममङ्गीकुर्म इति इति गम्यम्, शेषान् कुगुरु-कुदेव-कुधर्मान् प्राकृतत्वाद्विभक्तिलोपो द्रष्टव्यः । व्युत्सृजामः त्यजामः सदोषत्वेन तदुपेक्षां कुर्म इत्यर्थः । अथवा 'मूलं जिणिंददेवो' इति गाथया जिनस्य तद्वचनस्य सुगुरोश्चाश्रयणीय

For Private and Personal Use Only

त्वमुक्तं, शेषाणां च परिहारः । तदस्तु नाम परं गुरुषु समानवेषुष्वेव केऽपि वंद्यन्ते केऽपि नेति तु रागद्वेषयोरेव कारकारणमित्याशंक्याह--' अम्हाणमित्यादि ' व्याख्या च पूर्ववदेव केवलमुपलक्षणार्थौ न वाच्यः, तस्माद् गुणवदङ्गीकरणेन सदोषोपेक्षणेन स्वाभिनिवेशाभावेन गुरुविषये रागद्वेषौ न स्त इति गाथार्थः ॥ १०४ ॥ गुरुविषये रागद्वेषाभावमेवाह—

मूलम्—नो अप्पणा पराया, गुरुणो कईया वि हुंति सुद्धाणं ।
जिणवयणरयणमंडण–मंडियसव्वे वि ते सुगुरू ॥ १०५ ॥

व्याख्या--'नो' निषेधे, आत्मीयाः परकीया वा गुरवः कदापि भवन्ति शुद्धानां निर्मलसम्यक्त्वानां प्रस्तावाच्छ्रावकाणां साधूनां हि दिग्बन्धादिकरणेन गुरुविषयस्वकीयपरकीयत्वविभागस्यागमे श्रूयमाणत्वात्। ततः श्रमणोपासकानामेते हि गुरवोऽस्मदीयाः कुलपारम्पर्यागतास्तेन यादृशास्तादृशा वा संतु परमस्माभिः सर्वमेतेषामेव पार्श्वे कर्त्तव्यं कृतिकर्मादि वस्त्रपात्रादि चैतेभ्य एव दातव्यम । एते च परकीया एतेषां पार्श्वे नास्मदीयेन केनापि किमपि कर्त्तव्यम्,न च दातव्यममीभ्यो वस्त्रादि स्वगुरुं विनाऽन्यस्य कर्त्तुं न कल्पते इति विभागः,श्रावकाणां नास्ति ।एवं च कृतदिग्बन्धानां घटते,तेषां च श्रुते क्वापि दिग्बन्धाश्रवणात् । श्राद्धानां दिग्बन्धकरणे गुरोस्तत्कृतारम्भानुमतिदोषः । तदुक्तं--"आरम्भनिर्भरगृहस्थपरिग्रहेण–तत्पातकं सकलमात्मनि सन्दधानाः । सत्यापयन्त्यहह तस्करमोष दोष--माण्डव्यनिग्रह-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

म[न]यं शितभिक्षुपाशाः ॥ ३०२ ॥ यदपि च–अह तिपयाहिणपुव्वं सम्मं सुद्धेण चित्तरयणेण । गुरुणो निवेयणं सव्वहेव दढमप्पणो एत्थ ॥३०३॥इति, 'दीक्षापञ्चाशको'क्तगाथानुसारेण सम्यक्त्वदायकगुरोरात्मनः सर्वस्वनिवेदनात् । स्वसमर्पणमुखेन स्वीयत्वकरणं गुरोस्तदपि नान्यसुविहितभक्तिनिवृत्तिपरं किन्तु सम्यक्त्वदायक गुरुभक्त्यतिशयख्यापनपरं योऽपि च–" सामाइयाइ खलु धम्मायरियस्स तिन्नि जा वासा । नियमेण होइ सेहो उज्जुमओ तदुवरि भयणा ॥ ३०४ ॥ इत्यादिकाभाव्यव्यवस्था प्रतिपादिता साऽपि सम्यक्त्वदायकगुर्वपेक्षैव, न कुलक्रमायातगुर्वपेक्षा । वर्षत्रयं यावद्धर्माचार्यस्य भवतीति भणनादन्यथानुपपत्तेः । तत्रापि वर्षत्रयमर्यादां कुर्वता धर्माचार्या भाव्यत्वस्य अनन्तरमन्यत्रापि सुविहितगुरुपार्श्वे संयमप्रतिपत्तिरुक्तैव । तेनात्मीयपरविभागो गुरुषु नास्ति श्राद्धानां ।"तथाऽणंतगघयगुलगोरसफासुयपडिलाभणं समणसंघे"॥ इति गाथापूर्वार्द्धेन सर्वश्रमणसंघविषयं दानविधिं प्रतिपादयद्भिरपि स्वपरविभागो गुरुविषयो निरस्तः । असइ गणिवायगाणं तदस्स सव्वस्स गच्छस्स । इत्युत्तरार्द्धेन यो विशेषः स तु धर्माचार्यस्य दुःप्रतीकारत्वेन तस्मिन्नधिकभक्तिसूचनार्थः । नत्वन्यसुविहितदाननिवारणार्थः। तस्माच्छ्राद्धानामात्मीया एते परे एते सुविहितगुरव इति नास्ति । ननु तर्हि कथमस्तीत्याह-जिनवचनरत्नमण्डनमण्डिताः सर्वज्ञवाक्यमणिभूषणभूषिता ये सर्वेऽप्यर्द्धतृतीयद्वीपवासिनो भारतवर्षवासिनो वा ते स्वगुरव आत्मीया गुरवः समानत्वात्तेषां यतः-,एकस्य हीलया सर्वेषां हीलनादेकस्य पूजया सर्वेषां पूजनाच्च । यदुक्तम्–भरहेरवयविदेहे पन्नरस वि कम्मभूमिगा साहू । इक्कम्मि हीलियम्मि सव्वे ते हीलिया हुंति ॥ ३०५ ॥ भरहेरवयविदेहे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पन्नरस वि कम्मभूमिगा साहू । इक्कम्मि पूइयंमी सव्वे ते पूइया हुंति ॥ ३०६॥ तस्माद्ये जिनवचनमण्डितास्ते सर्वेऽपि पूज्यत्वात्स्वगुरव एवेति गाथार्थः ॥ ५ ॥ ननु किमर्थमेवं सुगुरावेवाग्रह इत्याह—

मूलम्—बलिकिज्जामो सज्जण-जणस्स सुविसुद्धपुन्नजुत्तस्स ।
जस्स लहु संगमेण वि विसुद्धबुद्धी समुल्लसइ ॥ १०६॥

व्याख्या--बलिरुपहारः स च बलिः यथा हि देवादीनां पुरो बलिभ्रामणं क्रियते तथा वयं बलिं क्रियामहे सज्जनस्य प्रस्तावात्सुगुरुलोकस्य कीदृशस्येत्याह--सुविशुद्धं निर्मलं पुण्यंधर्मस्तच्चश्रुतचारित्रलक्षणं तेन युक्तस्य सहितस्य यस्य गुरुलक्षणस्य सज्जनस्य सङ्गमेन सम्बन्धेन लघु शीघ्रं विशुद्धबुद्धिर्निष्पापमतिधर्मकरणोद्यम इति यावत् समुल्लसति परिस्फुरति । अत एवोक्तं--उपचरितव्याः सन्तो, यद्यपि कथयन्ति नैकमुपदेशं । यास्तेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि ॥२०७॥ तस्मात्सुगुरव एवोपास्या इति गाथार्थः ॥१०६॥ सम्प्रति सुगुरुवर्णनाधिकार एव स्मृतिगोचरागतं श्रीजिनवल्लभसुगुरुं स्तुवन्नाह—

मूलम्—अज्ज वि गुरुणो गुणिणो सुद्धा दीसंति तडयडा के वि ।
पहुजिणवल्लहसरिसो पुणो वि जिणवल्लहो चेव ॥ १०७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या–अद्याप्यस्मिन्नपि काले गुरवो धर्माचार्याः कीदृशा इत्याह–गुणिनो ज्ञानादिगुणयुक्ताः शुद्धाः शुद्धमार्गप्ररूपका दृश्यन्ते साक्षाद्वीक्ष्यन्ते तानेव विशिनष्टि ' तडयडत्ति ' देश्यत्वात् भृशं क्रियाकर्मठा इत्यर्थः । केऽपि कियन्तोऽपि 'दुप्पसहंतं चरणमिति' वचनप्रामाण्यात् । तथापि विशेषोऽस्ति तमेवाह--परं जिनवल्लभसदृशः श्रीजिनवल्लभसूरिसमानः पुनरपि जिनवल्लभ एवान्यस्य तत्समस्याऽभावात् । यतः--स हि भगवान कूर्चपुरीयगच्छाधिपश्रीजिनेश्वराचार्यदीक्षितोऽपि चैत्यवासं कटुविपाकमाकलय्य संवेगातिशयात् सुविहितचक्रवर्तिनां श्रीमदभयदेवसूरीणां पार्श्वे स्वगच्छादिदृष्टिरागं विहाय स्वगुर्वनुज्ञयोपसम्पन्नः । दुरुच्छेदश्च दृष्टिरागः यतः–कामरागस्नेहरागावीषत्करनिवारिणौ । दृष्टिरागस्तु पापीयान् दुरुच्छेदः सतामपि ॥ ३०८ ॥ ततश्च दुरुच्छेददृष्टिरागच्छेदान्नैतत्समो परो गीतार्थत्वनिर्ममत्वादिगुणकलिततया क्रियाकलापकर्मठोऽस्ति सम्प्रतीति गाथार्थः ॥ १०७ ॥ अथ श्री जिनवल्लभसूरीणामनन्यसदृशत्वेन सर्वोत्कृष्टानामपि वचनात् केषां चित्सम्यक्त्वं न भवतीति सदृष्टान्तमाह—

मूलम्——वयणे वि सुगुरुजिण-वल्लहस्स केसिं न उल्हसइ सम्मं ।
अह कह दिणमणितेयं उल्लुयाण वि हरइ अंधत्तं ॥ १०८ ॥

व्याख्या--पञ्चम्यर्थत्वात सप्तम्या वचनात् सुगुरुजिनवल्लभस्यापि प्रागुपन्यस्तोऽपि शब्दोऽत्र सम्बध्यते भिन्नक्रमत्वात्, केषांचिन्निबिडाभिनिवेशवासितमतीनां सम्यक्त्वं नोल्लसति । किमिह सुबहुवाया वित्थरेणं भवाओ,

For Private and Personal Use Only

जइ कहमवि चित्तं तुम्ह दूरं विरत्तं ।जइ य कुसुयकंतिवित्थरंतं च कित्तिं,अभिलसह बुहाण छेरयं सं जणंति ॥ ३०९ ॥ ता दूरं मुक्कसंका विरइ कयमणा चत्तमिच्छत्तदोसा । साहूणं पायसेवा जिणमयसवणचिंतणविखत्तचित्ता॥कालं तोलेह निच्चं पुणरवि दुलहा धम्मसामग्गिएसा । भुज्जो पाविज्ज जीवा कहमवि न इमं नज्जए जेण सम्मं ॥ ३१० ॥ इत्यादि संवेगातिशयोत्पादकश्रीजिनवल्लभसूरिवचनादपि केषांचित्सम्यक्त्वं न भवतीति भावः । अस्मिन्नर्थे दृष्टान्तमाह--अथेति पक्षान्तरे भवत्यपोदमित्यर्थः । दिनमणितेजः सूर्यज्योतिरुलूकानां घूकानामन्धत्वमान्ध्यं कथं केन प्रकारेण हरति निराकरोति अपि तु न कथमपीति । इदमुक्तं भवति यथा सूर्यः सर्वत्रान्धकारं हरन्नप्युलूकानामान्ध्यं न हरति तथा श्रीजिनवल्लभसूरिवचनादप्यभिनिवेशिनां मिथ्यात्वांध्यं नापगतमिति गाथार्थः ॥ १०८ ॥ अथ पुनर्ये श्रीजिनवल्लभसूरिवचनादपि भवस्वरूपं पश्यन्तोऽपि सम्यक्त्वं न प्रतिपद्यन्ते तादृशानामेव धृष्टत्वं धिक्कुर्वन्नाह—

मूलम्—तिहुयणजणं मरंतं दट्ठूण नियंति जे न अप्पाणं ।
विरमंति न पावाओ धिट्ठी धिठ्ठत्तणं ताणं ॥ १०९॥

व्याख्या-त्रिभुवनजनं त्रैलोक्यलोकं सुरासुरनरनैरयिकतिर्यग्लक्षणं म्रियमाणं दृष्ट्वा विलोक्य यथोक्तं-नरेन्द्रदेवेन्द्रदिवाकरेषु तिर्यग्मनुष्यामरनारकेषु । मुनीन्द्रविद्याधरकिन्नरेषु स्वच्छन्दलीलाचरितो हि मृत्युः॥३११॥ नियन्ति

पश्यन्ति ये प्रमादिनोऽभिनिविष्टानामात्मानं स्वं प्रमादिनो हि म्रियमाणं लोकं दृष्ट्वा स्वात्मानं मरिष्यमाणं न पश्यन्ति । यथा-" मरणं प्रकृतिः शरीरिणां विकृतिर्जीवितमिष्यते बुधैः । क्षणमप्यवतिष्ठते श्वसन् यदि जन्तुर्ननु लाभवानसौ ॥ ११२ ॥ कथमेवमित्याह--यतो विरमन्ति न पापात् विरज्यन्ते न दुष्कर्मणः तेषां प्रमादिनामभिनिविष्टानां वा धृष्टत्वं धिक् धिक् तस्माद्धर्मे प्रमादाभिनिवेशौ त्याज्यावित्यर्थः ॥१०९॥ अथ तेषामेव कुत्र स्नेहत्वमाह–

मूलम्—सोहेण कंदिऊणं कुट्टेऊणं सिरं च उरउयरं ।
अप्पं खिवंति नरए धिट्ठी तं पि य कुनेहत्तं ॥ ११० ॥

व्याख्या–शोकेनेष्टवियोगादिजनितेन हेतुना क्रन्दित्वा परिदेव्य कुट्टयित्वा ताडयित्वा शिरो मस्तकं, चकारो भिन्नक्रमः स च पदान्ते सम्बन्धनीयः । उरो हृदयमुदरं जठरं ततश्च निबिडमोहव्याप्तमात्मानं क्षिपन्ति नरके श्वभ्रे, उपलक्षणमेतत्तिर्यग्गतिकुदेवगतिकुमनुष्यगतीनां शोकात्परिदेवतादि कुर्वन्तो दुर्गतिभाजनमात्मानं न जानन्ति यतः–शोचन्ति स्वजनानंतं नीयमानान् स्वकर्मभिः । नेष्यमाणन्तु शोचन्ति नात्मानं मूढबुद्धयः ॥ ११३ ॥ तस्मात्तदपि धिक् धिक् कुस्नेहत्वं यन्मृतार्थे शिरः कुट्टनादि, तस्माद्विवेकिना शोको न विधेय इति गाथार्थः ॥११०॥ शोके च क्रियमाणे प्रत्युत दोष एवेत्याह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—एगंपि य मरणदुहं अन्नं अप्पा वि खिप्पए नरए ।
एगं च मालपडणं अन्नं लउडेण सिरघाओ ॥ १११ ॥

व्याख्या--एकमपि च मरणदुःखं इष्टविपत्तिकृच्छ्रं अन्यत्पुनस्तन्निमित्तमाक्रन्दादिभिरात्मा स्वजीवः क्षिप्यते नरके । उपलक्षणत्वाद्दुर्गतौ क्षिप्यते दुर्गतियोग्यकर्मोपार्जनात् । अस्मिन्नर्थे लौकिकमुपाख्यानमाह–एकं च एकं पुनर्मालपतनं-मञ्चात्पतनं अन्यः पुनर्लकुटेन यष्ट्या शिरोघातो मस्तकहननं, यथा--कोऽपि मञ्चपानाद्धस्तपादादि भङ्गमासादयति । पुनश्च लकुटेन शिरोघातादधिकां वेदनामनुभवति । तथा मूर्खोऽपि स्वजनवियोगजदुःखमासाद्य पुनस्तदर्थमाक्रन्दादि कुर्वन् दुर्गतिदुःखमाप्नोति । तस्मादविवेकाचरितमिदमिति मत्वा विवेकिना प्रियवियोगेऽपि स्वमनः सुकृते निश्चलं कार्यम् । यदुक्तमन्यैरपि--" अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम् । स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया समुध्धृतम् ॥ ३१४ ॥ इति गाथार्थः ॥ १११ ॥ नन्वेवं कुतः कुर्वन्तीत्याशङ्क्य सम्प्रति सुगुर्वादीनां दौर्लभ्यमाविष्कुर्वन्नाह—

मूलम्—संपइ दूसमकाले धम्मत्थी सुगुरू सावगा दुलहा ।
नामगुरू नामसड्ढा सरागदोसा बहू अत्थि ॥ ११२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—सम्प्रति दुःषमकाले पञ्चमारके धर्मार्थिनः शुद्धधर्माभिलाषुकाः सुगुरवश्च श्रावकाश्च सुगुरुश्रावका दुर्लभा दुष्प्रापाः सम्प्रति कालवैषम्यात्तादृशानामल्पत्वात् । ये शुद्धं धर्ममिच्छन्ति यतः- शैले शैले न माणिक्यं मौक्तिकं न गजे गजे । साधवो नहि सर्वत्र चन्दनं न वने वने ॥ ३१५ ॥ तर्हि के सुलभा इत्याह--नाम्नैव गुरवो न तु भावाचार्या नाम्नैव श्राद्धाः सम्यक्त्वमूलद्वादशव्रतराहित्येन कुलक्रमायातं श्रावकनामोद्वहमाना नामश्राद्धाः । यत एव च नामगुरुनामश्राद्धास्तत एव सरागद्वेषा रागद्वेषाभ्यां सहितास्तादृशाश्च बहवः प्रभूता अस्तीत्यव्ययं सन्तीत्यर्थे । रागद्वेषकलितानां च नामगुरुनामश्राद्धानां बहुत्वेऽपि प्राचुर्येण [ सन्मार्गोपदेष्टा विना च चतुर] सन्मार्गोपदेष्टारं ( विना ) लोकाः शोकादिभ्यो न निवर्त्तन्ते । ततश्चानिवर्त्तमाना आत्मानं दुर्गतौ क्षिपन्तीति प्रतीतमेवेति गाथार्थः ॥ ११२ ॥ सुगुरुश्रावकदुर्लभतायां हेतुमाह--

**मूलम्—कहियं पि सुद्धधम्मं काहि वि धन्नाण जणइ आणंदं ।**
**मिच्छत्तमोहियाणं होइ रईमिच्छधम्मेसु ॥ ११३ ॥**

व्याख्या—इहापि लिङ्गव्यत्ययः प्राकृतत्वात्, कथितोऽपि सप्रपञ्चमाख्यातोऽपि आस्तां संक्षेपाभणित इत्यपेरर्थः । शुद्धो निर्दोषो भगवदाज्ञाप्रधानो धर्मः श्रुतादिरूपः केषांचिदपि अत्रापि शब्दोऽवधारणार्थः स्तोकानामेव धन्यानां पुण्यवतां जनयत्युत्पादयत्यानंदं न सर्वेषां, धर्मार्थिनां स्तोकत्वात् । यतः “ रयणत्थिणोत्ति थोवा तहा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यारो वि जह य लोगम्मि । इय सुद्धधम्मरयण-त्थिदायगा दयरं नेया(?) ॥३१६॥ कुत एवमित्याह--यतो मिथ्यात्वमोहितानां मूढचेतसां बहुवचनं बहुत्वख्यापकं बहुत्वं चानन्तत्वात्तेषां मिथ्यात्वमोहितानां भवति जायते रतिः स्वास्थ्यं इहावधारणार्थस्यैवशब्दस्य गम्यमानत्वात् । मिथ्याधर्मेष्वेव सर्वज्ञाज्ञाविमुखहिंसादिप्ररूपककौलादिधर्मेष्वेव कालमाहात्म्यात् । तस्माच्छुद्धधर्मार्थिनां स्तोकत्वात्सुगुरुश्रावकदुर्लभता संगतैवेति गाथार्थः ॥ ११३ ॥ अन्यच्चास्मिन् काले यदस्ति तदाह—

मूलम्—एक्कं पि महादुक्खं जिणसमयविऊणं सुद्धहिययाणं ।
जं मूढा पावाइं धम्मं भणिऊण सेवंति ॥ ११४ ॥

व्याख्या-इहाप्यपिशब्दः समुच्चये, स चोत्तरपदेन सम्बन्ध्यते, ततश्चास्मिन् काले सुगुरुश्रावका एव दुर्लभाः । एकं महादुःखमपि केषामित्याह--जिनसमयविदां जिनागमज्ञानां किंविशिष्टानां शुद्धहृदयानां निर्मलचित्तानां सर्वसत्त्वेष्वनुकम्पावतामिति यावत् । किं तन्महादुःखमित्याह--यत् मूढा मिथ्यात्वमोहिताः पापानि दुष्कृतानि अगम्यगमनजीववधादीन्यपि धर्ममिति भणित्वा सेवन्ते । यदाहुस्ते भागवत--पुराणे "कामादुपागतां गच्छेदगम्यामपि योषितम् । जितेन्द्रियोऽपि तां त्यक्त्वा युज्यते स्त्रीवधेन सः ॥ ३१७ ॥ कामार्त्तां स्वयमायातां, यो न भुक्ते नितम्बिनीम् । सोऽवश्यं नरकं याति तन्निःश्वासहतो नरः ॥ ३१८ ॥ तथा योगशास्त्रे द्वितीयेप्रकाशे ४३, ४४



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु । औरभ्रेणाथ चतुरः शाकुनेनेह पंच तु ॥ ३१९ ॥ षण्मासांछागमांसेन पार्षतेनेह सप्त वै । अष्टावेणस्य मांसेन रौरवेण नवैव तु ॥ ३२० ॥ दशमासांस्तु तृप्यन्ति वराहमहिषामिषैः । शशकूर्मयोर्मांसेन मासानेकादशैव तु ॥ ३२१ ॥ संवत्सरं तु गव्येन पयसा पायसेन तु । वार्ध्रीणसस्यमांसेन तृप्तिर्द्वादशवार्षिकी ॥ ३२२ ॥ तथा स्वर्गकामोऽश्वमेधेन यजेत । एवं गोदानक्षेत्रदानाद्यपि धर्मतया प्रतिपाद्य तत्कुर्वन्ति । एतेषां च पापत्वं प्रकटमेव, तन्मतेऽपि यदुक्तं-मातृवत्परदाराणि परद्रव्याणि लोष्टुवत् । आत्मवत् सर्वभूतानि यः पश्यति स पश्यति ॥ ३२५ ॥जिनमते तु--मूलमेयमहम्मस्समहादोससमुस्सयं । तम्हा मेहुणसंसग्गिं-निग्गंथा वज्जयंति णं ॥ ३२६ ॥ तथा-नवि किंचि अणुन्नायं पडिसिद्धं वा वि जिणवरिंदेहिं । मुत्तुं मेहुणभावं न तं विणा रागदोसेहिं ॥ ३२७ ॥ तथा-सव्वे जीवा वि इच्छंति जीविउं न मरिज्जिउं । तम्हा पाणिवहं घोरं निग्गंथा वज्जयंति णं ॥३२८॥ तथा-क्षेत्रं यंत्रं प्रहरणवधू लांगलं गोतुरंगं,धेनुर्गन्त्री द्रविणमणयो हर्म्यमन्यच्च चित्रम् । यत्सारंभं जनयति मनो रत्नमालिन्यमुच्चै--स्तादृग् दानं सुगतितृषितैर्नैव देयं न लेयम् ॥ ३२९ ॥ इत्यादि भणनादेतानि महापापान्येव, एतच्च पापं मिथ्यात्विनो धर्मतया भणन्ति । जैनम्मन्या अपि केचिद्यथा कथञ्चित्साधुभ्यो देयम् लिङ्गमात्रमेव च वन्द्यमित्यादि भणित्वाऽऽधाकर्मिकदानासंयतभक्त्या द्यधर्ममपि धर्मतया कारयन्ति । मूढाश्च तत्तथैव प्रतिपद्यन्त इति एकं यथार्थश्रुतवेदिनां महादुःखं च ।ते हि तादृशाधर्मरू-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पधर्मकारिणां दुर्गतिगमनं सम्भावयन्तस्तत्करणतया दुःखिनो भवन्तीति गाथार्थः ॥११४॥ ननु किं तर्हि सर्वेऽपि मूढा उत केऽप्यमूढा अपीत्याह—

**मूलम्—थोवा महाणुभावा जो जिणवयणे रमंति संविग्गा ।**
**तत्तो भवभयभीया सम्मं सत्तीए पालंति ॥ ११५ ॥**

व्याख्या–स्तोका अल्पे महानुभावा महासत्त्वाः सन्तीति गम्यते के इत्याह–ये यूना वैदग्ध्यवंतः कांतायुक्तस्य कामिनोऽपि दृढं किन्नरगेयश्रवणादधिको धर्मश्रुतौ राग इत्येवंविधशुश्रूषावन्तो जिनवचने वीतरागोक्ते रमन्ति रतिं कुर्वते, संविग्नाः संवेगशालिनो मोक्षाभिलाषिण इति यावत् । ततस्तेभ्यः शुश्रूषायुक्तेभ्यः सकाशात् गुरुभक्तिः परमास्यां विधौ प्रयत्नस्तथा धृतिकरणे । सद्ग्रन्थाप्तिः श्रवणं तत्त्वाभिनिवेशपरमफलमित्यादिशुश्रूषाफलविदो ये शक्त्या स्वशक्त्याऽनुसारेण सम्यक्त्वं पालयन्ति ते स्तोका इत्यत्रापि सम्बध्यते । किंविशिष्टा भवभयभीता संसारसाध्वसत्रस्ता एतावता निर्वेदोपि भणितः । संसारभययुक्तानामेव मोक्षपथासन्नत्वात् । यदुक्तं-" **संसारचारए चारयव्व आवलियस्स बंधेहिं । उव्विग्गो जस्स मणो सो किर आसनसिद्धिपहो** ३३० शुश्रूषा परेभ्यो हि सम्यक्त्ववन्तोऽल्पे शुश्रूषाया निन्हवे शिष्यादिष्वपि विद्यमानत्वात् । ततश्च ये जिनवचनं शुश्रूषन्ते ते स्तोकास्तेभ्योऽपि सम्यक्त्वपालकाः स्तोका इति गाथार्थः ॥ ११५ ॥ एवं प्राग्गाथया सम्यक्त्वपालकानामल्पत्वमभिदधता सम्यक्त्वदुर्लभतोक्ता ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ पुनः सम्यक्त्वं विना कृतानामप्यन्यधर्मकृत्यानामकिञ्चित्करत्वं सदृष्टान्तमाह—

मूलम्—सव्वंगंपि हु सगडं जह न चलइ इक्कबडहिलारहियं ।
तह धम्मफडाडोवं न चलइ सम्मत्तपरिहीणं ॥ ११६ ॥

4 व्याख्या–सर्वाङ्गमपि शकटं, समस्तयुगयुगकीलचक्रादिस्वाङ्गसमेतमप्यनो यथा येन प्रकारेण न चलति न स्पन्दते । 'इक्कबडिहिलारहियं'ति एका चासौ बडिहिला च एकबडिहिला लोकप्रसिद्धो धूर्मूले कीलिकाविशेषः । तया रहितं वियुक्तं शकटं हि सर्वेष्वपरेष्वङ्गेषु सत्स्वपि एकां बडहिलां विना न चलत्येव । तथा धर्माणां दानादीनां स्फटाटोप
8 इव स्फटाटोप उपचाराद्दाडम्बरो नपुंसकत्वं प्राकृतत्वान्न चलति न निर्वहति । क्वचित् 'न फलइ सम्मत्तपरिहीणं'ति पाठः स तु स्पष्ट एव सम्यक्त्वपरिहीणः सम्यक्त्वरहित इति । सम्यक्त्वरहितं चारित्रमपि न फलदम् । यतः–
दंसणभट्ठो भट्ठो दंसणभट्ठस्स नत्थि निव्वाणं । सिज्झंति चरणरहिया दंसणरहिया न सिज्झंति ॥ ३२९
12 किं पुनर्दानादीनीति । ततोऽयं भावः सर्वधर्ममूलभूते सम्यक्त्वे प्राक् दार्ढ्यं विधेयमितिगाथार्थः॥११६। ननु सम्यक्त्वं विनाऽन्यो धर्माडम्बरोऽकिञ्चित्कर इति वचनं मिथ्यात्विनं प्रति रोषाद् भविष्यतीत्याशङ्कायामाह–

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—न मुणंति धम्मतत्तं सत्थं परमत्थगुणहियं अहियं ।
बालाण ताण उवरिं कह रोसो मुणियधम्माणं ॥ ११७ ॥

व्याख्या–अथवा ननु येन सम्यक्त्वेन विना सर्वं धर्मकृत्यमनर्थकं तदेवावगणय्य स्वच्छंदतया धर्मकृत्यं ये कारयन्ति तेषु सम्यग्दृशां रोषो भविष्यतीत्याशङ्क्याह-'न मुणंती'त्यादि न मुणंति न जानन्ति धर्मतत्त्वं धर्मरहस्यं समुच्चयार्थस्य चस्याध्याहारात् शास्त्रं च न जानन्ति।शास्त्रमेव विशिनष्टि,परमार्थगुणहितं,परमार्थगुणा ज्ञानादयस्तेषां हितं प्रकर्षप्रापणेन श्रेयःकारकं अधिकं यथा भवति तथा परमार्थगुणहितमिति क्रियाविशेषणम्,अथवा शास्त्रमेव प्रकारान्तरेण विशेष्यते ।परमार्थगुणहितमहितं च । एकं शास्त्रमाप्तप्रणीतं परमार्थगुणहितम्,अन्यद्वात्स्यायनमन्वादिप्रणीतं परमार्थगुणाहितं परमार्थगुणानां विनाशकत्वात्तस्य शास्त्रस्य, ततश्च परमार्थ गुणस्य हितमहितं चेदं शास्त्रमिति च न जानन्ति । तेषां बालानां अज्ञानामुपरि को रोषः कः कोपो मुणितधर्माणां ज्ञातनिर्मलधर्मतत्त्वानां । अपि तु न कश्चित् प्रत्युतानुकम्पैव भवति । तादृशस्य बालस्यानुकम्प्यत्वात्, यतः--आत्मद्रुहममर्यादं मूढमुज्झितसत्पथं । सुतरामनुकम्प्येत नरकार्चिष्मदिन्धनं ॥ ३३० ॥ तस्माद्धर्मज्ञानां नोन्मार्गगामिषु कोप इति गाथार्थः ॥ ११७ ॥ अथ बालानामेव बालत्वमाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्—अप्पा वि जाण वेरी तेसिं कहं होइ परजिए करुणा ।
चोराण बंदियाण य दिट्ठंतेणं मुणेयव्वं ॥ ११८ ॥

व्याख्या--आत्माऽपि स्वजीवोऽप्यास्तामन्यः येषां वैरीव शत्रुरिव वैरी । यथाहि -वैरिणि द्वेषाद्धन्तुं प्रवर्त्तन्ते तथा जानन्तोऽपि कदाग्रहग्रहिलतया सन्मार्गोद्भासनादिपापकरणेनात्मानमपि नरकादिदुःखमारेण मारयितुमिच्छन्ति । तेषामात्मशत्रूणां कथं भवति परजीवेऽन्यात्मनि उपदेश्य इति यावत् करुणा दया । यो ह्यात्मानमपि जिघांसति स परस्मिन् कथं दयावान् भवतीति भावः । तदुक्तं--परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत् । आत्मानं योऽतिसन्धत्ते सोऽन्यस्मै स्यात्कथं हितः ॥ ३३१ ॥ अस्मिन्नर्थे दृष्टान्तमाह--चौराणां तस्कराणां बन्दिकानां ये:बलात् पुरुषान् द्रव्याभिलाषुकतया गृहीत्वा बन्दीकुर्वन्ति तेषां दृष्टान्तेनोपमानेन मुणितव्यं ज्ञातव्यमेतत्पूर्वोक्तं । कोऽर्थः यथा चौरा बन्दिकाश्च प्राक् स्वमरणं प्रतिपद्यन्ते स्वस्मिन्निर्दयाः सन्तः पश्चादन्यानपि धनाद्यभिलाषेण प्रहरन्ति । तथा बाला अप्युत्सूत्रभाषणादिभिः प्राक् स्वयं भवचक्रभ्रमणमङ्गीकृत्य पश्चाद्वस्त्रपात्रादिगृध्नवः कुदेशनादिभिरन्यानपि पातयन्तीति किञ्चित्रमपि तु न किमपीति गाथार्थः ॥ ११८ ॥ बालस्वभावमुद्भाव्याबालस्वरूपमाह—

मूलम्—जे रज्जधणाईणं कारणभूया हवंति वावारा ।
ते वि हु अइपावजुया धन्ना छड्डंति भवभिया ॥ ११९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या–जेरज्जेति, ये राज्यधनादीनां तत्र राज्यमाधिपत्यं धनं धरिमगणिमादिकमादिशब्दादनुकूलशब्दादिविषयपरिग्रहस्तेषां कारणभूता हेतुभूता भवन्ति जायन्ते व्यापारा व्यवसायाः शत्रुहनन-राजसेवा-कृषिवाणिज्यादयो बाह्या,आन्तरास्तु पञ्चाग्निसाधनादयः तेऽपीति तानपि व्यापारान् ' हु ' निश्चये, धन्याः, पुण्यवन्तश्छर्दयन्ति त्यजन्ति संयमस्वीकरणेन भवभीताः संसारादुद्विग्नाः । कुतस्त्यजन्ति तान् व्यापारान् यतोऽतिपापयुतास्तेऽवेति दुरन्तपापहेतवः । तद्यं भावः–पुण्यवन्तो येभ्यो व्यापारेभ्यो राज्यादि लभ्यते तानपि व्यापारांस्तत्त्वज्ञतया पापहेतून् मत्वा संसाराद्विभ्यतस्त्यजन्ति । तादृशाश्चोत्तमा महासत्त्वा एव केचिद्भवन्तीति गाथार्थः ॥ ११९ ॥ एवं पुण्यवतां महासत्त्वानां स्वरूपमभिधाय पुनरधुना निःसत्त्वस्वरूपमाह—

मूलम्–बीया य सत्तरहिया धणसयणाईहिं मोहिया लुद्धा ।
सेवंति पावकम्मं वावारे उयर भरणट्ठे ॥ १२० ॥

व्याख्या–द्वितीयाश्च पूर्वोक्तमहासत्त्वेभ्योऽन्ये सत्त्वरहिता साहसविकला धनस्वजनादिभिर्मोहिताः " कइया वच्चइ[चव्वइ]सत्थो किं भंडं कत्थ कित्तिया भूमी । को कय विक्कयकालो निव्विसई किं कहं केण ॥३३२ तथा–जाया तरुणी आहारणवज्जिया पाढिओ न मे तणुओ । धूया नो परिणीया भइणी नो भत्तुणोऽभिमया ॥ ३३३ ॥ इत्यादि प्रकारेणधनोपार्जनस्वजनरक्षगैरादिशब्दादिन्द्रियार्थलाभैर्मूढतामापादिता अत एव



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लुब्धा लोभवन्तः सेवन्ते पापकर्म । आश्रयन्ति कृषिवाणिज्यदेशान्तरयानसमुद्रतरणशैलारोहणकर्मादानसेवनादिकं दुष्कर्म । परोपकाराद्यर्थं तादृशं दुष्कर्म कुर्वन्तो भविष्यन्तीत्याशङ्क्याह-व्यापारे उदरभरणार्थे जठरमात्रपूरणार्थे व्यवसाये नोपकाराद्यर्थमिति । इदमुक्तं भवति--एके हि महासत्त्वा एवंविधाः सन्ति ये राज्यादिकारणभूतानपि व्यापारांस्त्यजन्ति भवाद्बिभ्यतो । द्वितीयाः पुनर्हीनसत्त्वा उदरमात्रभरणार्थमपि पापव्यापारं सेवन्ते धनलवाशया तदपि त्यक्तुं न क्षमन्ते । यतः-जह चयइ चक्कवट्टी पवित्थरं तत्तियं मुहुत्तेण । न चयइ तहा अहन्नो दुब्बुद्धी खप्परं दमगो ॥ ३३४ ॥ तस्मात्तेऽधमा इति गाथार्थः ॥ १२० ॥ अथाऽधमाधमानां स्वरूपं कथयंस्तन्निन्दामाह—

मूलम्—तइया अहमाण अहमा कारणरहिया अन्नाणगव्वेण ।
जे जंपंति उसुत्तं धिद्वी पंडित्तणं ताणं ॥ १२१ ॥

व्याख्या-तृतीया अधमानामधमा एके महासत्त्वा उक्ताः,अपरे द्वितीया हीनसत्त्वा अधमा उक्तास्तदपेक्षया अधमाधमास्तृतीयाः सन्तीति शेषः । के ते इत्याह-ये कारणरहिता धनार्जनस्वजनपालनादिकारणं विनेति यावज्जल्पन्ति वदन्ति उत्सूत्रं सूत्रविरुद्धं । केन हेतुना जल्पन्तीत्याह-अज्ञानगर्वेण अज्ञानं कुत्सितमल्पं वा ज्ञानं तद्गर्वेणाहंकारेण भवति । ह्यधमानां कुत्सितादल्पाद्वा ज्ञानाद्गर्वः । यतः—अन्यैः स्वेच्छारचिता-नर्थविशेषान् श्रमेण विज्ञाय । सकलं वाङ्मयमित्तं इति खादत्यङ्गानि दर्प्पेण ॥३३५॥ क्रीडनकमीश्वराणां,कुर्कुटलावकसमानवाल्लभ्यः । शा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्राण्यपि हास्यकथां,लघुतां वा क्षुल्लको नयति३३६अयंभावः प्राग् ये सत्त्वहीना उक्तास्ते तु स्तोकेऽपि कारणे पापं सेवन्ते।एते पुनः कारणमन्तरेणैवाज्ञानमदोन्मत्ता अभिनिविष्टाः सन्त उत्सूत्रं जल्पन्तीत्यधमाधमाः । तस्मात्तेषामुत्सूत्रभाषकाणां पाण्डित्यं विद्वत्त्वं धिग् धिगस्तु । यदकारणमपि दुर्गतिं नयतीति गाथार्थः ॥२१॥ ननु ते कुतोऽधमाधमा धिक् तेषां पाण्डित्यं ये उत्सूत्रं जल्पन्तीत्याशङ्क्याह--

मूलम्—जं वीरजिणस्स जिओ मरियभवुस्सुत्तलेसदेसणओ ।
सागरकोडाकोडी हिंडइ अइभीमभवगहणे ॥ १२२ ॥

व्याख्या—यद्वीरजिनस्य जीवो यस्मात्कारणान्महावीरस्वामिन आत्मा मरीचिभवे भरतपुत्रत्वे उत्सूत्रलेशदेशनतः 'कविला इत्थंपी इहयंपी'ति वचनकथनतः सागरकोटाकोटिं सागरोपमकोटाकोटिं हिंडति भ्राम्यति वर्त्तमाननिर्देशस्तत्कालापेक्षयाऽवसेयः ।क्व हिंडतीत्याह-अतिभीमभवगहनेऽतिशयेन भयानके संसारकान्तारे इदमत्र तात्पर्यं-श्रीचरमजिनजीवो मरीचिभवे श्रीऋषभनाथपार्श्वे प्रतिपन्नसंयमः पठितैकादशाङ्गश्रुतो भगवता सह विहरन् ग्रीष्मे उष्णपरिषहजितः स्वमतिविकल्पितं त्रिदण्डछत्रोपानत्कषायवस्त्रादिलिङ्गं परिव्राज्यं प्रतिपद्य पुनर्भगवतैव सह विहरन् धर्मकथया च प्रतिबोध्यान् प्रतिबोध्य भगवत्पार्श्वे प्रेषयन् स्वासामर्थ्यं च संयमे प्रकटयन् प्रभूतं कालं निनाय । अन्यदा भगवति सिद्धे साधुभिः सह तथैव विहरन् ग्लानो जातोऽसंयत इति तैर्न प्रतिचरितः । ततश्च कपिलं भगवद्धर्ममश्रद्दधानं स्वपरिचर्या-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चितमालोच्य तव पार्श्वेऽपि किं कोऽपि धर्मोऽस्तीति पुनः पुनः पृच्छतस्तस्याग्रे कपिल ! मुख्यतोऽत्र साधुपार्श्वे एव धर्मः स्वल्पस्तु इह मत्पार्श्वेऽप्यस्तीत्याचख्यौ । तेन वचसा सागरकोटाकोटिमानः संसारः समजनि । तदुक्तम्—दुब्भासिएण इक्केण--मरीइ दुक्खसागरं पत्तो । भमिओ कोडाकोडिं सागरसरिनामधिज्जाणं ॥ ३३७ ॥ 'तम्मूलं संसारो नीया गोयं च कासियवयमीत्यादि' । ततश्च यदि भगवतो जिनस्यापि जीव ईषदुत्सूत्रादेवं भवकान्तारे भ्रान्तस्तत्किमन्येषां पण्डितमानिनां वाच्यमिति गाथार्थः ॥ १२२ ॥ अथ पूर्वोक्तमेवार्थं निगमयितुं गाथाद्वयमाह—

मूलम्—ता जे इमंपि वयणं वारंवारं सुणित्तु समयम्मि ।
दोसेण अवगणित्ता उस्सुत्तपयाइं सेवंति ॥ १२३ ॥
ताण कहं जिणधम्मो कह नाणं कह दुहाण वेरग्गं ।
कूडाभिमाणपंडिय नडिया नरयम्मि बुड्डंति ॥ १२४ ॥

व्याख्या—' ता ' ततो ये पुरुषा इदं प्रत्यक्षोपलभ्यमानं यद्वीरजिनस्य जीव उत्सूत्रलवभणनाद् भवं भ्रान्त इतीदृशं अपि शब्द उत्तरत्र योक्ष्यते । वारंवारं भूयो भूयः श्रुत्वाऽपि समाकर्ण्यापि समये सिद्धान्ते आवश्यकनिर्युक्त्यादौ दोषेणाभिनिवेशलक्षणेन द्वेषेण वा सामाचार्यन्तरादिविषयेण अवगणय्यावज्ञाय उत्सूत्रपदानि सेवन्ते करणद्वारेण

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जल्पनोपलक्षणमेतदितिगाथार्थः॥ १२३॥तेषामुत्सूत्रसेवकाणां कथमित्याक्षेपे जिनधर्मः, कथं ज्ञानं सद्बोधः,कथं दुःखानां वैराग्यं दुःखेभ्य उद्विजनं अपि तु न कथञ्चिदित्यर्थः।यथा च तेषां जिनधर्मो न भवति ज्ञानं न भवति,दुःखवैराग्यं च न भवति, तथा प्रागपि 'जिणआणाए धम्मो'इत्यादिभिर्गाथाभिः प्रतिपादितमेव ।तर्हि किं भवतीत्याह–कूटाभिमानपाण्डित्यनटिताः कूटो मिथ्याभिमानो विद्याहंकारो यत्र तत्कूटाभिमानं तच्च तत्पाण्डित्यं च पण्डितशब्दोऽत्र भावप्रधानत्वान्निर्देशस्येति भावप्रत्ययान्तो व्याख्येयः । तेन कूटाभिमानपाण्डित्येन नटिना विडम्बिता ब्रुडन्ति मज्जन्ति नरके स्वभ्रे इति गम्यम् । तस्मादुत्सूत्रं न वाच्यमित्युपदेशरहस्यमिति गाथार्थः ॥ १२४ ॥ एवं प्रागुपदिश्य पुनर्गुरुकर्मत्वादिना अयोग्यान् विज्ञायोत्सूत्रभाषकानथ तेषामुपदेशदानमपि निषेधयन्नाह–

मूलम्—मा मा जंपइ बहुयं जे बद्धा चिक्कणेहिं कम्मेहिं ।
सव्वेसिं तेसिं जायइ इहि उवएसो महादोसो ॥ १२५ ॥

व्याख्या--मा मेति निषेधे,जल्पत वदत बहुकं प्रभूतं हितोपदेशादिकं कुतो यतः--"ये केचित्पुरुषा बद्धा निगडिता चिक्कणैर्निबिडैः कर्मभिर्ज्ञानावरणीयादिभिः सर्वेषां तेषां प्राणिनां जायते भवति, किं तदित्याह--हितोपदेशो मोक्षमार्गोपदेशो महादोषो महाद्वेषो वा दोषस्तु-आमेघवडे निहित्तं जहा जलं तं घडं विणासेइ । इय सिद्धंतरहस्सं अप्पाहारंविणासेइ ॥३३८॥ इत्यादिकः दर्पान्मामप्ययमेवामनुशास्तीत्यादिरूपो द्वेषो वा । ततश्च यस्मान्निबि



For Private and Personal Use Only

डकर्मणां हितोपदेशो महादोषो द्वेषो वा जायते तस्मात्तान् प्रति मा बहु बहु जल्पतेति गाथार्थः ॥१२५॥ कुतो हितोपदेशो महादोषो जायते कुतश्च मा बहुकं जल्पतेत्यत आह—

मूलम्—हिययम्मि ये कुसुद्धा ते किं बुज्झंति सुद्धवयणेहिं ।
ता नाणकए गुणिणो निरत्थयं दमहि अप्पाणं ॥ १२६ ॥

व्याख्या-हृदये मनसि ये कुशुद्धा अभिनिवेशादिदोषकलङ्कपङ्ककलुषिताः, ते किमित्याक्षेपे बुद्ध्यन्ते शुद्धवचनैर्निर्दोषागमवाक्यैः अपि तु न बुद्ध्यन्ते । यतः-"स्वं दोषं समवाप्य नेक्षति यदा सूर्योदये कौशिको,राद्धिं कांकुटको न याति च यथा तुल्येऽपि पाके कृते ।तद्वत्सर्वपदार्थभावनकरं सम्प्राप्य जैनं मतं,बोधं पापधियो न यान्ति कुजनास्तुल्ये कथासम्भवे ॥ ३३९ ॥ ' ता ' इति तस्मात्तेषामशुद्धहृदयानां कृते गुणिनो ज्ञानादिगुणवन्तो निरर्थकं निष्प्रयोजनं दमयन्ति तत्प्रतिबोधोद्यमेन खेदयन्ति आत्मानं स्वं । गुणिनो हि परप्रतिबोधाय परोपकारैकरसिकतया स्वात्मानं क्लेशयन्त्यपि तेनेदमुच्यते यत्तेषां कृते निरर्थकमात्मानं दमयन्तीति गाथार्थः ॥ १२६ ॥
एवमुपदेशानर्हान्निराकृत्याथोपदेश्यान् प्रति लेशेनाराद्धस्यापि जिनधर्मस्य फलमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—दूरे करणं दूरे पसाहणं तह पभावणा दूरे ।
जिणधम्मसद्दहाणं पि तिक्खदुक्खाइं निठवइ ॥१२७॥

व्याख्या–दूरे विप्रकृष्टं करणं विधानं विधिना दान–शील–तपो–भावरूपस्य जिनधर्मस्येति वर्त्तते, दूरापास्तमिति यावत्, तथा प्रसाधनं सम्यग्वाग्योगेन तस्यैव यथातथकथनं दूरे, तथा प्रभावना–" पावयणी धम्मकही वाई, नेमित्तिओ तवस्सी य । विज्जासिद्धो य कई अट्ठेव पभावगा भणिया ॥ ३४० ॥ इत्येवंविधप्रभावकनिर्मापणोचिताजिनशासनमहिमा दूरे, किं तर्हि जिनधर्मश्रद्धानमपि भगवद्धर्म्मस्य श्रुतचारित्ररूपस्य रोचनमपि तीक्ष्णदुःखानि दारुणाशर्माणि निष्ठापयति अन्तं नयति । इलापुत्रवत् तदुदाहरणं चेदम्, यथा–" यत्र गोरससन्तुष्टा ग्रामीणाः पण्डिता इव । विभान्ति सोऽभवद्भूमौ ग्रामः कोऽपि समृद्धिमान् ॥ १ ॥ भद्रकप्रकृतिः कोऽपि विप्रो विद्याविशारदः । तत्रासीत्तस्य जज्ञे च सुसाधुजनसङ्गमः ॥ २ ॥ स च साधूपदेशेन लघुकर्मत्वतः सुधीः । सपत्नीकः परिव्रज्या--माददे भवभीरुकः ॥३॥ चारित्रमतिचारेण वर्जितं पालयत्यसौ । ज्ञाततत्त्वोऽथवा धीमान् कः स्वकार्ये विमुह्यति ॥४॥ पतिपत्न्योः परं प्रीति–र्मानसी न तथाऽप्यगात् । धौतोऽपि कृमिरागः किं निजरागं परित्यजेत् ॥५॥ पालयन्त्यपि चारित्रं-तत्पत्नी विदधे पुनः । विचिकित्सां द्विजातित्वा -त्साध्वीनां शमताजुषाम् ॥६॥ पूरयित्वा ततः स्वायु--स्तावुभावपि जग्मतुः । देवलोकं सुखं तत्र बुभुजाते चिरं घनम् ॥७॥ इतश्च भरतेऽत्रैव जिनवेश्मविराजितम् । रजत--स्वर्णमाणिक्य--



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुञ्जपूर्णं चतुष्पथम् ॥ ८ ॥ रथाश्वगजपत्तीनां बहुत्वादन्यभूभुजाम् । अगम्यं मनसाऽप्यासी--दिलावर्द्धनपत्तनम् ॥९॥ युग्मम् ॥ इलानाम्ना प्रसिद्धाऽस्ति देवता तत्र पत्तने । तस्योपयाचिता लोके नानाप्रत्ययपूरिका ॥ १० ॥ तत्रैव श्रेष्ठिनी काचित् पुष्पाद्यैः प्रतिवासरम् । पुत्रार्थिनी करोत्यस्याः पूजां विविधभक्तिभाक् ॥ ११ ॥ स च द्विजामरः स्वर्गा--च्च्युत्वा स्वायुःक्षयादनु । तस्याः कुक्षौ समुत्पेदे श्रेष्ठिन्याः शेषपुण्यतः ॥ १२ ॥ पूर्णे काले प्रसूता सा श्रेष्ठिनी तं सुतोत्तमं । अमन्दानन्दसन्दर्भ--मिव भाग्यसमुन्नतिः ॥ १३ ॥ हृष्टैः पित्रादिभिस्तस्य महोत्सवपुरःसरम् । चक्रे इलापुत्र इति नाम सर्वजनप्रियम् ॥ १४ ॥ साध्वीनां विचिकित्सावान् सुरलोकान् ततश्च्युतः । स्त्रीजीवः सः ततो जज्ञे लंखस्यैकस्य पुत्रिका ॥ १५ ॥ इलापुत्रः कलाः सर्वाः शिक्षयन् प्राप यौवनम् । मनोभवार्थे यत्र स्या--न्मनोबद्धस्पृहं नृणाम् ॥ १६ ॥ नटपेटकमन्येद्यु--स्तत्तत्रैवागतं भ्रमत् । यन्मध्ये लंखपुत्री सा सुरूपा प्राप्तयौवना ॥ १७ ॥ नृत्यन्तीं तामथैक्षिष्ट प्राग्भवप्राणवल्लभाम् । नटपेटकमध्यस्थां रूपेण रतिजित्वरीम् ॥ १८ ॥ तस्य पूर्वभवप्रेम्णा तस्यां रागो दृढोऽभवत् । पूर्वानुभूते रज्यन्ति प्रायः प्राणभृतो भवे ॥ १९ ॥ स तेभ्यो मार्गयत्तां ते तस्मै नैव ददुर्नटाः । सुवर्णधनमाणिक्य--कोटीभिरपि याचिताम् ॥ २० ॥ तद्वयस्यैः प्रार्थ्यमानास्तां नटास्ते मुहुर्मुहुः । ददिरे निजपुत्रीं नो किन्तु तानित्यमूचिरे ॥ २१ ॥ नैनामस्मै वयं दद्मो धनानामपि कोटिभिः । जङ्गमो निधिरस्माक-मक्षयः कन्यकाह्यसौ ॥ २२ ॥ परं यदि भवे देषोऽस्माकं सहचरः स्वयम् । शिक्षतेऽस्मत्कलां सर्वां वंशारोहणमूलिकाम् ॥२३॥ लभते तद्भावेनां प्रभूतैरपि नो धनैः । किं वा कामदुघां कोऽपि विक्रीणाति गृहस्थिताम् ॥ २४ ॥ स्वर्णरूप्याद्यलिप्सूनां लंखा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नामिति भाषितम् । श्रुत्वा तत्सहचारित्व-मिलापुत्रः प्रपन्नवान् ॥ २५ ॥ स तस्याश्चानुरागेण मुक्त्वा निजकुटुम्बकम् । जात्याद्यगणयन् काम-विवशस्तैः सहामिलत् ॥ २६ ॥ शिक्षितश्च कलास्तेषां वंशरोहादिकाः क्रमात् । किमकृत्यं न कुर्वन्ति जीवाः कामकदर्थिताः ॥ २७ ॥ विवाहार्थमथोद्युम्न-मर्जयेत्युदितः स तैः । विवाहार्थं-धनस्यार्थे स ययौ वेतनातटम् ॥ २८ ॥ तत्र प्रेक्षणकं कर्त्तुं ययाचेऽवसरं नृपम् । कौतुकार्थी ददौ सोऽपि तस्मै प्रेक्षणकक्षणम् ॥ २९ ॥ सान्तः पुरपरीवार-स्तत्र भूमीपतिः स्वयम् । पौराश्चानेकशोऽभ्येत्यो-पाविशन् विस्मिताननाः ॥ २९ ॥ तत्र चैको महान्वंशो बद्धो रज्जुभिरायतः । ऊर्ध्वीकृतो रङ्गभूमा-विलापुत्रेण धीमता ॥ ३० ॥ न्यस्तं च फलकं तस्य वंशस्योपरि निश्चलम् । तत्र द्वौ द्वौ लोहकीलौ विन्यस्तौ फलकान्तयोः ॥ ३१ ॥ धनलिप्सुरिलापुत्रो लाघवादारुरोह तम् । क्षपकः क्षपकश्रेणि-मिव मोक्षाभिलाषुकः ॥ ३२ ॥ ननर्त्तारुह्यवंशाग्रे स च क्रीडाकलापिवत् । उन्मुखानां महाश्चर्यं सभ्यानां जनयत्ततः ॥ ३३ ॥ अधस्ताल्लङ्खपुत्री सा गायकीवृन्दसंयुता । गीतं श्रुतिसुधावर्षमकर्षतुलितं जगौ ॥ ३४ ॥ येन गीतेन भूमीश-प्रमुखो निखिलो जनः । आक्षिप्तचित्तः समभूत् कुरङ्ग इव रङ्गगः ॥ ३५ ॥ स खेटकं स्फुरत्यङ्गं स्फोटयन् पाणिनाभितः । उत्प्लुत्योत्प्लुत्य करणं ददानो कपिवद्दिवि ॥ ३६ ॥ सच्छिद्रे पादुके पद्भ्यां बिभ्राणो भ्रान्तमानसः । सप्तसप्तपुरः पश्चान्मुखानि करणान्यथ ॥ ३८ ॥ दत्वा दत्वा निरालम्बः प्रवेशयति पादुके । फलकप्रान्तकीलेशो शीलेष्विव मनो मुनिः॥३९॥ त्रिभिर्विशेषकम्॥एवमत्यद्भुतं तस्य नटस्य प्रेक्ष्य नाटकम् । सर्वस्वदानधीः सर्वो जनोऽवादीदिदं वचः ॥ ४० ॥ यदि दत्ते महीपालः प्राग्नटाय



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथोचितम् । दानं तदा परे लोका अपि दद्युः कुलोचितम् ॥ ४१ ॥ राजा चेप्सुर्लङ्खपुत्रीमीहमानश्च तन्मृतिम् । बभाण न मया सम्यग् ददृशे कौतुकं ह्यदः ॥ ४२ ॥ तद्भूयोऽप्येवमेव त्वं करणानि कुरुष्व भोः । धनाशया स तच्चक्रे यदाशा बलशालिनी ॥ ४३ ॥ स तेनैवं महीपालः पुनः पुनरचीकरत् । करणानि समाप्तेषु पूर्वपूर्वेषु लम्पटः ॥४४॥ तेनापि बुबुधे भावो भूपतेर्यदसौ खलु । नट्यां रक्तो मे न दत्ते मद्विनाशं प्रवाञ्छति ॥४५॥ वंशाग्रस्थित एवात्रा–वसरे खिन्नमानसः।त्यक्तदम्भं निरारंभं निजगात्रेऽपि निःस्पृहम्॥४६॥आसन्नश्रेष्ठिनो गेहे महात्मानं महोज्ज्वलम्।शुद्धभैक्ष्यार्थमायात–मद्राक्षीदेकया दृशा॥४७॥युग्मम्॥युवती पार्वतीरूपा मुनीन्द्रप्रतिलाभने । तत्परा तं च भक्तैक-दत्तदृष्टिं विलोक्य च॥४८॥अचिन्तयदिलापुत्रो धन्या निर्विषया अमी । ये तृणस्त्रैणयोस्तुल्य-दृशो भवविरागिणः॥४९॥ समा राजनि रङ्के च निःस्पृहत्वेन सर्वतः। जिनोक्तमार्गकरणा–दपराधीनवृत्तयः॥५०॥ अहं पुनरधन्यात्मा विषयव्याकुलीकृतः। परायत्तोऽभवं प्रेष्यवत्स्वकीयेन कर्मणा ॥ ५१ ॥ धिग्मां कुलकलङ्कैक–हेतुं दुर्व्यसनार्दितम् । अत्रामुत्र च दुःखैक–भाजनं निर्विवेकिनम् ॥ ५२ ॥ महामोहतमस्तोमा–च्छादितज्ञानचक्षुषा । असन्मार्गो मयाऽश्रायि हि सर्वाशिवकारणम् ॥ ५३ ॥ दृष्ट्वा दृष्ट्वा महात्मानं श्रद्धानातिशयादसौ । तत्रैव केवलं प्राप भवनैर्गुण्यभावनात् ॥ ५४ ॥ लङ्खपुत्र्यपि दुर्ध्यानं विज्ञाय पृथिवीपतेः । धिगनङ्ग ! जगद्येन विनांगोऽपि विगोपितम् ॥ ५५ ॥ ध्यायन्तीति शुभध्यानं लेभे केवलमुज्ज्वलम् । किं किं वा दुष्करं शुद्ध–श्रद्धानविमलात्मनाम् ॥ ५६ ॥ तथैव पट्टराज्ञ्याऽऽप–वैराग्याद् बोधमुत्तमम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं वा चन्दनसंसर्गा-दन्येऽपि स्युर्न चन्दनाः ॥५७॥ स्वापवादं जनाच्छ्रुत्वा ध्यात्वा दुश्चिन्तितं निजं । राजाऽपि केवलज्ञानं प्राप वैराग्यसङ्गतः ॥ ५८ ॥ साधुलिङ्गं ददुस्तेषां चतुर्णां व्यन्तरामराः । समागत्य स्वर्णपद्मं वंशं च विदधुस्तदा ॥ ५९ ॥ तत्रासीन इलापुत्रो धर्ममाख्यज्जिनोदितम् । प्रतिबुद्धाश्च बहवः पार्षद्या धर्ममाददुः ॥ ६० ॥ श्रीमानिलापुत्र इहोपलेभे, श्रद्धानमात्रादपि सिद्धिसौख्यम् । तथा कुशीलोऽपि ततः कुरुध्वं, श्रद्धानमेकं जिनभाषितेषु ॥६१॥अयं भावो जिनधर्मस्य करणादिदूरेऽस्तु श्रद्धानमपि सर्वदुःखान्तकरं भवति।तदुक्तं श्रीउत्तराध्ययने अध्य०२९, 'धम्मसद्धाए णं भंते ! जीवे किं जणयइ? गोयमा ! धम्मसद्धाए णं सायासुक्खेसु रज्जमाणे विरज्जइ । अगारधम्मं च णं चयइ । अणगारिएणं जीवे सारीरमाणसाणं दुक्खाणंछेयणभेयणसंजोगाईणं वोच्छेयं करेइ,अव्वाबाहं च णं सुहं निवत्तेइ' [ व्याख्या--धर्मश्रद्धया सातं सातवेदनीयं तज्जनितानि सौख्यानि विषयसुखानीत्यर्थः । तेषु रज्यमानः पूर्वं रागं कुर्वन् विरज्यते विरागं याति, अगारधर्मं च गृहाचारं गार्हस्थ्यमित्यर्थस्त्यजति जहाति ततश्चानगारी यतिः सन् जीवः शारीरमानसानां दुःखानां 'छेअणेत्यादि' छेदनं-खड्गादिना भेदनं द्विधाकरणं:कुन्तादिना विदारणं आदिशब्दस्येहापि सम्बन्धाच्छेदनभेदनादीनां शारीरदुःखानां संयोगः प्रस्तावादऽनिष्टसम्बन्धः, आदिशब्दादिष्टवियोगादिग्रहस्ततोऽनिष्टसंयोगादीनां च मानसदुःखानां व्यवच्छेदं करोति अत एव अव्याबाधं च सुखं निर्वर्तयति जनयति ३ ] इत्यतस्तदाराधने प्रवर्त्तनीयमेवेति गाथार्थः ॥ १२७ ॥ श्रद्धानं च शुश्रूषालिङ्गकं भवतीत्यतस्तामेव स्वशुश्रूषाद्वारोद्भावयन्नाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्—कइया होहि दिवसो जइयाहं सुगुरुपायमूलम्मि ।
उस्सुत्तलेस विसलव–रहिओ निसुणेमि जिणधम्मं ॥ १२८ ॥

व्याख्या--कदा कस्मिन् काले भविष्यति स इति गम्यं दिवसो दिनं प्रहरमुहूर्त्तपक्षमासवर्षोपलक्षणं । यदा यस्मिन् काले दिवसादौ सुगुरुपादमूले सुविहितगीतार्थधर्माचार्यचरणसमीपे स्थित इति दृश्यम् । जिनधर्मं निश्रृणोमि वर्त्तमान-सामीप्ये वर्त्तमानवद्वेति वचनादर्हद्धर्मं निश्चितः श्रोष्यामि । किंविशिष्टः सन् उत्सूत्रलेशविषलवरहितः कोऽर्थः पूर्वोक्त-र्णितोत्सूत्रलेशेऽप्यनास्थापरतया विषलवप्रायेणोत्सूत्रेण विना कृतो निरभिनिवेश इति यावत् । अभिनिविष्टो हि युक्त-मप्युच्यमानमाग्रहादयुक्तमिति मन्यते । तदितरस्तु युक्तियुक्तमेव मन्यते । यतः-आग्रही बत निनीषति युक्तिं, तत्र यत्र मतिरस्यनिविष्टा । पक्षपातरहितस्य तु युक्तिर्यत्र तत्र मतिरेति निवेशम् ॥ ३४१ ॥ ततश्च श्रद्धा-वता सुगुरुपादमूले निरभिनिवशेन श्रोतव्यमिति गाथार्थः ॥ १२८ ॥ ननु कदाहं सुगुरुपादमूले श्रोष्यामीति किम-र्थमुक्तम्, एवं वचनं तु गुरोर्दुर्लभतायां युक्तं सम्प्रत्यपि मलमलिनगात्रा एषणीयाहारग्राहिणो यावद्बहवोऽपि दृश्यन्त एव तत्र धर्मोपदेष्टारो गुरव इत्याशंक्याह—

मूलम्—दिठा वि केवि गुरुणो हियए न रमंति मुणियतत्ताणं ।
केवि पुण अदिठच्चिय रमंति जिणवल्लहो जेम ॥ १२९ ॥

For Private and Personal Use Only

व्याख्या -दृष्टा अवलोकिता अपि आस्तां श्रुताः केऽपि गुरवः साधुसामाचारीनिपुणाः केचिदाचार्या न तु सर्वेऽपि कस्यचिद्गुणप्रधानस्य सत्त्वात् । तत्राप्यनास्थायां तत्त्वचिंताभावः हृदये चेतसि न रमन्ते, मुणिततत्त्वानां ज्ञातपरमार्थानां । ज्ञाततत्त्वास्तु जानंति यन्नैकाकि ज्ञानं सुगुरुताहेतुर्नैकाकिनी क्रिया च किन्तु ज्ञानक्रिये द्वे अपि संवेगयुते सुगुरुताकारणं भवतः । ततस्तेषां चेतसि त एव रमंते ये संवेगज्ञानक्रियासहिता भवेयुः । दृश्यमानेषु च क्वचित्संवेगाभावः क्वचित्क्रियाभावः क्वचिद्गुरुताभावः ये चैकतमेनापि विकलास्ते ज्ञाततत्त्वानां हृदि न सन्तोषपोषं दधति । केऽपि पुनरदृष्टा एवानवलोकिता एव । तच्चरिताकर्णनेन तत्कृतग्रन्थदर्शनेन च तत्त्वज्ञानां हृदये रमन्ते । क इव जिनवल्लभो यथा एतद्ग्रन्थकर्त्ता हि श्रीनेमिचन्द्रश्रावकः श्रीजिनवल्लभसूरिभ्यः प्रभूते काले व्यतीते जातस्ततस्तच्चरितश्रवणात्तत्कृतसंवेगजनकद्वादशकुलकादिग्रन्थेभ्यश्चैत्यवासाद्यविधिमार्गनिर्लोठनतस्तत्परम्परायातसाधुसामाचार्याः श्रुताविसंवादित्वाच्च तान् ज्ञानक्रियासंवेगयुतान् सुगुरून् विनिश्चित्य तद्गुणाकृष्टचेतास्तद्भक्तिसारघनसारवासितान्तःकरण इदमाह श्रीजिनवल्लभ इवादृष्टा अपि केऽपि परमार्थवेदिनां हृदि रमन्त एव । तस्माद् ये गुरवो जिनवल्लभसदृशास्तेषां पार्श्वे एव श्रोतव्यमिति गाथार्थः ॥ २९ ॥ एवं सत्यपि ये कुगुरूनपि सुगुरूनिव मन्यन्ते तान्निराकुर्वन्नाह—

मूलम्—अजया अइपाविट्ठा सुद्धगुरूजिणवरिंदतुल्लत्ति ।
जो एवं इह मण्णइ सो विमुहो सव्वधम्मस्स ॥ १३० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—अयता यतनारहिताः षड्जीवनिकायवधनिरपेक्षा इति यावत् । अत एवातिपापिष्ठाः पापकर्मबन्धप्रधानाः । अयतानां च पापिष्ठत्वं प्रतीतमेव, यदार्षं, " अजयं चरमाणो य पाणभूयाइ हिंसइ । बंधइ पावयं कम्मं तं से होइ कडुयं फलं ॥ १४२ ॥ इत्यादि ये भवन्तीति गम्यते । तेऽपि शुद्धगुरवो गौतमादिकल्पा अथवा किं बहुना ! जिनवरेन्द्रतुल्याः सर्वज्ञसमाः ' पडिरूवो तेयस्सी ' त्यादि वचनभणनात् । इत्येवं पूर्वोक्तप्रकारेण अयता अपि जिनवरेन्द्रतुल्याः इति यः कोऽप्यविवेकपटललुप्तदृग्बल इह जगति मन्यते जानाति, स तादृशो विमुखः पराङ्मुखः सद्धर्मस्य श्रुतचारित्ररूपस्य । यतः—किइकम्मं च पसंसा सुहसीलजणम्मि कम्मबंधा य । जे जे पमायठाणा ते ते उववूहिया हुंति ॥ ३४३ ॥ अतः कर्मबन्धनात्प्रमादस्थानोपबृंहणाच्च धर्मं कुर्वाणोऽपि धर्मविमुख इति सूक्तमिति गाथार्थः ॥ १३० ॥ धर्मं विदधतोऽपि कथं धर्मविमुखत्वमित्याशङ्कायामुपदेश्यमुद्दिश्याह—

मूलम्—जो तं वंदसि पुज्जसि वयणं होलेसि तस्स राएण ।

ता कह वंदसि पुज्जसि जणवायठिइं पि न मुणेसि ॥ १३१ ॥

व्याख्या—य इति व्यत्ययोऽप्यासामिति वचनाद् द्वितीयार्थे प्रथमा ततोऽयं श्रीजिनं त्वं च वन्दसे स्तौषि अभिवादयसि वा पूजयसि पुष्पादिभिरर्चयसि रागेण प्रस्तावात्स्वगुरुप्ररूपितोत्सूत्रादिदृष्टिरागेण।तस्य वन्दनीयस्य एव च शब्दयोरध्याहारात्तस्यैव च वचनमागमरूपं हीलयसि निंदसि तदुक्तानासेवनेनावमन्यसे । ' ता ' तर्हि कथं यत्तदोर्नि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्याभिसम्बन्धात्तं वन्दसे पूजयसि वा त्वमिति योज्यं । कुत एवमित्याह—किमित्याक्षेपार्थो गम्यते किं जनवाद-स्थितिमपि लोकोक्तिव्यवहारमपि न मुणेसित्ति न जानासि । अयं भावः ननु त्वं यस्य वन्दनादि करोषि तस्य वचनं न मन्यसे तर्हि वृथा तस्य वंदनादि किं कुरुषे किं लोकस्थितिमपि न जानासीति गाथार्थः ॥ १३१ ॥ ननु का सेत्यत आह—

मूलम्—लोए वि इमं सुणियं जो आराहिज्ज तं न कोविज्जा ।
मन्नेज्ज तस्स वयणं जइ इच्छसि इच्छियं काउं ॥ ३२ ॥

व्याख्या- लोकेऽपि प्राकृतजनेऽपि इदमिति वक्ष्यमाणं श्रुतमाकर्णितमास्तां लोकोत्तरे । किमित्याह—यं देवदानव-विद्याधरराजादिकमाराधयेत् सेवेत तं न कोपयेन्न क्रोधसहितं कुर्यात् । किं तर्हि मानयेदङ्गीकुर्यात् तस्येत्याराध्यस्य वचनमाज्ञारूपं । यदि चेदिच्छसि ईप्सितं कर्तुं स्वहितमनुष्ठानं इत्येवंविधा लोकस्थितिरप्यस्ति ।य स्तुतामपि जानाति स यं वन्दते पूजयति वा तद्वचनं नावमन्यते ततो लोकोत्तरस्थितिज्ञो जिनं वन्दमानः पूजयन् वा तद्वचनं कथमवमन्यते । अपि तु न कथमपि, तदवमानेन हि अनर्थपरम्परा स्यादिति । ' इयराणठक्कुराणवी ' त्यादि गाथाभिरसकृतप्रत्यपादीति गाथार्थ ॥ १३२ ॥ एवं भगवद्वचनाकरणे धर्मं कुर्वतोऽपि दोषमभिधायाथ तत्र निश्चलान् स्तुवन्नाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्—दूसमदंडे लोए सुदुक्खसिद्धंमि दुक्खउदयम्मि ।
धन्नाण जाण न चलइ सम्मत्तं ताण पणमामि ॥ १३३ ॥

व्याख्या–दुष्षमैव पञ्चमारक एव दण्डयति असारी करोति बलमेधासुखसम्पत्तिविद्यायुरारोग्यसौस्थ्याद्यपहारेण लोकमिति । दुष्षमा दण्डस्तस्मिल्लोके साम्प्रतकालभाविनि जने अत एव सुदुःखसिद्धे तीक्ष्णकृच्छ्रनिष्पन्ने । पुनः किं-विशिष्टे लोके दोषे दुःखोदये दुःखानां परापरकष्टानां मानसिकवाचिककायिकानामुदयो यत्र तस्मिन्, एवंविधेऽपि लोके धन्यानां पुण्यवतां येषां जिनवचनभावितमतीनां सम्यक्त्वं तत्त्वश्रद्धानलक्षणं न चलति न क्षुभ्यति । अस्मिन् काले हि तत्त्वश्रद्धानस्य दुर्लभत्वात्, यदुक्तं संघपट्टके काव्य ३०–" सैषा हुण्डावसर्पिण्यनुसमयहसद्भव्यभावा-नुभावा, त्रिंशश्चोग्रग्रहोऽयं खखनखमितिवर्षस्थितिर्भस्मराशिः । अंत्यं चाश्चर्यमेतज्जिनमहतये तत्स-मा दुःषमा चेत्येवं पुष्टेषु दुष्टेष्वनुकूलमधुना दुर्लभो जैनमार्गः ॥३४५॥ ततस्तानचलितसम्यक्त्वान् प्रणमामि नमस्करोमीति गाथार्थः ॥ १३३ ॥ ननु प्राग् 'दिट्ठा वि केवि गुरुणो' इत्यादिगाथयैवमभ्यधायि त्वया केऽपि गुरवो दृष्टा अपि विवेकिनां हृदि न रमन्तेऽन्ये पुनरदृष्टा अपि रमन्ते । तत्सत्यं परं भवन्तं पृच्छामो भवता गुरु दृष्टो वा नेति प्रश्ने सति गाथाद्वयमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—नियमइ अणुसारेणं ववहारनएणं समयनीईए ।
कालक्खित्तणुमाणेण परिक्खिओ जाणिओ सुगुरू ॥ ३४ ॥
तह वि हु नियजडयाए कम्मगुरूत्तस्स नेव वीससिमो ।
धम्नाण कयत्थाणं सुद्धगुरू मिलइ पुन्नेहिं ॥ ३५ ॥
अहयं पुणो अहन्नो ता जइपत्तो य अह न पत्तोय ।
तह वि मह हुज्ज सरणं संपइ जो जुगपहाण गुरू ॥ ३६ ॥

व्याख्या--निजमत्यनुसारेण स्वस्वाभाविकबुद्ध्यनुसारेण नतु कदवलेपकलङ्कितया धिया तथा व्यवहारनयेन--"आलएण विहारेणं ठाणा चंकमणेण य ।सक्का सुविहिओ नाउं भासावेणइएण य॥३४६॥"इत्यादिरूपेण निश्चयतस्तु परबुद्धेरप्रत्यक्षत्वेनानतिशयिनां ज्ञातुमशक्यत्वात् । तथा समयबुद्ध्या"सव्वजिणाणं जम्हा बउसकुसीलेहिं वट्टए तित्थमित्यादि' श्रुतश्रवणोत्पन्नया बुद्ध्या तथा काल क्षेत्रानुमानेन अत्र कालोऽयं दुष्षमालक्षणस्तेनात्र वज्रर्षभनाराचसंहननिनामिव सेवार्त्तसंहननिनः संयमं पालयितुं न शक्तास्ततो " जायम्मि देहसदेहयंमि जयणाए किंचि सेविज्जे" त्याद्यागममालम्ब्य कालोचितमाचरन्ति ततस्तेन कालानुमानेन एवं । क्षेत्रानुमानेन यथा ता भासरासिगहविहुरिए



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वि तह दक्खिणे इहं विखत्ते। अत्थिच्चिय जा तित्थं विरलतरा केइ मुणिपवरा ॥३४६॥ तेयबलकालदेसाणुसारिपालियविहारपरिहारा । इसिसदोसत्ते वि हु भत्ती बहुमाणमरिहंती ॥ ३४७ ॥ त्यादिकेन, एवं द्रव्यभावानुमानेनेत्युपलक्षणत्वात् ज्ञेयं । सुगुरुधर्माचार्यः परीक्षितः शुभाशुभपर्यालोचनया विचारितः तथा ज्ञातोऽवगतः । अयं भावः—नेमिचन्द्रभाण्डागारिको हि समुत्पन्नविवेकः सञ्जातशुद्धपरिणामो जिनधर्मं मोक्षहेतुर्निर्णीय तं च साम्प्रतकालभाविपरस्परसमत्सरसाधुभिरन्यथा प्रोच्यमानमाकर्ण्य तत्त्वजिज्ञासया प्राक् सुगुरूनन्वीक्षमाणः क्षोणिमण्डले नानानगरग्रामपुरपत्तनस्थान् साधूनवलोक्य यावत् ।श्रीजिनपतिसूरीन् कालोचितसकलाचार्यगुणसम्पन्नान् प्राप । ततश्च तान् सुगुरून् प्रतिपद्य शुद्धं धर्ममङ्गीचकार । तेनेदमुक्तं निजमत्यनुसारेण व्यवहारनयेन समयबुद्ध्या कालाद्यनुमानेन च परीक्षितो ज्ञातश्च सुगुरुरिति गाथार्थः ॥ १३४ ॥ यद्यपि एवमस्ति तथापि दुर्निश्चये निजजडतायाः स्वमूर्खत्वस्य कर्म्मगुरुत्वस्य च चकारोऽत्र समुच्चयार्थोऽध्याहार्यो नैव विश्वसिमि विश्वासं करोमि । जडता च कालादिदोषात्तथाविधप्रज्ञावैकल्याद्विशेषश्रुतानधिकारित्वेन तदश्रवणाच्च । कर्मगुरुता चेयत्कालं सुगुर्वनाप्तेः । अतः प्राप्तेऽपि गुरौ न विश्वासः । कुत एवमित्याह—धन्यानां पुण्यवतां कृतार्थानां निर्वर्त्तितबोधिबीजलक्षणार्थानां शुद्धगुरुर्मिलति पुण्यैः पूर्वोपार्जितशुभैः, नहि निष्पुण्यानां शुभगुरुयोगो भवतीति गाथार्थः ॥१३५॥ ननु तर्हि तव किमित्याह-अहं पुनरधन्यस्तादृशविशिष्टपुण्यरहितो येन मम प्राक् सद्गुरुसंयोगो नाजनिष्ट ततोऽहं जातेऽपि सुगुरुयोगे स्वमनसि शंके इति भावः । ‘ ता ’ तस्माद्यदि प्राप्तो लब्धश्चः पादपूरणेऽथ न प्राप्तश्चाथवा न लब्धः । तत्रापि मम भवतु आस्तां शरणं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्राणं स इति दृश्यं, सम्प्रति वर्त्तमानकाले यो युगप्रधानगुरुर्युगप्रवराचार्यः तस्य तु नियतं सुगुरुत्वादिति गाथार्थः ॥ १३६ ॥ नन्वेवं लब्धेऽपि सुगुरौ किमेवं तव संशय इत्याह—

मूलम्—जिणधम्मं दुन्नेयं अइसयनाणीहिं नज्जए सम्मं ।
तह वि हु समयट्ठिइए ववहारनएण नायव्वं ॥ १३७ ॥

व्याख्या–जिनधर्मः सर्वज्ञप्रणीतो धर्म्मः श्रुतचारित्रलक्षणो दुर्ज्ञेयो दुःखावगम्योऽत्र विभक्तिव्यत्ययादिकं प्राग्वत् । दुर्ज्ञेयत्वं चोत्सर्गापवादनिश्चयव्यवहारादिनयशतैः प्रतिपादितत्वात् । यथा 'गम्भीरं जिणवयणं दुव्विन्नेयं अनिउणबुद्धीहिं ' इत्यादि । अथवा कमप्युद्दिश्य लिङ्गमेव वर्णितं, कमपि चोद्दिश्य वृत्तं,कंचन चाश्रित्यागमतत्त्वं, कथनीयतयोक्तं, यतः-षोडशके-बालः पश्यति लिङ्गं मध्यमबुद्धिर्विचारयति वृत्तम् । आगमतत्त्वं तु बुधः परीक्षते सर्वयत्नेन ३४८ ॥ बालो--विशिष्टविवेकविकलो लिङ्गं वेषमाकारं बाह्यं पश्यति, प्राधान्येन धर्मार्थिनोऽपि तस्य तत्रैव भूयसा रुचिप्रवृत्तेः । मध्यमबुद्धिस्तु मध्यमविवेकसम्पन्नो विचारयति मीमांसते , वृत्तं वक्ष्यमाणस्वरूपं प्राधान्येन समाश्रयति तत्रैवाभिलाषत्वात् २ आगमतत्त्वं त्वागमपरमार्थमिदं पर्यवरूपं बुधो विशिष्टविवेकसम्पन्नः परीक्षते समीचीनमवलोकयति सर्वयत्नेन सर्वादरेण धर्माधर्मव्यवस्थाया आगमनिबन्धनत्वात् । यत उक्तं--धर्माधर्मव्यवस्थायाः शास्त्रमेव नियामकं । तदुक्तासेवनात् धर्मस्त्वधर्मस्तद्विपर्ययात् ॥ ३४९ ॥ बालादिभावमेवं, सम्यग्विज्ञाय देहिनां



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुरुणा । सद्धर्मदेशनाऽपि हि, कर्त्तव्या तदनुसारेण ॥ ३५० ॥ इति दुर्ज्ञेयं, ततोऽतिशयज्ञानिभिर्दशचतुर्दशपूर्वधरादिभिर्ज्ञायतेऽवगम्यते सम्यक् यथावस्थितत्वेन । अनतिशयज्ञानिनां सम्यक् परिच्छेदायोगात् । तथापि समयस्थित्या वर्त्तमानसिद्धान्तोक्तनीत्या व्यवहारनयेन ज्ञातव्यः । सिद्धान्तस्थितिश्चेयम्–" उस्सग्गववायविउ गीयत्थो निस्सिओ य जो तस्स । अणिगूहंतो विरियं असढो सव्वत्थचारित्ती" ॥ ३५१॥तथा-निच्छयओ दुन्नेयं,को भावे कम्मि वट्टए समणो । ववहारओ उज्जुज्जइ जो पुव्वट्ठिओ चरित्तम्मि ॥३५२॥ इत्यादिकेन व्यवहारनयेन वेदितव्यो, जिनधर्माराधकगुरुद्वारा जिनधर्म इति गाथार्थः ॥ १३७ ॥ ननु कथमेवमिति तदित्याह—

मूलम्—जम्हा जिणेहिं भणियं सुयववहारं वि सोहियं तस्स ।
जायइ विसुद्धबोही जिण आणाराहगत्ताओ ॥ १३८ ॥

व्याख्या–यस्मात्कारणाज्जिनैरर्हद्भिर्भणितं प्रतिपादितं श्रुतव्यवहारं विशोधयतः तृतीयार्थे द्वितीयेति श्रुतव्यवहारेण विशुद्धिं कुर्वतश्चारित्रस्येति गम्यते । जायते भवति विशुद्धा निर्मला बोधिर्जिनधर्मप्राप्तिः केवलिनाऽपि श्रुतव्यवहारस्याङ्गीक्रियमाणत्वात् । यतः–ववहारो वि हु बलवं जं छउमत्थं पि वंदए अरहा । आहाकम्मं भुंजइ सुयववहारं पमाणं तो ॥ ३५३ ॥ कुत एवमित्याह--जिनाज्ञाराधकत्वात् जिनाज्ञा चैवम्--जइ जिणमयं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पवज्जह ता मा ववहारनिच्छए मुयह । ववहार नउच्छेए तित्थुच्छेओ जओ भणियं ॥ ३५१ ॥ श्रुतव्यवहारं प्रमाणयता जैनाज्ञाराद्धैव । तदाराधने च बोधिशुद्धिः प्रकटैवेति गाथार्थः ॥ १३८ ॥ ननु भवद्भिरुक्तं तथापि समयस्थित्या व्यवहारनयेन ज्ञातव्यो जिनधर्म इति । तर्हि ज्ञातो धर्मस्तद्द्वारा गुरुरपि ज्ञात एवातः का गुरुविषये शङ्केत्याशङ्क्याह—

मूलम्—जे जे दीसंति गुरू समयपरिक्खाइ ते न पुज्जंत्ति ।
पुणमेगं सद्दहणं दुप्पसहो जाव जं चरणं ॥ १३९ ॥

व्याख्या--ये ये दृश्यन्ते विलोक्यन्ते गुरवो धर्माचार्याः सम्प्रतीति गम्यते । समयपरीक्षया सिद्धान्तोक्तव्यवहारनयविचारणया ते न पूर्यन्ते परीक्षां न सहन्ते इति यावत् समयोक्तानुष्ठानस्य यथोक्तस्याकरणात्, । नन्वेवं तर्हि किं चरणं नास्त्येवेत्याशङ्क्याह-पुनरेकं श्रद्धानं वर्त्तते किं तच्छ्रद्धानमित्याह-दुःप्रसहो दुःप्रसहाचार्यो यावद्भविष्यति तावद्यद्यस्माच्चरणं प्रतिपादितमिति गम्यते । “ दुप्पसहं तं चरणं जं भणियं भगवया इहं खित्ते” इत्यादि वचनात्, दुःप्रसहं यावच्चरणमस्तीति भगवद्वचनश्रद्धानात् प्रतीमो गुरुसद्भावं । अत एवोक्तं श्रीजिनवल्लभसूरिभिः “ कालाइदोसओ कह वि जइवि दिसंति तारिसा नै जई । सव्वत्थ तहवि नत्थित्ति नेव कुज्जा अणासासं ॥३५४॥कुग्गहकलंकरहिया जहसत्ति जहागमं च जयमाणा । जेण विसुद्धचरित्तत्ति वुत्तमरहंतसमयम्मि ॥ ३५५ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति गाथार्थः ॥ १३९ ॥ यदि श्रद्धानमस्ति तर्हि किं कर्त्तव्यमित्याह—

मूलम्—ता एगो जुगपवरो मज्झत्थमणेहिं समयदिठीए ।

सम्मं परिक्खियव्वो मुत्तूण पवाहहलबोलं ॥ १४० ॥

व्याख्या—यस्मात्परीक्षया न पूर्यन्ते गुरवो दुःप्रसहं यावच्च चरणमस्ति तस्मादेकोऽद्वितीयो युगपवरो युगप्रधानागमोमध्यस्थमनोभिरभिनिवेशरागद्वेषादिरहितमानसैः पुरुषैरिति दृश्यम् । समयदृष्ट्या निशीथव्यवहारादिश्रुतपर्यालोचनया सम्यगुत्सर्गापवादविधिज्ञतया परीक्षणीयः । एक इति वदत एक एव युगप्रधानो युगे भवति । न युगपद् द्वौ भवत इत्यभिसन्धिः । प्राग् यदुक्तं—"गुरवः समयपरीक्षया न पूर्यन्ते इति" तत्तु स्वस्य विशिष्टश्रुतायोग्यत्वेन विशेषपरिज्ञानाभावादुक्तं । अत्र तु 'समयदिट्ठिए सम्मं परिक्खियव्वोत्ति' विशिष्टश्रुतवत उद्दिश्योक्तं । किं कृत्वा मुक्त्वा विहाय "प्रवाहहलबोलं" तिदेशीभाषया प्रवाहकलकलं ततोऽयं भावो लोकप्रवाहं परित्यज्यैको युगप्रवरः सम्यक्परीक्षणीयस्तस्यैकैकस्य दुःप्रसहं यावदवश्यंभावादिति गाथार्थः ॥ १४० ॥ ननु प्रवाहहलबोलं मुक्त्वेत्युक्तं तर्त्कि प्रवाहः करिष्यतीत्याशङ्क्याह—

मूलम्—संपइ दसमच्छेरयनामायरिएहिं जणियजणमोहा ।

सुहधम्माओ निउणा वि चलंति बहुजणपवाहाओ ॥ १४१ ॥

For Private and Personal Use Only

व्याख्या–सम्प्रति दुष्षमायां दशमाश्चर्यं चासंयतपूजालक्षणं नामाचार्याश्च लिङ्गमात्रोपजीविनः सूरयो द्रव्यतो भावतश्च साधुक्रियावैकल्येन नाममात्रधारकास्ते । तथा तैर्दशमाश्चर्यनामाचार्यैर्जनितजनमोहाः जनानां प्रस्तावात्प्राकृतजनानामुचितो जनित उत्पादितो जनोचितो मोहो येषां मध्यपदलोपात् ते जनितजनमोहा निपुणा अपि धर्मकर्मदक्षा अपि आस्तामनिपुणाः, शुभधर्मात्सम्यगर्हत्प्रणीतधर्मात् चलन्ति च्यवन्ति धर्मे स्थैर्यं न कुर्वन्तीति यावत् । कस्माद्धेतोः धर्माच्चलन्तीत्याह–बहुजनप्रवाहात् बहवश्च ते जनाश्च बहुजनास्तेषां प्रवाहो गतानुगतिकता बहुजनप्रवाहस्तस्मात् । अयं भावः बहुजनप्रवाहो ह्ययं यद्वंशक्रमायाता भ्रष्टा अपि गुरवो माननीया एव । तत इति प्रवाहाद्दशमाश्चर्यनामाचार्यैश्च जनितजनमोहा निपुणा अपि सम्प्रति काले विधिधर्माच्चलन्ति । यतोऽधुना तैर्गुणवानपि न ज्ञायते कालादिदोषात् । तदुक्तं--अइसयविरहाओ खित्तकालाइदोसा, विगुणबहुलयाए संकिलिट्ठे जणम्मि । सपरसमयलोगाधारणाभिन्नतुंड–ग्गलखलजइरज्जे नज्जए नो गुणी वि ॥ ३५७ ॥ ततस्ते प्रायो युगप्रवरागमं कथं विदन्तीति गाथार्थः ॥ १४१ ॥ एवं प्रवाहादेर्दौष्ट्यमभिधायाथ तन्मध्यपतितस्य पतितालम्बनग्राहिणो दोषं तदितरस्य च गुणमाह—

मूलम्—जाणिज्ज मिच्छदिट्ठी जे पडियालंबणाइं गिन्हंति ।
जे पुण सम्मद्दिट्ठी तेसिं मणो चडणपयडीए ॥ १४२ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या–जानीत मिच्छद्दिट्ठीति लुप्तविभक्तिकं पदं मिथ्यादृष्टीन् विपरीतदर्शनांस्तान् ये पतितालम्बनानि पतितानां मार्गभ्रष्टपार्श्वस्थादीनां तच्छ्रावकाणां चालम्बनानि तदाचीर्णकुप्रवृत्तिबहुमानलक्षणा अवष्टम्भा, यथा एतेऽपि भगवद्वेषधारिणो भगवदुक्तमागममेवाधीयते। ततः कथमेतदुक्तं चैत्यवासादिकमप्रमाणयामः। अथवा ते साधुरूपधारिणस्तथा तथा कुर्वाणा दृश्यन्ते, वयं किं ततोऽपि लष्टतरा, वस्तुपालादिना वा प्रपाकूपारामादिकं कारितं। ततः किं सोऽस्मत्तोऽपि मन्दो निर्विवेको वा इत्यादीनि पतितालम्बनानि गृह्णान्त्याददते न भगवद्वचः। यतः–सुयबज्झाचरणरया पमाणयंता तहाविहं लोगं। भुवणगुरूणो वराया पमाणयं नावगच्छंति ॥ ३५८ ॥ ये पुनः सम्यग्दृष्टयः शुद्धदर्शनास्तेषां मनश्चित्तं 'चउणपयडीएत्ति' चटनपदिकायां गुणस्थानारोहमार्गे भवतीति गम्यम्। सम्यग्दृष्टिर्हि चिरसेवितमपि पापं न बहु मन्यते किन्तु यं कमपि गुणं पश्यति तत्रैव रज्यते। यतः षोडशके–अमृतरसस्वादज्ञः कुभक्तरसलालितोऽपि बहुकालम्। त्यक्त्वा तत्क्षणमेनं वाञ्छत्युच्चैरमृतमेव ॥ ३५९ ॥ [ 'अमृतेत्यादि' अमृतरसस्यास्वादस्तं जानातीत्यमृतरसास्वादज्ञः कुभक्तरसलालितोऽपि कुभक्तानां कुदर्शनानां यो रसस्तेन लालितोऽपि अभिरमितोऽपि पुरुषो बहुकालं प्रभूतकालं नैरन्तर्यप्रवृत्त्याऽत एव कालाध्वनोरत्यन्तसंयोगं द्वितीया त्यक्त्वा परित्यज्य तत्क्षणं तस्मिन्नेव क्षणे शीघ्रमेनं कुभक्तरसममृतरसज्ञत्वेन, वाञ्छत्यभिलषत्युच्चैरमृतमेव सुरभोज्यममृतमभिधीयते तद्धि सर्वरससंपन्नत्वात् स्पृहणी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यमतितरां भवति ॥३५९॥ ] एवं त्वपूर्वकरणात् सम्यक्त्वामृतरसज्ञ इह जीवः । चिरकालसेवितमपि न जातु बहु मन्यते पापम् ॥३६०॥इति ततो ये पतितालंबनग्राहिणस्ते मिथ्यादृशः । ये तु सम्यग्दर्शिनस्ते तु "आलं- बणाण लोगो भ[त]रिओ जीवस्स अजउकामस्स । जं जं पेच्छइ लोगो तं तं आलंबणं कुणइ ॥ ३६१॥ इत्याद्यागमवचनात् सत्स्वप्यसदालम्बनेषु तानि परित्यज्य गुणेष्वधिरोहणायैव मनः कुर्वत इति गाथार्थः ॥ १४२ ॥ अथ पुनः पतितालम्बनग्राहिणां बहुत्वमालोक्य सुमार्गनिरतसङ्घस्य दौर्लभ्यमाह—

मूलम्—सव्वं पि जए सुलहं सुवन्नरयणाइवत्थुवित्थारं ।
निच्चंचिय मेलावं सुमग्गविरयाण अइदुलहं ॥१४३ ॥

व्याख्या—सर्वमपि समस्तमपि जगति विश्वे सुलभं सुप्रापं । किं तदित्याह—सुवर्णरत्नादि वस्तुविस्तारं काञ्चनमणि- प्रमुखपदार्थप्रपञ्चं जानीतेत्यध्याहारः । एवंविधसम्पदामनन्तशः प्राप्तत्वात् । तदुक्तं—चुलसीइ जोणिलक्खे सुणे-

१ व्याख्या-एवंत्वेत्यादि । एवं त्वपूर्वकरणात् एवमेवापूर्वकरणादपूर्वपरिणामात् सम्यक्त्वामृतरसज्ञ इह जीवः सम्यक्त्वामृतरसमनुभवद्वारेण जानातीति तज्ज्ञ उच्यते । चिरकालासेवितमपि प्रभूतकालमभ्यस्तमपि न जातुचित् कदाचित् बहु मन्यते बहुमानविषयी करोति पापं मिथ्यादर्शनमोहनीयं तत्कार्यं वा प्रवचनोपघा- तादि । इह च कुभक्तरसकल्पं पापं मिथ्यात्वादि, अमृतरसास्वादकल्पो भावः सम्यक्त्वादिरवसेय इति ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गकुलकोडिलक्खगहणेसु भमिरेण इह्नावय संपयाओणंताओ पत्ताओ ॥ ३६२ ॥ किं तर्हि दुर्लभमित्याह–नित्यमेव मेलापकं संयोगं सुमार्गनिरतानामाप्तोपदिष्टविधिनिष्ठानामतिदुर्लभं दुष्प्रापतमं जानीत । यतः–" दुल्लंभो माणुसो जम्मो धम्मो सव्वन्नुदेसिओ । साहुसाहम्मियाणं च, सामग्गी पुण दुल्लहा ॥ ३६३ ॥ अतस्तत्संगमे यत्नः कर्त्तव्य इति गाथार्थः ॥ १४३ ॥ अथ सुमार्गनिरतसङ्गमेऽपि येषामभिमानस्तत्स्वरूपमाह–

मूलम्—अहिमाण विसोपसमरथयं च थुवंति देवगुरुणो य ।
तेहिं पि जओ माणो हीही तं पुव्वदुच्चरियं ॥ १४४ ॥

व्याख्या--अभिमानो जात्यादिगर्वः स एव विषमिव दुःखहेतुत्वाद्विषमभिमानविषं तस्योपशम उपशान्तिस्तदर्थं तन्निमित्तं अभिमानविषोपशमार्थमेवाभिमानविषोपशमार्थकं स्वार्थिकः कः प्रत्ययः । चकारान्मिथ्यात्वादिदोषोपशमार्थं च स्तूयन्ते गुणोत्कीर्त्तनेन श्लाघ्यन्ते उपलक्षणमिदमभिगमादीनां । देवा जिनेन्द्रा लुप्तविभक्तिकं पदं गुरवश्च धर्माचार्याश्च तेषां हि स्तुत्या मिथ्याभिनिवेशरूपाभिमानादि दोषोपशमो भवति । तत एव तत्स्तवनादेर्दर्शनशुद्धिः प्रतिपादिता । यथा–तित्थयराण भगवओ पवयणपावयणि अइसयड्ढीणं । अभिगमणनमणदरिसण कित्तणसंपूयणा थुणणा ॥ ३६४ ॥ तैरपि देवगुरुभिः ' जओत्ति ' यदि मानोऽभिमानो देवविषयोऽभिमानो यथा– मत्पूर्वजकारितं चैत्यमिदं मयि जीवति क इदं विहायान्यत्र चैत्ये महिमाद्यर्थं गन्तुं प्रवर्त्तते।मत्कारिता चेयं प्रतिमेति मया सर्वमिहैव कर्त्त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽयं स्वप्रतिमायां सत्यां किमन्यकारितप्रतिमाग्रे बल्यादिकं करोमीत्याद्यनेकधा । गुरुविषयोऽभिमानो यथा समानेऽपि सौविहित्ये गुणवत्वे च स्वयं गुरुत्वेनाङ्गीकृतानेव एत एव क्रियावतः पंडिता गुणवन्त इत्याद्युक्त्वा बहुमन्यतेऽन्यांश्च गुणवतोऽपि मत्सरादवमन्यते । ततो यद्यभिमानोपशमनहेतुभिर्देवगुरुभिरपि मानस्तर्हि हीही इति खेदे तत्पूर्वंदुश्चरितं प्राग्भवकृतदुष्कर्मणो दुर्लङ्घ्यत्वमिति यावत् । नहि तादृशोत्कटदुष्कृतमन्तरेणैवंविधसामग्र्यामपि एवंभूतो दुरभिमानो भवतीति गाथार्थः ॥ १४४ ॥ कदभिमानधनोऽसदभूतमपि सदिवमन्यते इति सोपालम्भं तद्दूषणमुद्भाव्य तं निर्भर्त्सयन्नाह—

मूलम्—जो जिण आयरणाए लोओ न मिलेइ तस्स आयारे ।
हा हं मूढ करिंतो अप्पं कह भणसि जिणपणयं ॥ १४५ ॥

व्याख्या–यो लोको विशेषणान्यथानुपपत्त्या पार्श्वस्थादिको जनः ।"जिण आयरणाएत्ति' जिनोक्तेनात्र चोक्तशब्देन सार्द्धं विभक्तिलोपो द्रष्टव्यः । आचरणया च चकारश्चाध्याहर्त्तव्यः । ततश्च जिनोक्तेन साक्षादागमोक्तेन, तिन्नि वा कड्ढई जाव, थुईओ तिसिलोइया । ताव तत्थ अणुन्नायं कारणेण परेण य ॥ ३६५ ॥ इत्यादि चैत्यवासादिनिषेधरूपेण आचरणया--असढेण समाइन्नं, जं किंचि कत्थई असावज्जं । न निवारियमन्नेहिं वि बहु अणुमयमेयमायरियं ॥ ३६६ । तथा–अवलंबिऊण कज्जं जं किंची आयरंति गीयत्था ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

थोवा वराइवहुगुणसव्वेसिं तं पमाणंति ॥ ३६७ ॥ इत्येवंविधलक्षणयुक्तया षट्करकल्पप्रभूत[याशेष]पात्रोपभोगतृप्तिकरणादिदुःप्रतिलेख्यपात्रव्यापारणचतुर्थीपर्युषणाकरणादिरूपा । अथवा जिना इव जिना 'पडिरूवो तेयस्सी' ति भणनाद् गीतार्थाचार्यास्तेषामाचरणा आचरितं जिनाचरणा या न मिलति न सङ्गच्छते जिनोक्तं गीतार्थाचरणां च न मन्यते इत्यर्थः ।तस्य पार्श्वस्थादिलोकस्याचारान् सामाचारीविशेषान् हाहा इति खेदे,मूढ मुग्धबुद्धे ! कुर्वन् विदधान आत्मानं कथं केन प्रकारेण भणसि कथयसि जिनप्रणतं, जिने प्रणतः प्रह्वीभूतो जिनप्रणतस्तं,जिनप्रणयं वा जिने एवोपलक्षणत्वात्सुगुरौ च प्रणयः स्नेहो यस्य स जिनप्रणयस्तं जिनादिप्रणयस्य प्रशस्तत्वात् ।तदुक्तं–अरहंते सुयरागो रागो साहूसु बंभयारीसु । एस पसत्थो रागो अज्जसरागाण साहूण ॥ ३६८ ॥ ततश्च भो मुग्धबुद्धे ? यो जिनोक्तेन आचरणया च"आयरणा विहुआणेति" वचनादाज्ञारूपया न मिलति प्रत्युत-"नियमइकयसामायारिचारित्तसन्ना, मुसियजलजणोहा सुत्तउत्तिन्नबीहा । वयमिह चरणट्ठा हंत नन्नित्तिचिंता, परपरिभवमुतुक्कोसमुल्लासयन्ति(?)॥३६९॥ इति पद्योक्तमाचारं सेवन्ते तदाचारान् कुर्वन् जिनप्रणतं जिनप्रणयं वा कथमात्मानं कथयसि । तादृशो हि स एव कथ्यते यो जिनोक्तां सदाचरणां च मन्यमानान्मन्यते तदपरांस्तु न मन्यते, यथा राजभक्तान्मन्यमानो राजप्रणतो भवति नापर एवमिहापीति गाथार्थः ॥ १४५ ॥ नन्वेवं च पूर्वगाथया पार्श्वस्थादिलोकाचाररतस्य काक्वा जिनाप्रणतत्वं प्रोक्तं, ततश्च लोका जिनाचरणामपहाय किं तदुक्तं--मन्यन्त इत्याशङ्क्य प्रायो लोकस्य स्वभावमाह—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूलम्—ज चिय लोओ मन्नइ तं चिय मन्नंति सयललोया वि ।
जं मन्नइ जिणनाहो तं चिय मन्नंति कि वि विरला ॥ १४६ ॥

व्याख्या—यदेव किञ्चित्स्वमत्युत्प्रेक्षितादिकं लोक एक कश्चिज्जनः पार्श्वस्थादिर्मन्यतेऽङ्गीकुरुते तदेव मन्यन्ते सकला अपि सर्वेऽपि लोकास्तादृशा विवेकविकलाः । अपिर्भिन्नक्रमः । स च योजित एव । तादृग्लोकस्य प्रायो गतानुगतिकत्वं प्रतीतमेव ॥ यतः—गतानुगतिको लोको न लोकः पारमार्थिकः । भद्रे ! वृकपदं पश्य यद्वदन्ति बहुश्रुताः ॥३७०॥ पुनःशब्दस्याध्याहारात् यत्पुनर्मन्यते प्ररूपणाद्वारेण अनुजानाति जिननाथो भगवान् वीतरागः तदेव पार्श्वस्थादिवचनपरिहारेण मन्यन्ते केऽपि लघुकर्म्मणो लब्धलक्षा विरलाः स्तोकतराः, भगवन्मतस्य मार्गस्य प्रतिश्रोतो रूपत्वाद्विरलतराश्रयणीयत्वम् । यतः— " अणुसो य पट्ठिए बहुजणंमि पडिसोय लद्धलक्खेणं त्ति,,:तस्माद् बहुजनस्यानुश्रोतो गामितया स्वच्छन्दलोकोक्तमेव मन्यते लोकः प्रभूततरः, जिनोक्तमानकस्याल्पत्वादिति गाथार्थः॥१४६

ननु यदि लोकः प्रायो लोकोक्तमेव मन्यते न जिनोक्तं, जिनोक्तमानिनोऽल्पत्वादिति स्वभावस्तर्हि भवतु नामेत्याशङ्क्य जिनोक्तामनने लोकोक्तमनेन च दोषमाह—

मूलम्—साहम्मियाओ अहिओ बंधुसुयाईसु जाण अणुराओ ।
तेसिं नहु सम्मत्तं विन्नेयं समयनीईए ॥ १४७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्याख्या—साधर्मिकान् समानसम्यक्त्वादिगुणधर्मधारिणः अधिकोऽतिरिक्तो बन्धुसुतादिषु बन्धवः स्वजनाः सुता अङ्गजा आदिशब्दान्मातृपितृभार्यादयस्तेषु येषामनुरागः स्नेहः साधर्मिकेभ्यो बन्ध्वादीन् बहु मन्यन्ते । नैव जानन्ति यथा-"अन्नन्नदेसजाया अन्नन्नाहारवड्डियसरीरा । जिणसासणे पवन्ना सव्वे ते बांधवा भणिया ॥३७१॥ यथा-महाणुभावेण गुणायरेणं वयरेण पुव्विं सुयसायरेण । सुयं सरंतेण जिणुत्तमाणं वच्छल्लयं तेण कयं तु जम्हा ॥३७२॥ तम्हा सव्वपयत्तेणं जो नमुक्कारधारओ । सावओ सोवि दट्ठव्वो जहा परमबंधवो ॥ ३७३ ॥ सो अत्थो तं च सामत्थं तं विन्नाणमणुत्तमं । साहम्मियाण कज्जंमि जं विचंति सुसावया ॥ ३७४ ॥ वच्छन्नपाणासणखाइमेहिं पुप्फेहिं पत्तेहि य पुंप्फलेहिं । सुसावयाणं करणिज्जमेयं कयं तु जम्हा भरहाहिवेणं ॥ ३७५ ॥ वज्जाउहस्स रामेणं जहा वच्छल्लयं कयं । ससत्ति अणुरूवं तु तहा वच्छल्लयं करे ॥३७६॥तेषां बन्ध्वादिषु साधर्मिकाधिकमनुरागं कुर्वतां नहु नैव सम्यक्त्वं विज्ञेयं ज्ञातव्यं । ननु तेषां सम्यक्त्वं स्वमत्यैव न विज्ञेयमुतान्यथेत्यत आह–समयनीत्या सिद्धान्तयुक्त्या नतु स्वमनीषिकया, सिद्धान्तनीतिश्चैवम्-- यथा-जिनमुनीनामपि स्वभ्रातृपुत्रादिस्नेहेन मद्भ्राता पुत्रो वाऽयं अस्मै शोभनं वस्त्रपात्रादि ददामीत्यादिरूपेण, न तु गुणवत्त्वबुद्ध्या, भक्तपानवस्त्रादिप्रतिलाभयतः शेषसाधुभ्योऽधिकं वात्सल्यं कुर्वतो गृहस्थस्य दोष उक्तो रागादिसङ्क्लेशवशात् । अत एव श्रावकप्रतिक्रमणसूत्रे द्वादशव्रतातिचारप्रतिक्रमणकाले " सुहिएसु य दुहिएसु य जा-

१. पुङ्गीफलेः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मे असंजएसु अणुकंपा । रागेण व दोसेण व तं निंदे तं च गरिहामि॥३७७॥ इति गाथाऽव्याख्यायां साधुष्विति विशेष्यं गम्यम्,संविभागव्रतप्रस्तावात् ।साधुषु कीदृक्षु सुष्ठु हितं ज्ञानादित्रयं येषां ते सुहितास्तेषु,पुनः कीदृक्षु दुःखितेषु रुजा तपसा वा क्लान्तेषु प्रान्तोपधिषु वा, पुनः किं विशिष्टेषु न स्वयं स्वच्छंदेन यता उद्यता अस्वंयतास्तेषु गुर्वाज्ञया विहरत्सु या मया कृताऽनुकम्पा रागेण पुत्रादिप्रेम्णा न तु गुणवत्त्वबुद्ध्या इत्याद्यर्थभणनेन तादृशदानदानाद्यत्प्रायश्चित्तं तत्प्रतिक्रमणाद्युक्तं । ततश्च यदि चारित्रिष्वपि पितृपुत्रादिसम्बन्धगणनया शेषसाधुभ्यो विशेषभक्तिकरणं दोषहेतुस्तर्हि विरत्यादिविकलेषु बन्धुसुतादिषु सम्यक्त्वादिगुणसम्पन्नेभ्यः साधर्मिकेभ्यो वात्सल्यादिनाऽधिकस्नेहकरणेन सम्यक्त्वाभावस्य किं वाच्यं । अत एव च तैः सह कलहादिनिषेधः प्रत्यपादि । तदुक्तं-" पवयणसाहम्मीणं करेइ वच्छल्लमविअप्पं,तेहिं समं न विरोहं करेमि, नहु धरणगाइकलहंपि सीयं तेसु न तेसु सइविरिए भोयणं काहं ॥ तथा-विवायं कलहं चेव सव्वहा परिवज्जए । साहम्मिएहिं सद्धिं तु जओ एवं वियाहियं ॥ ३७८ ॥ जो किर पहणइ साहम्मियंमि कोवेण दंसणमणम्मि । आसायणं तु सो कुणइ निक्किवो लोगबंधूणं ॥३७९॥यदि च साधर्मिकात् पुत्रादिष्वधिकस्नेहकरणे सम्यक्त्वाभावस्तर्हि तैः सह विरोधादिकरणे तु कैव कथा । एतेन च लोकाभ्युपेतं बन्ध्वाद्यनुरागं कुर्वतो, जिनोक्तं श्रीवैरस्वामिश्रीरामादिभिः कृतं साधर्मिकवात्सल्यमनङ्गीकुर्वतो, दुरन्तदुर्गतिहेतुर्मिथ्यात्वलक्षणो दोष उक्तः, इति साधर्मिकवात्सल्यमेव कर्त्तव्यमिति गाथार्थः ॥ एवं लोकाचारमननस्य दोषमुद्भाव्याथ तन्मननिषेधोपदेशमाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्— जइ जाणसि जिणनाहो लोयायाराण पक्खओ हूओ ।
ता तं तं मन्नंतो कह मन्नसि लोयमायारो ॥ १४८ ॥

व्याख्या—यदीत्यभ्युपगमे जानासि वेत्सि जिननाथः जिनवरेन्द्रः, इति शब्दाध्याहाराल्लोकाचाराणां पक्षतो भूत इति । तत्र लोकाचाराः पर्वोत्सवादिषु साधर्मिकोपेक्षया स्वजनसत्कारादिका अनेके तेषां पक्षतो भूतः पार्श्वभूतो दूरस्थ इति यावत् । इत्येवं यदि जानासि 'ता' तर्हि त्वं भोः श्रोतः तं जिननाथं मन्यमान आराध्यतयाऽङ्गीकुर्वाणः कथं केन प्रकारेण मन्यसे मकारस्यालाक्षणिकत्वाल्लोकाचारान् तादृशमुग्धजनोपदिष्टानिति कर्त्तव्यताविशेषान् । अथवा कथं मन्यसे लोकाचारे वर्त्तमानमिति गम्यं, यतस्त्वं लोकोत्तराचारजिनमानकस्तदुक्तव्यतिरेकादन्यस्यानाचारत्वात् । अयमभिप्रायः--यदि जिनं लोकोत्तराचारत्वात् लोकाचारात् पृथग्भूतं जानासि, तर्हि तदाराधनकृतमतिस्तत्प्रतिपक्षं लोकं कथं मन्यसे, अपि तु न मन्तव्यमिति गाथार्थः ॥ १४८ ॥ कथं मन्यसे लोकाचारानिति । यदुक्तं–तदेव द्रढयितुं जिनमननेऽपि ये मुग्धा लोकाचारं मन्यन्ते तद्दोषमाह–

मूलम्—जे मन्ने वि जिणंदं पुणो वि पणमंति इयरदेवाणं ।
मिच्छत्तसंनिवायगघत्थाणं ताण को विज्जो ॥ १४९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या-ये केचिद्प्रादुर्भूतसद्विवेका मानयित्वा भगवदुक्तधर्माङ्गीकरणेन पूजनादिना वा जिनेन्द्रं वीतरागं पुनरनन्तरं लोकाचाराङ्गीकरणादिना कारणेन प्रणमन्ति नमस्कुर्वन्ति । 'इयरदेवाणं'ति प्राकृतत्वाद् द्वितीयार्थत्वं षष्ठ्याः । इतरदेवान् हरिहरब्रह्मादीनां रागादिकदर्थितत्वेनैव च तेषामितरता । तेषां च रागादिकदर्थितत्वं तद्भक्तैरेवोक्तं यथा-**प्रियाकृते शृङ्खलतां मुरारिः, शशी कलङ्कं रविरङ्गलक्ष्म् । देहार्धतां शम्भुरुरीचकार, प्रेम्णो विकारः खलु दुर्निवारः** ॥ ३८० ॥ तेषां किमित्याह-मिथ्यात्वमतस्मिंस्तदिति प्रत्ययरूपं विपरीतं दर्शनं तदेव सन्निपातो वातपित्तश्लेष्मणामेकत्र मिलनेनोद्भूतो रोगविशेषो मिथ्यात्वसन्निपातस्तेन ग्रस्ताः कवलीकृता व्याप्ता इति यावत् । तेषां मिथ्यात्वसन्निपातग्रस्तानां को वैद्यः ? को भावभिषगपि तु न कोऽपीति । यथा सन्निपातग्रस्तानां प्रायो वैद्यो न प्रभवति । यतः-वातपित्तश्लेष्मणां चयप्रकोपप्रशमक्रमनियमेऽप्येकदा सन्निपातस्तदा देहसंहार इत्युक्तं । तथा मिथ्यात्वसन्निपातग्रस्तानां सद्वचनोपदेष्टृभाववैद्यो, न मिथ्यात्वसन्निपातमपनेतुमलं, सन्निपाततुल्यता च मिथ्यात्वस्य सुन्दरासुन्दरवस्तुनः साम्यापादनात् भवति । हि सान्निपातिकस्य कर्पूरादौ सुन्दरद्रव्ये पुरीषादौ वा ऽसुन्दरद्रव्ये समाना बुद्धिः । सुन्दरद्रव्ये द्विष्टा वा ।तथा मिथ्यात्विनोऽपि भगवति जिने सर्वदोषरहिते इतरदेवेषु च समाना मतिर्जिने द्विष्टा वा । तत साधूक्तं ये जिनेन्द्रं मानयित्वा पुनरितरदेवान् प्रणमन्ति, मिथ्यात्वसन्निपातग्रस्तानां तेषां न कोऽपि वैद्य इति । ते दुश्चिकित्साः अन्यथैवंविधं सुधारसायमानं जिनधर्ममवाप्य कथं पुनस्तादृशे हरिहरगोत्रदेवतापूजनश्राद्धकरणादिके जाड्ये रज्यन्ते, यतः-कर्पूरप्रकरे-काव्य--२ विज्ञाय धन्या जिनधर्ममर्मं रज्यंति शय्यम्भववन्न



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाड्ये । पीत्वा सिताभावितधेनुदुग्धं को वाम्लतक्रार्कपयांसि पश्येत् ॥ ३८१ ॥ [ व्याख्या–धन्याः सुभाग्याः जिनधर्मं विज्ञाय ज्ञात्वा जाड्ये मूर्खत्वे न रज्यन्ति न रागं कुर्वन्ति । किंवत् शय्यंभववत् । यथा शय्यंभवो ब्राह्मणः 'अहो कष्टं अहो कष्टं तत्त्वं न ज्ञायते क्वचिदिति' साधुवचनं श्रुत्वा गुरुं तत्त्वमापृच्छय मिथ्यात्वाद्यागादेर्विरक्तः प्रव्रज्यां गृहीत्वा सम्प्राप्तोभयशिक्षः शय्यंभवनामा आचार्योऽभूत् । दृष्टान्तमाह–सिता शर्करा तया भावितं मिश्रितं धेनुदुग्धं पीत्वा आस्वाद्य कः पुरुषः आम्लतक्रं अर्कपयांसि अर्कदुग्धानि पश्येत् विलोकयेत्, अपि तु न कोऽपि गवेषयेत् ॥ ३८० ॥ ] तस्माल्लोकाचारानुगमनादिनापि नान्ये देवाः प्रणमनीया इति गाथार्थः ॥ १४९ ॥

अथ पुनर्मिथ्यात्वसन्निपातग्रस्ता यत्कुर्वन्ति तदाह––

मूलम्––एगो सुगुरू एगा वि सावगा चेइयाणि विविहाणि ।
तत्थ य जं जिणदव्वं परुप्परं तं न विच्चति ॥ १५० ॥

व्याख्या–एको द्वितीयस्यानङ्गीकारात् सुगुरुः शोभनाचार्यः सुगुरुता चास्य बाह्याडम्बरदर्शनेन तादृशलोकापेक्षयैव न तु पारमार्थिकी । ' एगा वि सावगा इत्यत्रैकशब्दाद्विभक्तिलोपोऽपि शब्दश्चैव शब्दार्थो द्रष्टव्यः । स चापि शब्दः प्रत्येकं योज्यः । ततश्चैक एव सुगुरुरेके च श्रावकास्तेऽपि नाममात्रेण नतु यथोक्ताः । तथा चैत्यानि जिनेन्द्रप्रासादाः प्रतिमा वा विविधानि नानाप्रकाराणि एकान्येवेति विभक्तिपरिणामात् सम्बध्यते । तत्र च गुरुश्रावकचैत्याना-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मैवयेऽपि च यज्जिनद्रव्यं देवस्वमस्ति उपलक्षणत्वाज्ज्ञानस्वमाधारणस्वे अपि तत्परस्परमन्योऽन्यं न विक्रीणन्ति, पि-
थ्यात्वलुप्तचेतनाः सन्तो न व्ययन्ते । अयंभावः–एकगुरुश्रावकाः सन्तोऽपि मैते सम्यगनुशास्यमाना अस्मान् विहाय
पक्षान्तरं गमन्नित्यादिभीतेन चटुभाषिणा मुखरक्षकेण गुरुणा अननुशासिता मत्सरादिदोषेण स्वायत्तचैत्यद्रव्यं समाने
4 ष्वप्यन्यसाधर्मिककारितचैत्येषु उपयुज्यमानमपि, नहि वयं परचैत्ये स्वचैत्यद्र॰यं दास्याम इत्यादिकलहायमानाः सदपि
न ददतीति गाथार्थः ॥ १५० ॥ एवं कुर्वाणाश्च ते किं भवन्तीत्याह—

मूलम्—ते न गुरू नो सड्ढा न पूइओ होइ तेहिं जिणनाहो ।
मूढाण मोहठिई सा नज्जइ समयन्नुणेहिं ॥ १५१ ॥

8 व्याख्या–येषामुपासकहृदयंगमभाषकाणां गुरूणां शिष्यभूताः श्रावकास्तादृशनिर्मलोपदेशविकलतया परस्परं चै-
त्यद्रव्यं देवकार्ये न विक्रीणन्ति । ते तादृशा गुरवो धर्माचार्या न भवन्तीति शेषः । गुरवो हि त एव ये सुखदाक्षि-
ण्यादिनापि न श्लिष्टं वदन्ति, किन्तु कालिकाचार्यवत् स्फुटमेव वदन्ति । यतः--उपदेशमालायां गाथा १०५-"जीयं
काऊण पणं तुरमणिदत्तस्स कालिअज्जेण । अविय सरीरं चत्तं न य भणियं महम्मसंजुत्तं ॥३८२॥ तथा
12 न ते श्राद्धा, ये चैत्यद्रव्यं परस्परं चैत्यकार्ये न व्यापारयन्ति तेषां सम्यक्त्वरहितत्वात् । सम्यक्त्वारहित्यं च तादृशाना-
मुपशमाद्यभावात्प्रतीतमेव, सम्यक्त्वाभावे च शेषव्रतपालनेऽपि न श्राद्धत्वं तन्मूलत्वात्तस्य । यतः–सम्यक्त्वमूलानि ॥११३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चाणुव्रतानि गुणास्त्रयः । शिक्षापदानि चत्वारि, व्रतानि गृहमेधिनाम् ॥ ३८३ ॥ तस्मान्न ते श्राद्धाः, न पूजितो भवति द्रव्यभावभेदवत्या पूजया तैः परस्परमत्सरादिकारणेन स्वस्वचैत्यादन्यत्र चैत्ये चैत्यद्रव्यविक्रायकैर्जिननाथो वीतरागो । भगवत्पूजा हि मनःशान्तये क्रियते--' पूयाए मणसंती मणसंतीएय सुहवरं झाणमित्यादि ' वचनात् यदि साऽपि संक्लिष्टैः क्रियते, तदा जिननाथो न पूजितो भवति, यथोक्तकरणाभावात् । तर्हिं तत्तादृशं गुरुश्रावकजिनपूजादिकं किमित्याह--मूढानां मूर्खाणां मोहस्थितिर्मूढता मर्यादा सा तादृशी ज्ञायते समयनिपुणैः सिद्धान्ततत्त्ववेदिभिः । समयनिपुणा हि जानन्ति जिनचैत्यानामपि स्वपरभावापेक्षया पूजां कुर्वतो ममीकारादिना सङ्क्लेशयुक्तं भवति चेतः कुन्तलदेवीवत् । यतः--तव सुत्तविणयपूया न संकिलिट्ठस्स हुंति ताणाइं । खवगागमि-

१ कुन्तलदेवीउदाहरणम्— अवनिपुरे जितशत्रुनृपस्य पट्टदेवी कुन्तला अर्हद्धर्मनिष्ठा । तद्वचसा तस्याः सपत्न्यः सर्वा धर्मवत्यो जाताः कुन्तलां बहु मन्यन्ते । अन्यदा सर्वराज्ञीनां नव्यप्रासादेषु निष्पद्यमानेषु कुन्तलाऽतुच्छमत्सराकुला स्वप्रासादं तासां चैत्येभ्योऽधिकतरमकारयत् । पूजानाट्यादि विशिष्टतरं कारयति । सपत्नी चैत्यादिषु प्रद्वेषं वहति । ऋज्व्यः सपत्न्यस्तु तस्याः कृत्यं नित्यमनुमोदन्ते । एवं मत्सरग्रस्ता दुर्दैवाद् व्याधिबाधिता मृत्वा चैत्यपूजाद्वेषेण शुनी जाता । स्वचैत्यद्वारे पूर्वाभ्यासात्तिष्ठति । अथ तत्रागतः केवली तं प्रति अन्यराज्ञीभिः " कुन्तला क्व गता " इति पृष्टं । ज्ञानिना यथावत्प्रोक्तं । ततस्ताः परमसंविग्नास्तस्याः शुन्याः भक्ष्यं क्षिपन्त्यः सस्नेहं प्राहुः– हे पुण्यवति ! धर्मिष्ठयाऽपि त्वया किमेवं मुधा प्रद्वेषकृतः येनेदृग्भवः प्राप्तः ?"। इति तदुक्तमाकर्ण्य प्राप्तजातस्मृतिः सा शुनी वैराग्यं प्राप्ता प्रभुमूर्तिसन्मुखं स्वपापमालोच्य प्रतिपन्नानशना मृत्वा वैमानिकी भूता । तस्मान्मत्सरो न विधेयः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विणयरया कुंतलदेवी उदाहरणं ॥ ३८४ ॥ सङ्क्लिष्टे सति च चित्ते जन्मजरामरणविपत्तय एव । तदुक्तं--चित्तरत्नमसंक्लिष्ट--मान्तरं धनमुच्यते । यस्य तन्मुषितं दोषैस्तस्य शिष्टा विपत्तयः ॥ ३८५ ॥ तस्माद्विधिचैत्येष्वपि स्वपरादिभेदमुपदिशंतो भेदकर्तृश्रोपदेशादानेनोपेक्षमाणा वा सति सामर्थ्ये न गुरवो न च श्राद्धा । न चैवं कुर्वाणैः पूजितो भवति जिननाथः, केवलं सा सर्वा मूढानां मोहस्थितिरेवेति गाथार्थः ॥ १५१ ॥ अनन्तरं यदुक्तं न ते गुरवस्तदेव स्पष्टयन्नाह--

मूलम्—सो न गुरू जुगपवरो जस्स य वयणंमि वट्टए भेओ ।

चिय भवणसड्ढगाणं साहारणदव्वमाईणं ॥ १५२ ॥

व्याख्या--स इति उत्तरपदैर्विशेषितो गुरुराचार्यो युगप्रवरो वर्त्तमानकालाचार्येषूत्तमो न आराध्यो न भवतीत्यर्थः । स इति कः ? यस्य गुरोः, चकारः समुच्चये, स च उत्तरार्द्धे योक्ष्यते वचन इति प्राकृतत्वात्तृतीयार्थे सप्तमी । ततश्च वचनेन प्रवर्त्तते भेदः पार्थक्यं।केषामित्याह-चैत्यभवनश्राद्धकानां'साहारणदव्वमाईणंति'मकारस्यालाक्षणिकत्वात्साधारणद्रव्यादीनां च तत्र चैत्यकारणोद्धारपूजादिविषयमुपदेशं ददानस्तथा कथंचित्कुटिलतया ददाति, यथा श्रोतारः श्रीजिनचैत्येष्वपि स्वपरादिभेदेन प्रवर्त्तन्ते । अथवा साक्षादेव कथयति ननु भोः किं भवतां महत्त्वं, यद् यूयं सत्यपि विभवे परचैत्येषु शालीना इव परपृष्ठलग्ना आरात्रिकादि कर्त्तुमलभमानाः पूजां कुरुत । यदि च स्वचैत्यं कारयत तदा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तु सर्वत्र भवतामेव प्राधान्यं स्यात्तत्रेत्येवं भेदप्रवृत्तिवाक्यं । श्राद्धानां च साधर्मिकवात्सल्यादिकरणोद्यतानां सतां स्वपक्षाश्रितानेव साधर्मिकत्वेनोपदिशति । पक्षान्तराश्रितान् गुणवतोऽप्यसाधर्मिकानुक्त्या भेदं प्रवर्त्तयति । नत्वेवमुपदिशति यथा--तम्हा सव्वपयत्तेण जो नमुक्कारधारओ । सावओ सो वि दट्ठव्वो, जहा परमबंधवो ॥ ३८६ ॥ साधारणद्रव्यादीनां च भेदमेवं कारयति । यदस्माच्छ्राद्धैरेवेदं साधरणादिद्रव्यं मुक्तमतोऽस्मद्वचनेनैव व्यापारणीयं, नास्मदादेशं विना क्वापि व्यापार्यं, यश्चैवं भेदं कारयति स गुरुः संक्लेशहेतुरिति नाराध्यो भवतीति गाथार्थः ॥१५२ ॥ ननु यद्वचनाद्भेदो वर्त्तते चैत्यभवनादीनां स युगप्रवरो न भवतीत्युक्तं, तच्च तीर्थंकरादिकाले युक्तं, परमिदानीं भेदं विना न काऽपि मर्यादा भवतीत्याशङ्काऽपि निराकरणाय सम्प्रत्यपि ये श्रुतोक्ते विधौ न प्रवर्त्तन्ते तेषां दोषमाह—

मूलम्— संपइपहुवयणेण वि जाव न उल्लसइ विहिविवेयत्तं ।
ता निविडमोहमिच्छत्त–गठिया दुट्ठमाहप्पं ॥ १५३ ॥

व्याख्या–सम्प्रत्यपि पदान्तरस्थेनापि शब्देन सम्बन्धात् । दुःषमाकालेऽपि प्रभुवचनेनाऽविसंवादिवचनश्रीजिनोपदिष्टागमेन श्रुतेनेति गम्यम् । यावन्नोल्लसति न स्फुटीभवति विधिविवेकत्वं विधेः । “ देवस्सं नाणदव्वं चेत्यादि ” वचनोक्तदेवद्रव्यज्ञानद्रव्यसाधारणद्रव्यवृद्धिव्ययसंरक्षणकाले–सुइभूएणं विसिट्ठपुप्फाइएहिं विहिणा उ । सारथुइथुत्तगरुई जिणपूया होइ कायव्वो ॥ ३८७ ॥ [ व्याख्या–काले समये वक्ष्यमाणस्वरूपे । कर्त्तव्येति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्बन्धः । तथा शुचिभूतेन भूतशब्दस्य प्रकृतिमात्रार्थत्वाच्छुचिना अथवा भावप्रत्ययस्य लुप्तस्य दर्शनाद्भूतशब्दस्य प्राप्त्यर्थत्वाच्च शुचितां प्राप्तेन । अथवा शुचिश्चासौ भूतश्च संवृत्तः प्राणी वा शुचिभूतस्तेन विशुद्धिमतेत्यर्थः । तथा विशिष्टपुष्पादिभिः प्रधानसुमनःप्रभृतिभिः करणभूतैः । आदिशब्दार्थं स्वयमेव वक्ष्यति । तथा विधिना वक्ष्यमाणविधानेनेति । तुशब्दः समुच्चयार्थः । तथा सारस्तुतिस्तोत्रगुर्वी प्रधानस्तुतिस्तोत्रमहती । स्तुतिश्चैकश्लोकप्रमाणा, स्तोत्रं तु बहुश्लोकमानम् । जिनपूजार्हदर्चनम् भवति वर्त्तते कर्त्तव्या विधेया इत्यर्थः ॥ ३८७ ॥ ] इत्यादिदेवपूजादीति कर्त्तव्यताविशेषस्य विवेको विचारणाविधिविवेकस्तस्य भावो विधिविवेकत्वं, यावत्करणात् पूर्वं तदाभिमुख्यतच्छुश्रूषादिग्रहः ।'ता' तत् निबिडमोहमिथ्यात्व ग्रन्थिता दुष्टमाहत्म्यं निबिडो नीरन्ध्रो मोहो मौढ्यं तस्माद्यन्मिथ्यात्वं निबिडमोहमिथ्यात्वं तदेव ग्रन्थिरिव दुर्मोच्यत्वात् ग्रन्थिस्तस्य भावो निबिडमोहमिथ्यात्वग्रन्थिता तस्या दुष्टमाहात्म्यं दुष्टः प्रभावः अयं भावः–यत् सम्प्रत्यपि दुःषमाकाले–**होहिंति साहुणो वि य, सपक्खपरपक्खनिद्दया धणियं । एयं तं संपत्तं बहुमुंडे अप्पसमणे य ॥ ३८८ ॥ उवगरणवत्थपत्ताइयाण वसहीण सड्ढयाणं च । जुज्झिस्संति कएणं जह नरवइणो कुडंबीणं ॥३८९॥** इत्यादि साक्षादनुभूयमानभगवद्वचनेनापि विधिविवेको नोल्लसति, कुगुरुवचनपरिहारेण सुगुरुवचनादरणात्मकः । तन्निबिडमोहमिथ्यात्वग्रंथिता दुष्टमाहात्म्यमिति गाथार्थः॥ १५३ ॥ येषां च प्रभुवचनेनापि न विधिविवेकोल्लासः तैश्चान्यथाकृत्यं कुर्वद्भिरवश्यं प्रभुवचनमाशातितं भवति । ततोऽधुना प्रभुवचनाशातनाया दुष्टत्वं कथयन्नाह—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलम्—बंधणमरणभयाइं दुहाइं तिक्खाइं नेय दुक्खाइं ।
दुक्खाण दुहनिहाणं पहुवयणासायणाकरणं ॥ १५४ ॥

व्याख्या–बन्धनं रज्ज्वादिभिर्निगडनं, मरणं प्राणात्ययलक्षणं, भयमिह लोकादिसप्तप्रकारं तानि बन्धनमरणभयानि दुःखानि तीक्ष्णानि रौद्राणि प्रतीतान्येव लोके, तानि च नैव दुःखानि, तेषां दुःखानां स्वल्पकालभावित्वात् । ननु तर्हि किं दुःखमित्याह–दुःखानां जन्मजरामरणादीनामिह जगति निधानं निधिः प्रभुवचनाशातनाकरणम् । प्रभुवचनस्य भगवदागमस्याशातना हीलना तस्याः करणं विधानम् । यथा हि–निधानं महत्त्वान्न कथमपि निष्ठां याति, एवं प्रभुवचनाशातनाकरणाद्दुःखानन्त्यमुपजायते, इति प्रभुवचनाशातनाकरणमेव दुःखनिधानं । " आसायणमिच्छत्तं आसायणवज्जणाओ सम्मत्तं । आसायणानिमित्तं कुव्वइ दीहं च संसारं ॥३९०॥ इति वचनात् तस्माद्बन्धनादीनां दुःखानां प्रभुवचनाशातनाकरणोत्पन्नदुःखेभ्योऽतिस्तोकत्वान्न दुःखत्वमिति गाथार्थः ॥ १५४ ॥ एवमाशातनाकारिणां दुःखानन्त्यमुक्त्वा संप्रति कालादिदोषाद्यथोक्तविधिकरणासमर्थमात्मानं गर्हन्नाह—

मूलम्—पहुवयणविहिरहस्सं नाऊणं जाव दीसए अप्पा ।
ता कह सुसावयत्तं जं चित्तं धीरपुरिसेहिं ॥ १५५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या-प्रभुवचनविधिरहस्यं ज्ञात्वा सिद्धान्तोक्तविधिनवं ' वंदइ उभओ कालंपि ' इत्यादि मुक्त्वा ' दुज्जणमित्तीति ' गाथान्तं ज्ञात्वाऽवगम्य यावदात्मा दृश्यते । प्रतिपन्नश्रावकत्वस्यात्मनः स्वरूपं विचार्यत इति भावः । ' ता ' तदा ' कहेति ' कुत्र सुश्रावकत्वं शोभनश्रावकभावलक्षणं,यच्चीर्णमाचरितं धीरपुरुषैः कामदेवादिभिः कामदेवो हि देवैरपि स्वव्रतान्न चालितः, यदुक्तं-देवेहिं कामदेवो गिही वि नवि चालिओ तवगुणेहिं । मत्तगइंद-भुयंगम-रक्खसघोरट्टहासेहिं ॥ ३९? ॥ ततो यत्तादृशघोरपरीषहादिसहनेनापि न प्रतिपन्नव्रतात्कामदेवादयश्चलितास्तच्छ्रावकत्वमल्पसत्त्वानामस्माकं कुत इति गाथार्थः ॥ १५५ ॥ ननु यदि धीरपुरुषा चीर्णं श्रावकत्वं नास्ति तर्हि किमर्थं देवपूजाद्यनुष्ठानविधौ स्वात्मैवमायास्यते इत्याशङ्कायामाह--

मूलम्—जइवि हु उत्तमसावय पयडीए चडणकरण असमत्थो ।
तह वि पहुवयणकरणे मणोरहो मज्झ हिययम्मि ॥ १५६ ॥

व्याख्या--यद्यपि हुर्निश्चये, उत्तमश्रावकपदिकायां प्रधानश्रमणोपासकपरिपाट्यां चटनकरणे आरोहणविधानेऽसमर्थोऽशक्तः कालादिवैषम्यादहमस्मीति गम्यते । तथापि उत्तमश्रावकपदिकाचटनासामर्थ्येऽपि प्रभुवचनकरणे श्रीवीतरागोक्तविधिविधाने मनोरथो वांछा मम हृदयेऽस्तीति गम्यते । जिनवचनकरणमनोरथोऽपि श्रद्धानरूपत्वात् सर्वगुणमूलं, यतः--" जं सक्कइ तं कीरइ जं न सक्कइ तहेव सद्दहणा । केवलिजिणेहिं भणियं सद्दहमाणस्स



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्मत्तं ॥ ३९२ ॥ ततश्च यद्यपि प्रधानश्रावकपदवीमारोढुमक्षमस्तथाऽपि यथाशक्ति भगवद्वचनमाराधयन्नशक्तौ च श्रद्धानवत्त्वात् प्राप्तसम्यक्त्ववतया एकस्मिन् कस्मिंश्चिच्छ्रावकभेदेऽस्मीति गाथार्थः ॥ १५६ ॥ अथ पुनस्तस्यैव जिनवचनकरणमनोरथस्याशंसां कुर्वन्नाह--

मूलम्——ता पहु पणमिय चरणे इक्कं पत्थेमि परमभावेण ।
तुह वयणरयणगहणे मणोरहो मज्झ हुज्ज सया ॥ १५७ ॥

व्याख्या--यस्मात् प्रभुवचनकरणे मम हृदये मनोरथोऽस्ति ' ता ' तस्मादेव कारणात्प्रभोर्वीतरागस्य अथवा विद्यमानश्रीजिनपतिसूरिगुरोरामन्त्रणं प्रणम्य चरणौ पादौ तावकीनाविति शेषः । एकं प्रार्थयामि एकमेव वस्तु मार्गयामि परमभावेन प्रकृष्टश्रद्धया । किं तदित्याह-त्वद्वचनान्येव दुःखदौर्गत्यदौर्भाग्यादिदोषहरणेन रत्नानीव रत्नानि त्वद्वचनरत्नानि तेषां ग्रहणमुपादानं तस्मिन्नतिलोभः परमगार्ध्यं मम भवेत् सदा प्रतिदिनं । ननु यदा कदाचित् तद्ग्रहणलोभे हि सर्वसम्पन्मूलसम्यक्त्वप्राप्तिरवश्यंभाविनीति तद्विषयेयमाशंसेति गाथार्थः ॥ १५७ ॥ ननु किमर्थमेवमाशंसा क्रियते यावता स्वयमेव जिनवचनग्रहणे लोभो भवतीत्याशंक्याह—

मूलम्—इह मिच्छवासनिक्किठ-भावओ गलियगुरुविवेयाणं ।
अम्हाण कह सुहाइं संभाविज्जंति सुमणे वि ॥ १५८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या–इहास्मिन् दुःषमाकाले मिथ्यावासेन मिथ्यात्ववासनया निकृष्टो विरूपो भावो मिथ्यावासनिकृष्टभावस्तस्मात् गलितगुरुविवेकानां, प्रणष्टतत्त्वातत्त्वपृथग्भावानां अस्माकं,कथं केन प्रकारेण सुखानि प्रस्तावात्त्वद्वचनरत्नग्रहणलक्षणानि । यता रत्नग्रहणं हि सुखहेतुत्वात्सुखमेव ततस्तानि सुखानि सम्भाव्यन्ते गण्यन्ते स्वप्नेऽपि. अपि तु न सम्भाव्यंते । यतो दुःषमाकाले मिथ्यात्ववासितमतीनां गलितविवेकानां तादृशसुखसम्भावनापि कुत इति गाथार्थः ॥१५८ ॥
कुत एवमित्याह–

मूलम्— जं जीवियमित्तं पि हु धरेमि नामं च सावयाणं पि ।
तं पि पहु महाचुज्जं अइविसमे दूसमे काले ॥ १५९ ॥

व्याख्या– यज्जीवितमात्रमपि धारयामि । तत्र जीवितं दशविधं यथा–" नामं ठवणादविए ओहे भवतब्भवे य भावे य । संजमजसकित्ती जीवियं च तं भन्नइ दसहा ॥ ३९२ ॥ दशविधत्वेऽपि च जीवितस्यात्र संयमजीवितेनाधिकारः । तत्रापि देशसंयमजीवितेन । ततश्च यज्जीवितमात्रं केनचिद्भङ्गकेन देशसंयतजीवितमात्रमपि ' हु ' स्फुटं धारयामि च पुनर्यत् श्रावकाणां सम्यक्त्वमूलाणुव्रतशिक्षाव्रतधारिणां,अथवा–"परलोगहियं सम्मं जो जिणवयणं सुणेइ उवउत्तो । अइतिव्वकम्मविगमा सुक्कोसो सावगो इत्थ ॥ ३९३ ॥ इत्यादिलक्षणानां नामापि अभिधानमपि धारयामि यथाऽयं श्रावक इति । तदपि प्रभो ! श्रीवीतराग ! महाचोद्यं महदाश्चर्यं । क्वेत्याह– अतिवि-



For Private and Personal Use Only

षमे चक्रे दुःषमाकाले दुःषमायां हि प्रायः- " कालाइदोसवसओ घणकम्मकिट्ठ, चित्तत्तणेण य जणा बहुसंकिलेसा । तो लिंगिणो य गिहिणो य दढं वि मूढा, किं किं न जं अणुचियं चिरमायरंति ॥ ३९४ ॥ नट्ठायते सयमसंगकुहेउजुत्ती, अन्नेसि नासणकए बहुहा वयंति । पायं जणासयमई य अभाविभद्दा तं चेव तत्तमिव लंति चयंति मग्गं ॥ ३९५ ॥ मिच्छत्तछन्नपडिकप्पियजुत्तिहीणा, नाणा कुसत्थमयमूढ कुतित्थियाणं । दुव्वासणा विनडिया पडिया वसेही, जीवा कयाइ न भवंति भवंतगामी ॥ ३९६ ॥ इति गाथात्रयोक्तार्थभाजो जीवा भवन्ति । ततोऽस्मिन् दुःषमाकाले यद्देशसंयतजीवितमात्रमपि धारयामि श्रावकनाम धारयामि तन्महदाश्चर्यम् । सम्प्रति तादृशजीवितमात्रधारणस्य विशिष्टश्रावकनामधारणस्य चातिदुष्करत्वाद् दुष्करकरणं चाश्चर्यं हेतुरिति गाथार्थः ॥ १५९ ॥ एवं कालाद्यनुसारेण स्वस्वरूपमभिधायाधुना स्वजन्मसाफल्याय सुगुरुं विज्ञापयन्नाह—

मूलम्— परिभाविऊण एवं तह सुगुरु करेज्ज अम्ह सामित्तं ।
पहुसामग्गिसुजोगे जह सहलं होइ मणुअत्तं ॥ १६० ॥

व्याख्या-- परिभाव्य चिन्तयित्वा एवं पूर्वोक्तं दुःषमायां धर्मदुर्लभत्वलक्षणं । तथा तेन प्रकारेण हे सुगुरो ? शोभनधर्माचार्य ! इह च ज्ञातेषु सुगुरुषु सत्स्वपि सामान्येन यत् सुगुरुग्रहणं तद् गुणिषु पक्षपातसूचनार्थं। कुर्या विदध्या-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्माकं स्वामित्वं स्वामिभावं । यथा किं स्यादित्याह-- प्रभुणा जिनेन दुर्लभतयोक्ता सामग्री धर्मसाधनोपस्करः
“ चत्तारि परमंगाणि, दुल्लहाणि य जंतुणो । माणुसत्तं सुई सद्धा, संजमंमि य वीरियं ॥ ३९७ ॥
4 [व्याख्या- चत्वारि चतुःसङ्ख्यानि परमांगानि प्रधानकारणानि धर्मस्येति शेषः । दुर्लभानि दुष्प्रापाणि इह संसारे
जन्तोर्देहिनस्तान्येवाह- मानुषत्वं नरजन्म दुर्लभं, यतः-“ एगिंदिआइजाइसु परिभममाणाण कम्मवसगाणं ।
जीवाणं संसारे सुदुल्लहं माणुसं जम्म॥३९८॥ श्रुतिः श्रवणं धर्मस्येति गम्यते साऽपि दुरवापा । यतः--“अल-
स्समोहवण्णा थंभा कोहा पमायकिविणत्ता । भयसोगा अण्णाणा वक्खेव कुतूहला रमणा ॥३९९ ॥
एएहिं कारणेहिं लद्धूणं सुदुल्लहं पि माणुस्सं । न लहइ सुइहिं अकरिं संसारुत्तारणिं जीवो ॥४०० ॥
8 त्ति, तथा श्रद्धा श्रद्धानं धर्मस्यैव सापि दुर्लभैव । यतः- “कुबोहमिच्छाभिनिवेसजोगओ कुसत्थपासंडविमो-
हिआ जणा । न सद्दहंते जिणनाहदेसिअं चयंति बोहिं पुण केइ पाविअं ॥ ४०१ ॥ संयमे विरतौ चः
समुच्चये वीर्यं सामर्थ्यं तदपि दुर्लभं यतः- “ सद्दहमाणो वि जिओ सम्मं जिणनाहदेसिअं धम्मं । न तरेइ
समायरिउं विसयाइपमायवि(व)समणो ॥ ४०२ ॥ इत्यादिका प्रभुसामग्री प्रभोर्गुरोस्तवसामग्री
21 वा अथवा प्रभ्वी समर्था सर्वधर्मकर्मसाधने ‘ सामग्गी पञ्चेदियत्तणं माणुसत्तणमि’त्यादिका प्रभुसामग्री तस्याः सुष्ठु
शोभनो योगः प्राप्तिः प्रभुसामग्रीसुयोगस्तस्मिन् यथा सफलं रत्नत्रयाराधनलक्षणफलकलितं भवति जायते मनुजत्वं
मानुषत्वं । अयं भावः हे सुगुरो ? कालादिदौष्ट्यात्प्राग् विज्ञप्तमस्मत्स्वरूपं परिभाव्य तथा स्वामित्वं कुर्याः, यथा मनु-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ष्यजन्मास्माकं सफलं भवति धर्मसाधनसामग्रीयोगे लब्धे सतीति गाथार्थः॥ १६० ॥ अथ ग्रन्थोपसंहाराय ग्रन्थकारः स्वनामकथनपूर्वं तदध्ययनादिफलोपदर्शनपुरस्सरं च तदुपादेयतामाह—

मूलम्— एवं भंडारिय नेमिचंदरइया ओ कइवि गाहाओ ।
विहिमग्गरया भव्वा पढंतु जाणंतु जंतुसिवं ॥ १६१ ॥

व्याख्या– एवमनेन पूर्वोक्तप्रकारेण भाण्डागारिकः कोशाधिकारी गोत्रेण वा भाण्डागारिकः स चासौ नेमिचन्द्रश्च सज्जनभाण्डागारिकसुततया श्रीजिनेश्वरसूरिजनकतया च प्रतीतः । भाण्डागारिकनेमिचन्द्रस्तेन रचिता विहिताः कतिचिद्गाथाः कियत्योऽपि गाथाः षष्ठ्यधिकशतमाना इत्यर्थः । विधिमार्गरताः श्रीसर्वज्ञोपदिष्टमार्गाराधनपरा भव्याः शिवगमनयोग्याः पठन्तु सूत्रतो जानन्त्वर्थपरिज्ञानेन । एतेनास्य प्रकरणस्य स्वमनीषिकाकरणं व्युदस्तं । भव्या हि योग्यास्ते च युक्तियुक्तमेवोपाददते । नायुक्तं, अयुक्तोपादाने हि तेषां योग्यत्वहानेरिति सुगुरुपारतन्त्र्यं चास्य निवेदितम् । ततश्चैतत्पाठपरिज्ञानाभ्यां यान्तु व्रजन्तु शिवं निरुपद्रवस्थानं निःश्रेयसलक्षणमिति । एतत्पठनेनैतदर्थपरिज्ञाने च सम्यक्त्वं निश्चलं भवति। तन्निश्चलत्वे च क्रमेण क्षायिकज्ञानचारित्रे भवतस्ततश्चेप्सितार्थसिद्धिर्भवति। तदुक्तं उपदेशमालायां– " कुसमयसुइण महणं सम्मत्तं जस्स सुट्ठियं हियए । तस्स जगुज्जोयकरं नाणं चरणं च भवमहणं ॥ ४०४ ॥ [ व्याख्या– 'कुसमय' इति कुसमया कुदर्शनसिद्धान्तास्तेषां श्रुतयः श्रवणानि तासां मथनं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निर्नाशनं एतादृशं सम्यक्त्वं यस्य पुरुषस्य हृदये सुस्थितं सुस्थिरं वर्त्तते। तस्य पुरुषस्य जगदुद्योतकरं जगत्प्रकाशकं ज्ञानं केवलज्ञानरूपं च। पुनः चरणं यथाख्यातचारित्रं सर्वविरतिरूपं भवमथनं संसारनाशनं भवति,सम्यक्त्वाभावे ज्ञानाभावस्तदभावे मोक्षाभाव इत्यर्थः ॥ ४०४ ॥]" **सुपरिच्छियसमत्तो नाणेणालोइयत्थसब्भावो। निव्वण चरणाउत्तो इच्छियमत्थं पसाहेइ** ॥ ४०५ ॥ [ व्याख्या– '**सुपरिच्छिय**' इति दृढसम्यक्त्वगुणवान् एतादृशः,अत एव ज्ञानेनालोकितो विज्ञातोऽर्थानां जीवादिपदार्थानां सद्भावः स्वरूपं येनैतादृशः।अत एव पुनःकीदृशो निर्व्रणचरणायुक्तः निर्व्रणं व्रणरहितं अतिचाररहितं निर्दोषमिति यावत् एतादृशं यच्चरणं चारित्रं तत्रायुक्तः चारित्रोपयोगवानित्यर्थः। एतादृशः पुमान् ईप्सितं मनोऽभीष्टं मोक्षस्वरूपं प्रसाधयति। ] ईप्सितोऽर्थश्चात्र भव्यानां शिवप्राप्तिरेव। तथा शिवशब्दोपादानं चावसानमङ्गलार्थमिति गाथार्थः ॥ १६१ ॥

## ॥ ग्रन्थकारप्रशस्तिः ॥

इह नहि पुनरुक्तं नापि सम्बन्धबाध्यं,भवति हि गणनीयं नापि निर्लक्षणत्वम्। जिनवरमतभक्तेर्दुष्टसंसर्गमुक्त्यै कृतमिदमतिहर्षान्नेमिचन्द्रेण यस्मात् ॥१॥ न टीका नो चूर्णिर्न च गुरुजनाम्नायविशदा, मतिः काऽप्येतस्मिन् प्रकरणवरे प्राकृश्रुतवरा। परं कश्चित्कश्चित्तदपि लिलिखेऽर्थः क्वचिदयं, यथा ज्ञातः स्वस्य स्मरणविधये सज्जनगिरा ॥ २ ॥ तस्माद्यन्मतिमान्द्यतो दृढतराम्नायस्य चाभावत–स्तत्तादृक्समयावगाहविरहाद्दृष्टिरागादपि। अत्रोत्सूत्रमसूत्रितकृतकपैः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शोध्यं सुधीभिर्यतः,सर्वेष्वप्युपकारसारमनसो विश्वे श्रुताः सज्जनाः ॥ ३ ॥ व्याख्याय षष्ठिशतकं यत्पुण्यं समुपार्जितम् । तेनानभिनिवेशोऽयं जनः स्ताद्धर्म्मकर्मणि ॥ ४ ॥

## ॥ टीकाकारप्रशस्तिः ॥

कलास्पदं सज्जनलोचनानां सन्तोषदं सर्वदिशां प्रकाशात् । शुभोदयं चान्द्रकुलं विभाति शश्वच्छिरोभूषणमीश्वराणाम् ॥ १ ॥ तस्मिन्नासीदसीमश्रुतसलिलनिधेर्मध्यमध्यावगाहे , मन्थाद्रिः सान्द्रचित्तो युगवरगुरुषु प्राप्तरेखः सुवेषः । सूरिः श्रीवर्द्धमानो यदुरुतरुयशो दृश्यतेऽद्यापिशुभ्रं,तीर्थे श्रीअर्बुदाद्रौ सुविमलवसतिव्याजतः पिण्डभूतम्॥२॥ ततो गुरुर्जिनेश्वरः स्वरसतोऽपि संवेगवान्,बभूव विधिमार्गखरतरेत्यभिख्या यतः । प्रसिद्धिमगमत् मठाधिपतिसङ्घनिर्लोठना–न्नराधिपतिदुर्लभप्रथितपर्षदि प्रस्फुटम् ॥ ३ ॥ यच्चित्तकासारमलं चकार, घनागमः संवरपूरणेन । तथापि हंसावलिहर्षदायी सोऽभूत्ततः श्रीजिनचन्द्रसूरिः ॥ ४ ॥ नवाङ्गतां प्राप्य नवाङ्गवृत्तिं नवाङ्गविस्तम्भनपार्श्वनेतुः । प्रसादतो यः सुमनाश्चकार ततः स रेजेऽभयदेवसूरिः ॥ ५ ॥ यः स्फूर्जत्कलिकालकुण्डलिकरालास्यस्थितेः दुःस्थिते, लोकेऽस्मिन्नवधूय कुग्रहविषं सिद्धान्तमन्त्राक्षरैः चक्रे तन्मुखमुद्रया वसुकृते सज्जं स्वमत्या वरम्। स श्रीमान् जिनवल्लभोऽजनिगुरुस्तस्मान्महामन्त्रवित् ॥६॥ उत्सूत्राविधिमार्गसर्गविगलत्सर्गापवर्गश्रियां, संसर्गेण निसर्गसंस्तुतिसृजाऽवन्ध्यं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधिं योऽदिशत् । भ्रामं भ्राममिलातलेऽतिविस्मयवश्चित्रं समुत्पाद्य-ल्लोके श्रीजिनदत्तसूरिसुगुरुः सोऽभूत्तदीये पदे॥७ ॥ जिनचन्द्रयतीश्वरस्ततो-ऽजनि चन्द्रप्रतिमोऽमृतप्रसूः । अभितो वसतिं प्रकाशयत्,स्वर्गवीथिशुभमार्गदर्शकः ॥ ८ ॥विश्वे यस्य यशःपटेन सुगुणोत्पन्नेन चन्द्रे त्विषा-मौज्ज्वल्यं परिमुष्णताऽतिविततेनाच्छादिते सर्वतः । जाड्यं प्राणभृतां प्रणष्टमभवच्छोभापि काऽप्यद्भुता, जज्ञेऽसौ जिनपत्तिसूरिसुगुरुर्गीतार्थचूडामणिः ॥९॥ भाण्डागारिकनेमिचन्द्रतनयः सौभाग्यभाग्यालयः, पुण्यप्रीतिमयः समस्तसमयक्षीराब्धिचन्द्रोदयः । वादिप्राप्तजयः प्रकाशितदयः प्रज्ञाश्रयः सन्नयः आसीत् सूरिजिनेश्वरः समुचितस्तत्पट्टलब्धोदयः ॥ १० ॥ जिनप्रबोधो जनितप्रबोधः प्रभातचन्द्रं जितसर्वदेशः । दोषान्तकृद्द्योतितशुद्धमार्गः सच्चक्रमासङ्गमयां बभूव ॥ ११ ॥ अजनि जिनचन्द्रसूरि-र्दूरीकृतदुरितसञ्चयस्तस्मात् । प्राप्य पदं येन गुरोः, कविवर्गस्तोषितश्चित्रम् ॥१२॥ श्रीजिनकुशलयतीन्द्रो बभार गच्छे नरेन्द्रतां तनुयात् । यस्याज्ञामद्यापि हि दुष्टोऽपि न कोऽपि लङ्घयति ॥ १३ ॥ पद्मं सूर्यविकाशिकोशरुचिवत् कुर्वज्जडेषु स्थितिः,प्रोन्माद्यन्मधुपैर्मदैः परिवृतं मत्वा गिरां देवता । आशिश्राय यदाऽस्य पद्ममिति सा मन्ये कलावत्मियं, स श्रीमान् जिनपद्मसूरिसुगुरुर्भूमौ दिदीपे ततः ॥ १४ ॥ सुगुरुजिनलब्धिसूरि-स्तत्पट्टोदयगिरिं समासाद्य । निविडं मिथ्यात्वतमो दिनकर इव संजहाराशु ॥ १५ ॥ सल्लक्षणालङ्कृतिकाव्यतर्क-श्रुतादिविद्याम्बुधिपारदृश्वा । भट्टारकः श्रीजिनचन्द्रसूरिः प्रपालयामास पदं तदीयं ॥ १६ ॥ तत्पट्टे च जिनोदयाख्यगुरवो जाता यदीयः करः, पद्माया जननेन यत्समभवद् रत्नाकरस्तद्वरम् । यल्लेखावलिसङ्गतोऽपि सजयोऽप्युद्दामधामापि च, गोत्रध्रुड्द्विपाकहर्षकृदपीत्याश्चर्यमेतन्महत् ॥ १७ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपेणाहितकेवलेन जगतां जेता। जितश्चेत्स्मर–स्तत्किं सर्वबलेन मोहहनने यत्पौरुषं वर्ण्यते। ते श्रीमज्जिनराजसूरिगुरवस्तत्पट्टपङ्केरुहे,सत्पक्षद्वितया विभूषणपदं जग्मुर्मराला इव ॥ १८ ॥ तत्पट्टोदयभूधरोदयधराः सच्चक्रसन्तोषिणो, दोषोन्मेषनिषेधनैकपटवो वन्द्या ऋषीणामपि । पद्मानन्दकरास्तमोभरहरा राजन्त्यमी साम्प्रतं, श्रीमन्तो जिनभद्रसूरिविभवः खद्योतयन्तो महीम् ॥ १९ ॥ तेषामादेशमासाद्य, श्रीतपोरत्नपाठकाः । वृत्तिमेतां व्यधुः स श्री-गुणरत्नाख्यवाचकाः ॥ २० ॥ प्राग् दक्षिणापरधनेश्वरदिक्षु दुष्ट-मित्यामतावतमसानि निराकृतानि । स्वैरं भ्रमद्भिरभितोऽङ्गिमनो गुहाभ्यो,यैर्द्वादशात्मभिरिव स्ववचोमयूखैः (?) ॥ २१॥ ये श्रीजिनोदयगुरोः समवाप्तदीक्षाः, श्रीपाठकेन्द्रविनयप्रभलब्धशिष्याः । अध्यापिना विजययुक्तिलकाभिषेकैः,ते क्षेमकीर्त्तिगणयो व्रतहेतवो नौ ॥ २२ ॥ दुर्वादिमत्तमातङ्गसिंहाः श्रीसाधुनन्दनाः । उपाध्याया बभूवुर्नौ, विद्यानां गुरवो वनै(?)॥ २३ ॥ श्रीकीर्त्तिनन्दनाभिख्या, अभिषेकास्तथाऽऽवयोः । तेऽपि विद्यां ददुःसम्यक्, स्वाध्यायादि गुणोज्ज्वलाः ॥ २४ ॥ श्रीमन्तो वाचनाचार्या, मुनिशेखरनापकाः । धर्म्मग्रन्थाध्यापनेना-वयोः सदुपकारिणः ॥ २५ ॥ श्रीजिनभद्रयतीन्द्राः, सिद्धान्ताम्भोधिपारदृश्वानः । वृत्तिमिमां सद्वृत्ता अशोधयत् सूक्ष्मबुद्धिभृतः ॥ २६ ॥ शशिगगनबाणभूमि–प्रमिते वर्षे कृता विवृत्तिरिह । आचन्द्रार्कं नन्दतु, विबुधवरैर्वाच्यमानेयम् ॥ २७ ॥

॥ इति परमार्हत् श्रीनेमिचन्द्रविरचितं–महोपाध्यायश्रीगुणरत्नगणिसन्दृब्धवृत्तियुतं षष्ठिशतकप्रकरणमिदं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ अथ षष्ठिशतकगाथानां भाषानुवादः ॥

दोहा-शासननायक जगतिलो, प्रणमी वीर जिणंद ॥ षष्टीशतक प्रकीर्णनो, अर्थ लिखुं मतिमंद ॥१॥
धन्य कृतारथके हिये, श्रीअरिहंतसुदेव ॥ सुगुरुवसे जिनधर्मपुनि, पांच नमण नितमेव ॥ १ ॥
जो न करै तप दान तूं, न पढै न गुणे तंत ॥ तद् आणंद् जपो सदा, देव एक अरिहंत ॥ २ ॥
भव दुख हरन जिनेंद्र मत, धर्म एक रे जीव ॥ परसुर नमतो तूं मुस्यो, सुभ कारजमें क्लीब ॥ ३ ॥
मुण्यो न देव रु दानवे, मरणथी राख्यो कोय ॥ बहुत वि अजर अमर थया, निश्चल समकित जोय ॥४
जिम वेस्या रत कोइ नर, मने ठगातो शर्म ॥ तिम मिथ्या वेस्या ठग्यो, लखे न गत निधि धर्म ॥५॥
लोक प्रवाह स्वकुल क्रमे, धर्म होय जो बाल ॥ तो धर्मी मिथ्यात्व कुल, थकि अधर्मकी चाल ॥६॥
कुलाचार करि जो नही, राजनीतिमें न्याय ॥ जैनराजमें तो किसुं, कुलाचार करि भाय ॥ ७ ॥
कर्म जिन मत निपुनके, जो भव विरति न होय ॥ तौ मिथ्यात्व हत मूढके, पास विरति किम जोय ॥
देख अविरती जीवकूं, ताप विरती मन होय ॥ हा हा किम भव कूपमें, बूडत नाचे जोय ॥९॥
आरंभज पापे करी, जीव महा दुख पाय ॥ वलि मिथ्यात्व लवे करी, लहै न समकित भाय ॥ १० ॥
देशना य उत्सूत्रकी, होय जिणाज्ञा भंग ॥ आज्ञा भंगे पाप तद, दुःकर जिण धरमंग ॥ ११ ॥



For Private and Personal Use Only

केइ मूढ अन्याय करि, आण भंग जिम थाय ॥ तिम जिण द्रव्य वधारतां, बुडे भवोदधिमांय ॥१२॥
कुग्रह ग्रह ग्रहि जवीकूं, जो रुजु धर्म सुणाय ॥ चर्मभखी कूकरमुखे, सो कपूंर चवाय ॥ १३ ॥
सूत्र भाषि नर धन्य तस, रोषवि उपशम कोश ॥ उत्सूत्रीकी पिण क्षमा, महा मोह घर दोष ॥१४॥
जो शिवसुख जिणधर्मथी, एकभि नहि संदेह ॥ पुन्य हीणके जाणवो, कठिण मोक्ष सुख तेह ॥१५॥
चतुराई सबही कला, लहिये जगत सुजाण ॥ पिण दुर्लभ इक जैन मत, विधी रत्न विज्ञान ॥ १६ ॥
बहुलताय मिथ्यात्वकी, दुलभ सुसमकित क्ष्यान ॥ जिम पापी नृपके उदै, वर नरनाथ कथान ॥१७॥
बहु गुण विद्या गेहजो, तदपि उत्सूत्री हेय ॥ जिम वर मणिजुत विघ्नकर, विषधर लोक विषेय ॥१८॥
स्वजन नेह धन लोभ करी, सेवै लोक मिथ्यात ॥ रम्य धर्ममें नवि रमै, है अज्ञान उतपात ॥ १९ ॥
गृह व्यापार परिश्रमे, खिन्न थया नर तांहि ॥ इकनारी विश्राम हे, अन्य जिनागममांहि ॥ २० ॥
सम पिण उदर भरे जुओ, मूढ अमूढ विपाक ॥ मूढ लहै नरकादि दुख, निपुण लहै शिव नाक ॥२१॥
जिनमत कथा प्रबंध सब, जण संवेग उपाय ॥ संवेग तु समकित छते समकित शुद्ध गिराय ॥२२॥
तो जिन आण परे धरम, सुणवो सुगुरु सकाश ॥ अथवा ततउपदेशको, कथक सुश्रावक पास ॥२३॥
कथा ज्ञान उपदेशते, जाणे जाते जीव ॥ समकित अरु मिथ्यात्वनो, भाव त्रिलोक थितीव ॥ २४ ॥
जिन गुण मणि निधि पायकर, किम न थाय मिथ्यात ॥ निधि पाये पिण कृपणके, बलि दरिद्र विख्यात

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्म पर्व संवत्सरी, चतुर्मासी आदेय ॥ थाप्या जेणे जयतु ते, पापी सुमति धरेय ॥ २६ ॥
पाप पर्व जेणे रच्या, अशुभ नाम पण तास ॥ धर्मीने पण जेहथी, पाप मतोनो वास ॥ २७ ॥
ज्हेवे संगे जेहवो, ते नर मध्यम होय ॥ अति धर्मी अति पातकी, ते तो फिरे न कोय ॥ २८ ॥
अतिशय पापी पापरत, रहे सुपर्वे जेम ॥ पाप कुपर्वे धर्मथी, धन्य चलै नही तेम ॥ २९ ॥
लक्ष्मी दोविध एक तो, नर गुण धण क्षयकार ॥ एक दीपावे पुरुषकूं, पाप पुन्य अनुसार ॥ ३० ॥
भाइ थया गुरु श्राद्धने, स्तवी लेत दानादि ॥ तत्त्व अजाण हुए बुडे, दुसस्म समए प्रादि ॥ ३१ ॥
मिच्छ प्रवाहे रत घणा, लोक स्तोक सबुद्ध ॥ गारविरस लंपट गुरु, गोपै धर्म विशुद्ध ॥ ३२ ॥
अरिह देव सुगुरु गुरु, नाम मात्र सवि कहत ॥ ताके सुभग सुरूपकूं, पुन्यहीण नहि लहत ॥३३॥
शुद्ध जिनाज्ञा रत हुवे, कै खलने शिल सूल ॥ जेने ते शिरसूल फुन, ते गुरु सठ अनुकूल ॥३४॥
गुरु अकार्य हानहि घणी, करिये कहा पुकार ॥ सुगुरु श्राद्ध जिन वचन कह, कहा अकार्य असार ॥३५॥
साप देख नासे कुई, लोक कहै कछु नाहै, कुगुरु सापथी जे नसै, मूढ कहै खल ताहि ॥३६॥
एक मरणकूं साप दे, कुगुरु मरण अनंत ॥ श्रेष्ठ साप ग्रहवुं तदा, कुगुरु सेव नहि संत ॥ ३७ ॥
जिण आज्ञाथी रहितने, गुरुकहि जो शिर नाय ॥ गडर प्रवाहे जण छल्यो, तो सुं करिये भाय ॥ ३८ ॥
लोक अदाक्षणि कोइ जो, मागे रुटीया भाग ॥ कुगुरु संगत्यागन विषे, दाक्षणता धिग राग ॥ ३९ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नाखै नरके मुग्ध जन, देखाडी मुनि वेष ॥ ते हतास खल धींठने, कहिये किसुं विशेष ॥ ४० ॥
ते प्रसंसिये कुगुरु पण, जसु मोहादिक द्वेष ॥ सुगुरु परिभवी जीवके, थाए भगति विशेष ॥ ४१ ॥
जिम जिम खलनो अति उदे, जिम जिम तूठे धर्म ॥ तिम तिम समकित जीवको, उलसै समकित सर्म
जग जननी सम जिनमते, जो अति उदय न होय ॥ कलि कालज जणनो अति, पाप महातम सोय
जिसके माया धर्ममें, लागो ग्रह मिथ्यात ॥ सो उत्सूत्री भरम नह, कहै उलटि सवि वात ॥ ४४ ॥
जिन पूजादिक कार्य पण, सफल जिनाज्ञा थाय ॥ आणा भंगरहित दया, कार्य सवी दुखदाय ॥४५॥
कष्ट करै आपा दमै, द्रव्य तजे पण जोय ॥ तजै नही मिथ्यात्व लव, बुडे जेहथी लोय ॥ ४६ ॥
वधे मीत सतसंगथी, वर विधि धरम सुराग ॥ घटे कुसंगे प्रति दिवस, विदुनो पण ते राग ॥४७॥
शुद्ध गुरु जे सेवतो, ते अशुद्ध जण शत्रु ॥ तो बल रहित वसो नही, ज्हां असुद्ध जण तत्र ॥४८॥
जिन मत विदु असमर्थ जन, जहां समर्थ अजाण ॥ धर्म न वाधै तह लहे, गुणरागी अपमान ॥४९॥
सबल कुमार्गी धर्ममें, जो न करे अति भाव ॥ तो सुंदर अथ जो करै, तो सुध धर्मि दुख दाव ॥५०॥
मिथ्या वादे होय जो, श्रावक जन सब एक ॥ धर्मी जनकूं वर तदा, किम द्ये दुख अविवेक ॥५१॥
सुगुण महर्घ महा गिरि, जयसों पुरुष रतन्न ॥ जसु आश्रय आचार रत, करै सुधर्म जतन्न ॥ ५२ ॥
ते सुपुरुषके मूलकू, सुरतरु मणी न पाय ॥ विधिरत जनकूं जो दिए, धर्म सहाय्य सदाय ॥ ५३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लाजै निज नामोच्चरे, हुं मानुं सत पुर्ष ॥ वलि तेहना गुण गाय हम, कर्म टले कटु तुर्ष ॥ ५४ ॥
आण भंग क्रोधादि जुत, आप प्रसंस निमित्त ॥ धर्म सेवतां लोकने, नही धर्म नहि कित्त ॥ ५५ ॥
नीच प्रसंसाए भणे, उत्श्रुत धीत निलाज ॥ जो भावी दुःख तेहने, सो जाने जिन राज ॥ ५६ ॥
बोधि नाश उत्सूत्रिके, जामण मरण अनंत ॥ प्राण तजै पण धीर तत, नहि उत्सूत्र भणंत ॥ ५७ ॥
अविधि कीर्ति न कर कदा, रुजु जन रंजन हेत ॥ शुभ कुल वधु किं भी किया, वेस्या चरित थुणेत ॥
भवभयथी अति भीरु जे, आण भंग भय तास ॥ भवभयथकी अभीरुनें, आणा भंग न हास ॥५९॥
जोनसि स्तुत युत चेतना, किसो अस्तुतनो दोष ॥ धिग् धिग् कर्मनकूं यदा, लभध अलभ जिन पोस ॥
करवुं पर उपहास जे, ते अयुक्त जिनदास ॥ कुल प्रसूतके अगनि ले, धरमविषे जो हास ॥ ६१ ॥
मिथ्यात्वे संतोष जस, जिनवर वचने द्वेष ॥ तसु पण सुद्ध मनादिए, परम सुहित उपदेश ॥ ६२ ॥
सरल स्वभावी स्वजन व्है, निर्विकल्प सब ठौर ॥ डसित साप ऊपर अपी, करे कृपा क्या ओर ॥६३॥
गृह व्यापार रहित घणा, मुनि पण समकित हीन ॥ इह सालंबन श्राद्धकूं कहिये किसुं कुलीन ॥६४॥
किमहिन उत् श्रुत भाषवुं, उत् श्रुत भाष्युं जोय ॥ तो सहि बूडिस भव्य तूं, निरर्थ जप तप होय ॥६५॥
जिम जिम जिनवच सुमनने, प्रगटे सम्यक् प्रकार ॥ तिम तिम लोक प्रवाहमें, धर्म भाति नट चार ॥
शुद्ध ज्ञान कर जसु हिये, सम्यक वसो जिनेश ॥ तसु आगे तृण जिम दिपे, मिथ्या धर्मि अशेष ॥६७



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लोक प्रवाह पवन उदंड, चंड प्रचंड लहरेय ॥ दृढ समकित अति बलविना, गुरुआ पण हल्लेय ॥ ६८ ॥
जिनमतनी निंदा करो, जो अज्ञानी दुख पाय ॥ ते सांभरि ज्ञानी तणो, भय करि कंपे काय ॥ ६९ ॥
मिथ्यादृष्टि अज्ञानिनो, दोष जुवे शुं योध ॥ नहि जाणे शुं आपने, कष्टे समकित बोध ॥ ७० ॥
आचरता मिथ्यात्वने, जे चाहत जिन धर्म ॥ ज्वर पीडित ते पय पिवा, वांछे विकल विशर्म ॥ ७१ ॥
जिम केईक सुकुल वधू, व्रत हत लियकुल नाम ॥ आचरता मिथ्यात्व तिम, वहे सुगुरु अनुगाम ॥७२॥
आचरता उत्सूत्र जे, मानै आपसुसद्द ॥ रौद्र दरिद्रे दुःखि ते, तुले साथ सुधनद्द ॥ ७३ ॥
केइ कुलाचारे रता, केइ रत जिन मतमांहि ॥ जुओ भ्रात इति अंतरे, लखै न्याय सठ नाहि ॥७४॥
अहितकारि जसु संग पण, जे तसु धर्म करेय ॥ चोर संग तजि चोरिने, करै पापि नर तेय ॥७५॥
पातक नवमी पर्वमें, पसु मरता जसु पास ॥ तेने पूजित श्राद्ध जन, हा जिन हेला पास ॥७६॥
गृहकुटुंब स्वामी छतो, जे थापै मिथ्यात ॥ नाख्यो तेणे वंश सब, भव समुद्रमें भ्रात ॥ ७७ ॥
बारस नवमी चौथ मृत, पिंड प्रमुख मिथ्यात ॥ जे नर सेवे तेहने, नहि समकित अवदात ॥ ७८ ॥
जिम कादव खूतो शकट, काढै केइक धोरि ॥ तिम कुटुंब मिथ्यातथी, काढै केइ सजोर ॥ ७९ ॥
जैसे महितल प्रगट भी, घन युत रवि न दिखाय ॥ तैसे उदय मिथ्यात्वके, नहि दीसत जिनराय ॥८०॥
किम ते जायो जणनिये, जायो तो किं पुष्ट ॥ मिथ्या मगन थयो जदी, तिम गुण मच्छरि दुष्ट ॥८१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेस्या ब्राह्मण भाट डुब, जक्षसिक्ष इन काय ॥ भक्ष स्थान स्वभगत छे, विरतीथी अलगाय ॥८२॥
सुखे शुद्ध मारग चलै, थया मुढ मग जेय ॥ जात कुमार्गी मार्गमें, चाले अचरज तेय ॥ ८३ ॥
मिथ्यात्वीके विघन सत, पण बोलत नहि दुष्ट ॥ पडे विघन लव धर्मिके, तो नाचै अघ पुष्ट ॥८४॥
समदृष्टी के विघन पण, उछव सरिखो होय ॥ अति उच्छव मिथ्यात्व जुत, महा विघ्न भय जोय ॥८५॥
निज संपतकूं हीलतो, नमे इंद्र पण तास ॥ जे समकित छांडे नही, पडे मरणकी त्रास ॥ ८६ ॥
मोक्षार्थी तृण जिम तजे, निज जीवित न समत्त ॥ जीवित वलि पण पामिये, हरयुं न समकित कत्त ॥
विभव रहित पण विभव जुत, समकित रत्न समेत ॥ समकित रहित छते धने, दारिद्री वनप्रेत ॥८८॥
पूजा अवसर श्राद्धकूं, कोइ दिये धन कोडि ॥ ते असार तजि सार जिन पूजा रचै निचोडी ॥८९॥
दर्शनादि गुण कारिणी, कहि जिनवर पूजाय ॥ वलि मिथ्यात्व करी कही, सा पूजा जिनराय ॥९०॥
जो जो जिन आज्ञा सहित, तेहिज मानै जोय ॥ शेष न मानै तत्व नह, लोकिके विदू सोय ॥९१॥
आणा रहित अधर्म कुट, धर्म जिनाज्ञा तार ॥ एह तत्व जाणी करो, धर्म जिनाज्ञा सार ॥ ९२ ॥
भवभय रहित सुभट तथा, दुष्ट धीठ नर तेह ॥ छते सुगुरु स्वाधीन जे, शुद्ध धर्म न सुणेय ॥ ९३ ॥
सुकुल धर्म जाती गुणी, पर नर मेलिय सम्म ॥ पछे विसुद्ध चरण पछे, उपकारे शिव रम्म ॥ ९४ ॥
नीका नारक जेहनो, दुख सुणि भवि जण केय ॥ हरि हर रुद्धि समृद्धि पण, तनु उत्कंट जणेय ॥९५॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धर्मदासगणि रचित उपदेशमाल सिद्धांत ॥ श्रमण श्राद्ध मानैं सवी, पठे पाठवे खांत ॥९६॥
मान मोह भृते छल्या, अधम केइ किरियाय ॥ तेह मालने हीलता, न गणे भव दुःख भाय ॥९७॥
एक मर लघु भूपनी, आण भंगथी थाय ॥ सुं वली त्रिभुवन भूपनी, आण हणे कहेवाय ॥ ९८ ॥
जगहितकर जिनवर वचन, ते कारण भविलोय ॥ तास विराधे धर्म किम, जीवदया किम होय ॥९९॥
सूत्र रहित दर्शी अधिक, क्रिया तणो मंडाण ॥ ऋजु रंजण मुनि हीलवा, फिरे मूढगत त्राण ॥१००॥
शुद्धधर्मकूं जो दीए, सो जिनराज न और ॥ सुरतरु समतरुअन्य क्या ! होय कहो किण ठौर ॥१०१॥
जे गुण दोष अज्ञान ते, किम बुधमें बुध होय ॥ अथवा ते बुध होय तो, सम विष अमृत दोय ॥१०२
मूल जिनेश्वर तद्वचन, गुरु जन गाढा सैन ॥ शेष पाप थानक तजू, निज परनो दिन रैन ॥ १०३ ॥
राग रोस किन ऊपरे, नहि हमने छे एक ॥ धर्म हेत जिन आण रत, छे गुरु और विवेक ॥ १०४ ॥
निज पर गुरु न करे कदा, तत्व ज्ञात गत गर्व ॥ जैन वचन मणी मंडणे, मंडीत ते गुरु सर्व ॥१०५॥
शुद्ध पुन्ययुत सजन जन, तसुं जइये बलिहार ॥ जसु लघु संगमथी हुवे, धर्मबुद्धि विस्तार ॥१०६॥
केइ आज पिण आकरा, दीसे गुणि गुरु शुद्ध ॥ प्रभु जिनवल्लभ सारिखो, वलि जिन वल्लभ बुद्ध ॥
गुरु जिनवल्लभ वचनथी, उलसै सम्म न जास ॥ हरै घूककी अंधता, कैसे भानु प्रकाश ॥ १०८ ॥
मरता जग जन जोइने, जे न करै वस मन्न ॥ पापथकी विरमे नही, ते नर धीठ अधन्न ॥१०९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोक विलाप करी उदर, शिर कूटी उर देह ॥ नाखै नरके जीवने, धिग् धिग् ते दुर्नेह ॥ ११० ॥
प्रियमरणनुं एक दुःख, बीजुं नरक मझार ॥ इकतो पडवुं मालथी, बीजो डंड प्रहार ॥ १११ ॥
धर्मार्थी दूषम समै, दुर्लभ साधुने श्राद्ध ॥ नाम साधु श्रावक बहू, दग रागादि सबाध ॥ ११२ ॥
शुद्ध धर्मनी वात पण, धनने रति उपजाय ॥ मिथ्या मोहित मूढने, मिथ्यात्वे रति थाय ॥ ११३ ॥
जिन मत जाण विमल हिये, तास एक गुरु दुःख ॥ धर्म कहीने सेवतो, पापप्रते जो मुक्ख ॥ ११४ ॥
महाभाग, जिन वचन रत, संवेगी भवभीत ॥ विरला जे समसक्तिए, व्रत पाले श्रुत रीत ॥११५॥
इक धुर विण सर्वांग पण शकट जेम न चलंत ॥ तेम धर्म मंडाण सब, विन समकित न फलंत ॥११६॥
धर्मतत्व श्रुत आत्महित, अहित न जाणे जेह ॥ ते अजाण पररोष किम,जिनमत कुसल करेह ॥११७॥
जसु वैरी निज आतमा, तसु परदया न होय ॥ याचक चोरतणो इहाँ, उदाहरण जग जोय ॥११८॥
जे छे राज धनादिनो, हेतुभूत व्यापार ॥ ते अति पाप वणिज तजे, उत्तम भव भीतार ॥ ११९ ॥
मोहित धन स्वजनादिके, लुब्ध सत्व करि हीण ॥ पाप भजै व्यापारमें, मध्यमपेटाधिन ॥ १२० ॥
अधम अधम कारण विना, करि अज्ञान अभिमान ॥ जे उत्श्रुत भाषन करे, धिग धिग तेनुं ज्ञान ॥१२१॥
जीव मरीची वीरनो, उत्श्रुत लेस उच्चार ॥ सागर कोडा कोडि जो, भमिओ भवकांतार ॥१२२॥
वारवार ए श्रुत वचन, सांभलि जोतो हेय ॥ सेवै बहु उत्सूत्र पद, दोष न मानै जेय ॥ १२३ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तसु जिन धर्म किहां थकी, ज्ञानसु दुःख वैराग ॥ कूटमान पंडित नटित, नरके खेलत फाग ॥ १२४ ॥
जे बांध्या खल कर्म करि, ते सबहीके थाय ॥ हित उपदेशसु दोषमय, बहु मा भण इण न्याय ॥१२५॥
जसु कुसुद्ध मन केम सो, जिन वचने बूझेय ॥ तो तेने अर्थ गुणी, फोकट आत्म दमेय ॥ १२६ ॥
करनो अरु साधन तथा, रहो प्रभावण दूर ॥ शुद्ध धर्म श्रद्धान पिण, हरै कठिण दुःखपूर ॥ १२७ ॥
ते दिन क्यारे आवशे, ज्यारे सदगुरु पास ॥ उत्सूत्रासे रहित जिन, धर्म सुणिसुं खास ॥ १२८ ॥
दीठा पण केइक गुरु, न गमे जाण हीयेय ॥ केइ अदीठाहि जगमें, जिम जिणवल्लभश्रेय ॥ १२९ ॥
आरंभि अति पापिने, जिनवर सुगुरु समान ॥ जे जाणे ते जीव जिन, धर्म विमुख बेभान ॥१३०॥
वांदे पूजे जेहने, हीले तेनो वैण ॥ वांदे पूजै किम तदा, जन थिति जूये सैन ॥ १३१ ॥
कह जन जे आराधिए, म कोपाइए तेह ॥ मानी जो तसु वेन जो, वंछित तुं वांछेह ॥ १३२ ॥
दुष्ट उदय दुख प्रगट जन, दूसम दंड छलेय ॥ तसु प्रणमुं जे धन्यनो, समकित गुण न चलेय ॥ १३३ ॥
समयसुद्धि व्यवहार नय, निजमतिने अनुसार ॥ कलाक्षेत्र अनुमानथी, सुपरिक्षित गुरुधार ॥ १३४ ॥
तो पण निज जडता करी, न गुरु कर्म विश्वास ॥ पुण्ये धन्य कृतार्थने, मिले सुगुरु गुणरास ॥ १३५ ॥
वलि हुं अपुण्य तदा जदी,लाधो नवि लाधोय ॥ ते पिण ते मुझ सरण अब, जुगप्रधान गुरु जोय ॥१३६
सम्यक्त्व जाणे केवलि, जैनधर्म दुर्ज्ञेय ॥ तदपि जाणणा योग्य है,श्रुत व्यवहारे तेय ॥ १३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोधित श्रुत व्यवहारने, निर्मल समकित थाय ॥ जिण आणाराधन थकी,जे कारन जिन गाय ॥१३८॥
जे जे गुरु अब देखिये, ते न मिले श्रुत न्याय ॥ पिण श्रद्धा इक छे चरण, दुपसह अंत गवाय ॥ १३९ ॥
तो मध्यस्थ मनेथि इक, युग प्रधान श्रुत न्याय ॥ रूडी रीते परिखवो, तजि प्रवाह हलवाय ॥ १४० ॥
अब दसम चरज नामगणि, जनित नीच जन कर्म ॥ लोक प्रवाहे निपुण पण, पडिआ तजि शुभ धर्म ॥
पडना लंबन आचरे, मिथ्यादृष्टि तेय ॥ जे समदृष्टि तेहनो, मनचडते पगथेय ॥ १४२ ॥
सुलभ सकल पि कनकमणि, आदि वस्तु विस्तार ॥ मार्ग निपुणनो संग जग, अति दुर्लभ अवधार ॥
मानविषोप समाववा, शुद्ध देव गुरु धर्म ॥ ते सेवे पण मद थयो, हा ते पूर्व कुकर्म ॥ १४४ ॥
जिन आचरण थकी जुदो, जे जण तसु आचार ॥ रे सड करतो किम कहै, हुं जिन भगत उदार ॥१४५॥
जाकूं मानै लोक तस, मानै लोक अनेक ॥ मानै जास जिनेंद्र तसु माने कोइक छेक ॥ १४६ ॥
साधर्मीथी अधिक जस, परिजन उपर प्रेम ॥ तास न समकित मानिये, आगम नीति एम ॥ १४७ ॥
जिनपति लोकाचारथी, जो तुं जाणे भिन्न ॥ तो किम लोकाचारने, तुं माने प्रभु मन्न ॥ १४८ ॥
जिनवरने प्रणमी वली, जे प्रणमे अन देव ॥ सन्निपात मिथ्यात हत, तस कुण वैद इहेव ॥१४९॥
गुरू एक वलि श्राद्ध इक, चैत्य विविधचित्रेव ॥ तामें जो जिनद्रव्यते, दिए परस्पर नेव ॥ १५० ॥
ते गुरू नहि श्रावके नही, नहि प्रभु पूजक तेय ॥ मोह थिती मूढोतणी, जाणी श्रुत निपुणेय ॥१५१॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ समाप्तमिदं षष्ठिशतकप्रकरणं सटीकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चैत्य भुवन वलि श्राद्धजन, साधारण द्रव्यादि ॥ तास भेद जसु वचनमें, तेगुरु छे जगदादि ॥१५२॥
प्रगटे न विधि विवेक अब, प्रभु वचने पण जाय ॥ ताव निबिड मिथ्यात्वनी, गंठितणो अनुभाव॥१५३॥
बंधन मरण भयादि दुख, नहि तिक्षण दुख जाण ॥ जे अविनय प्रभु वचननो, ते दुख दोष निधान ॥
वीरवचन विधि सार लखि, जब निज आतम जोय ॥ तो कहते गृही धर्म जे, गृह्यो धीर पुरुषोय॥१५५॥
यदपि सुश्रावक सेढिए, चढण कढण असमर्थ ॥ तदपि मनोरथ मुझहिये, कबहू करूं तदर्थ ॥ १५६ ॥
तो सुभ भावे प्रभुनमत, चरणे जाचू एक ॥ होय सदा मुझ तुम वचन, रतन लोभ अति रेक ॥ १५७ ॥
मिथ्यावास सुमलिन मन, गत विवेक हममांहि ॥ कहांथि सुख संभाविए, स्वपनविषे पण नाहि ॥१५८॥
धरुं जो जीवित मात्र पण, नाम श्राद्धनो सार ॥ ते पण अति अचिरज प्रभु, दूसम काल मझार ॥१५९॥
इम विचार करि तिम सुगुरु, हमने करो सनाथ ॥ सुलभ होय जिम नरपणुं शिव सामग्री साथ ॥१६०॥
नेमिचंद भंडारिकृत, गाथा केइक एम ॥ विधिमगमग्न भविक भणो, लखो लहो शिव क्षेम ॥ १६१ ॥
षष्ठिशतक प्राकृतथकी दोधक किया सुभास । दोधक शोधक बुद्धिजन, सेवक मोहनतास ॥ १६२ ॥

॥ भाषानुवादः समाप्तः ॥



For Private and Personal Use Only

## ॥ परमपवित्र आचार्यमहाराज श्रीविजनीतिसूरीश्वराणां स्तुत्यष्टकम् ॥

बाल्याच्छ्रीब्रह्मचारी सकलजनहितानन्दकः सत्यवादी, श्रीमच्छ्रीनीतिचारी गुणिजनसकलान् बोधयन् राजते वै ।
नीत्याद्यःसूरिराजश्च विजयचरमः शान्तमूर्तिर्दयालु–राकापूर्णेन्दुवक्त्रस्त्रिदिवपतिगुरुः सर्वदेवेशमान्यः ॥ १ ॥

( वसन्ततिलकावृत्तम् )

विद्याविचक्षणजनैः कृतकीर्तिगानं. पञ्चव्रतादिपरिपालकमाप्तवर्यम् ।
श्रीजैनसूरिमनिशं नमतु प्रकृष्टं, भूमौ सुनीतिविजयं जनताघनाशम् ॥ २ ॥

शिष्यप्रशिष्यसद्वृन्दै–र्वन्दितस्तदनुज्ञया । प्रवर्त्तमानसच्छास्त्र–र्युक्तैर्विजयतेतराम् ॥ ३ ॥
वर्चसा ब्रह्मचर्यस्य दीपयन्तं दिशो दश । श्रीनीतिविजयाचार्यं वन्दध्वं सकला जनाः ॥ ४ ॥
निर्मत्सरं मनः कृत्वा मान्यो गुणिजनैः स च । निर्मत्सरो हि साधूना- मात्मतत्त्वविचिन्तकः ॥५॥
पन्न्यासपदवांश्चैव तथा गणिपदं दधत् । श्रीहर्षविजयो नित्यं सुशास्त्रार्थविबोधकृत् ॥ ६ ॥
श्री मानविजयः प्राज्ञः कल्याणमलङ्काभिधौ । सुमतिविजयश्चैव चत्वारः साधवः खलु ॥७॥
विक्रमार्कनृपत्यब्दे नन्दर्षिनन्दभूमिते । मार्गे सिते हि शुक्लास्ये सतेने रविणा कृतः ॥ ८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ समाप्तमिदं सटीकं षष्ठिशतकप्रकरणम् ॥

For Private and Personal Use Only